४ प्रयामे । ५ प्रयाते, प्रधामे, प्रयामे । ६ लोकंमप्रायत् । ७ इसके बाद कुछ गड़ बड़ है। ५ के पूर्व यह सब में लिखा है 'त एतान्यृक्पदानि शरीराणि धून्वन्त आयन् (स्यंयन्)। ते स्वर्गं लोकमजयन् (–न्नत्)। अथेऽमानि प्रजापतिर् ...ता एवर्चोऽभवन् । ८ यत् । ९ ओम । ते स्वर्ग अजयन्, यहां अधिक है। १० ओम । यद्...... । ११ ओम । ता एव।

१ आस–। २ तद् । ३ एवा । ४ विन्दन्त । ५ अव ।

ते पुनः प्रत्यादुत्यार्चे[6] सामाऽगायन् । तेनाऽस्माल्लोकाद-
सुराननुदन्त ॥४॥ तद्वै माध्यन्दिने च सवने तृतीयसवने[7] च
नर्चो[8]ऽपराधोऽस्ति । स यत्ते ऋचि[9] गायति तेनाऽस्माल्लोकाद्
द्विषन्तम्भ्रातृव्यं नुदते । अथ यदमृते[10] देवतासु प्रातस्सवनं गायति
तेन स्वर्गं लोकमेति ॥५॥ प्रजापतिर्वै साम्नेऽमां जितिमजयद्याऽस्ये
ऽयं जितिस्ताम्[11] । स स्वर्गं लोकमारोहत्[12] ॥६॥ ते देवाः प्रजापति-
मुपेत्याऽब्रुवन्नस्मभ्यमपीऽदं साम प्रयच्छेति । तथेति । तदेभ्य-
स्साम प्रायच्छत् ॥७॥ तदेनानिदं साम स्वर्गं लोकं नाऽकामयत[13]
वोढुम् ॥८॥ ते देवाः प्रजापति मुपेत्याऽब्रुवन् यद्वै नस्साम प्रादा
इदं वै नस्तत्स्वर्गं लोकं न कामयते[14] वोढुमिति ॥९॥ तद्वै पाप्मना
संसृजतेति । कोऽस्य पाप्मेति । ऋगिति । तदृचा समसृजन्
॥१०॥ तदिदम्प्रजापतेर्गर्हयमाणमतिष्ठदिदं वै मा तत्पाप्मना सम-
स्राक्षुरिति[15] । सोऽब्रवीद्यस्त्वैतेन व्यावर्तयाद्व्येव स पाप्मना वर्तीता
इति ॥११॥ स य एतदृचा प्रातस्सवने व्यावर्तयति व्येवं[16] स
पाप्मना वर्तते ॥१२॥ १ । १६॥

चतुर्थेऽनुवाके द्वितीयः खण्डः ।

६–द्रुच्यत्य । ७ त्रीत–। ८–पराधो । ९–चि । १०–नृते । ११ तम् ।
१२ अर– । १३ न कामायते, न कामयते । १४ कामाय्–, सामय् ।
१५संस्र– । १६ एव ।

तदाहुर्यदोवा ओवा इति गीयते कात्रर्भवति क सामेति ॥१॥

प्रस्तुवन्नेवाष्टाभिरक्षरैः प्रस्तौति । अष्टाक्षरा गायत्री । अक्षरमक्षरं त्र्यक्षरम् । तच्चतुर्विंशतिस्सम्पद्यन्ते । चतुर्विंशत्यक्षरा गायत्री ॥२॥

तामेताम्प्रस्तावेन[1]र्चमाप्त्वा या श्रीर्या॒ऽपचितिर्यस्स्वर्गो[2] लोको यद्यशो यदन्नाद्यं तान्याागायमान आस्ते ॥३॥ ३।१।७॥

चतुर्थेऽनुवाके तृतीयः खण्डः ।

प्रजापतिर्देवानसृजत । तान्[1] मृत्युः पाप्मान्वसृज्यत ॥१॥

ते देवाः प्रजापतिमुपेत्याब्रुवन् कस्मादु[2] नोऽसृष्ठा[3] मृत्युं चेन्नः पाप्मानमन्ववसृक्ष्यन्नासिथेति[4] ॥२॥ तानब्रवीच्छन्दांसि सम्भरत । तानि यथायतनम्प्रविशत[5] ततो मृत्युना पाप्मना व्यावर्त्स्यथेति[6] ॥३॥

वसवो गायत्रीं समभरन् । तां ते प्राविशन् । तान् साऽच्छादयत् ॥४॥ रुद्रास्त्रिष्टुभं समभरन् । तां ते प्राविशन् । तान् साऽच्छादयत्[7] ॥५॥ आदित्या जगतीं समभरन् । तां ते प्राविशन् । तान् साऽच्छादयत् ॥६॥ विश्वेदेवा अनुष्टुभं समभरन् । तां ते प्राविशन् । तान् साऽच्छादयत् ॥७॥ तान् अस्यामृच्यस्वरायाम्मृत्युर्निरजा-[8]

---

१. प्रस्तावेप्रस्तवेन । २–गे ।

१. ता, ताः । २ कस्मा । ३–ष्टा । ४–सृक्षन्न । ५–शत ६–वक्स्य, वत्स्य–। ७ च्छाद, याम ।

नाद्यथा मणौ मणिसूत्रम्परिपश्येदेवम्[8] ॥८॥ ते स्वरम्प्राविशन् ।
तान् स्वरे सतो न[9] निरजानात् । स्वरस्य तु घोषेणाऽन्वैत ॥९॥
त ओमित्येतदेवाक्षरं समारोहन् । एतदेवाक्षरं त्रयीविद्या । यददो[10]
ऽमृतं तपति तत्प्रपद्य ततो मृत्युना पाप्मना व्यावर्तन्त ॥१०॥
एवमेवैवं विद्वान् ओमित्येतदेवाक्षरं समारुह्य यददो[12]ऽमृतं तपति
तत्प्रपद्य ततो मृत्युना पाप्मना व्यावर्ततेऽथो यस्यैवं विद्वानुद्गा-
यति ॥११॥ ३।१८॥

चतुर्थेऽनुवाके चतुर्थः खण्डः । चतुर्थोऽनुवाकस्समाप्तः ॥

——:०:——

अथैतदेकविंशं साम ॥१॥ तस्य त्रय्येव[1] विद्या हिङ्कारः ।
अग्निर्वायुरसावादित्य[2] एष प्रस्तावः । इम एव लोका आदिः ।
तेषु[3] हीदं लोकेषु सर्वमाहितम् । श्रद्धा यज्ञो[4] दक्षिणा एष उद्गीथः।
दिशोऽवान्तरदिश आकाश एष प्रतिहारः । आपः प्रजा ओषधय
एष उपद्रवः । चन्द्रमा नक्षत्राणि पितर एतन्निधनम् ॥२॥
तदेतदेकविंशं साम । स य एवमेतदेकविंशं साम वेदैतेन हास्य

८–यैदू । ९ नास्ति । १० ओ । ११–पेदू । १२ पदो, ओ ।

१. त्रै । २ वावायुर । ३ येषु । ४–ज्ञा ।

सर्वेणोद्दीतम्भवसेतस्माद्वेव[५] सर्वस्मादाद्दश्च्यते[६] य एवं विद्वांसमुप-
वदति ॥३॥ १।१.६॥

पञ्चमोऽनुवाकस्समाप्तः ।

——:०:——

इदमेवेदमग्रेऽन्तरिक्ष[१]मासीत् । तद्वेवाप्येतर्हि ॥१॥ तद्यदेतदन्तरि[१]क्षं[२]
य एवा[३]ऽयम्[४]पवत एतदेवान्तरिक्ष[१]म् । एष ह वा अन्तारिक्ष[१]नाम्[५] ॥२॥
एष उ एवैष विततः तद्यथा काष्ठेन पलाशे विष्कब्धे स्यातामक्षेण
वा चक्रावेवमेते[६]ने[७]मौ लोकौ विष्कब्धौ ॥३॥ तस्मिन्निदं सर्वमन्तः ।
तद्य[८]दस्मिन्निदं सर्वमन्तस्तस्मादन्तर्यक्षम् । अन्तर्यक्षं[९] ह वै नामैतत् ।
तदन्तारिक्ष[१]मिति परोक्षमाचक्षते ॥४॥ तद्यथा मूताः प्रबद्धाः[१०] प्रलम्बे-
रन्नेवं हैतस्मिन्सर्वे लोकाः प्रबद्धाः प्रलम्बन्ते ॥५॥ तस्यैतस्य
साम्न[११]स्तिस्र आगा[१२]स्त्रिण्यागीतानि पङ्क्तिभूतयश्चतस्रः प्रतिष्ठा दश
प्रगास्सप्त संस्था द्वौ स्तोभावेकं रूपम्[१३] ॥६॥ तद्यास्तिस्र आगा इम
एव ते[१४] लोकाः ॥७॥ अथ यानि (त्रीण्य्) आगीतान्यग्निर्वायुरसा

५–अस् । ६ आवृच्योते ।

१–रीक्ष– । २ अधिक है ‘ एष ह वा अन्तरीक्षम । ३ एवम् ।
४ नास्ति । ५–क्षोना– । ६ नवम । ७ एतेँन । ८ नास्ति । तद्·········
अन्तस् । ९ नास्ति । १०–बन्द– । ११–नस् । १२ अगमाः । १३ एक-
रैपम, एकरूपम । १४ तो ।

वादित्र एतान्यागीतानि । न ह वै कांचनश्रियमपराप्नोति य एवं वेद ॥८॥ १,२८॥

षष्ठेऽनुवाके प्रथमः खण्डः ।

अथ याष्षड्विभूतय ऋतवस्ते ॥१॥ अथ याश्चतस्रः प्रतिष्ठा इमा एव ताश्चतस्रोदिशः ॥२॥ अथ ये दश प्रग्रा इम एव ते दश प्राणाः ॥३॥ अथ यास्सप्त संस्था या एवैतास्सप्ताहोरात्राः प्राचीर्वषट्कुर्वन्ति ता एव ताः ॥४॥ अथ यौ द्वौ स्तोभावहोरात्रे एवते ॥५॥ अथ यदेकंरूपं कर्मैव तत् । कर्मणा हीदं सर्वं विक्रियते ॥६॥ तस्यैतस्य साम्नोदेवा आजिमायन् । स प्रजापतिर्हरसा हिङ्कारमुदजयदग्निस्तेजसा प्रस्तावं रूपेण बृहस्पतिरुद्गीथं स्वधया पितरः प्रतिहारं वीर्येणेन्द्रोनिधनम् ॥७॥ अथेतरे देवा अन्तरिता इवासन् । त इन्द्रमब्रुवन् तव वै वयं स्मोऽनुव एतास्मिन् सामन्नाभजेति ॥८॥ तेभ्यस्स्वरम्प्रायच्छत् । तम्प्रजापतिरब्रवीत्कथेत्थमकः । सर्वं वा एभ्यस्साम प्रादाः । एतावद्वाव साम यावान् स्वरः ऋग्वा एषर्ते स्वराद्भवतीति ॥९॥ सोऽब्रवीत् पुनर्वाअहमेषामेतंरसमादास्य इति । तानब्रवीऽदुप मा गायत । अभि मा स्वरतेति । तथेति

१ नास्ति । सप्त ''''''प्तास् । २—आ । ३ वर्ष— । ४ वह् । ५ देवैं । ६—सं । ७ तावच । ८—रम । ९ सवर— । १० एषो, एषोम ।

॥१०॥ तमुपागायन् । तमभ्यस्वरन् । तेषाम्पुनारसमादत्त ॥११॥[11]
१।२१॥

षष्ठेऽनुवाके द्वितीयः खण्डः ।

स यथा मधुधाते[1] मधुनाळीभिर्मध्वासिञ्चादेवमेव तत्सामन् पुना रसमासिञ्चत् ॥१॥ तस्मादु ह नोऽपगायेत् । इन्द्र एष यदुद्गाता । स यथा सा[2]वमीषां रसमादत्त एवमेष तेषां रसमादत्ते ॥२॥ कामं ह तु यजमान उपगायेद्यजमानस्य हि तद्भवत्यथो ब्रह्मचार्याचार्योक्तः ॥३॥ तदु वा आहुर्नैव गायेत् । दिशो ह्युपागायन्[3] दिशामेवं[4] सश्लोकतां जयतीति ॥४॥ ते[5] व एवेमे[6] मुख्याः प्राणा एत एवोद्गातारश्चोपगातारश्च । इमे ह वाव उद्गातार इम उ चत्वार उपगातारः ॥५॥ तस्मादु चतुर एवोऽपगातॄन्[7] कुर्वीत। तस्मादुहोऽपगातॄन्[8] प्रत्यभिमृशेद्दिशस्स्थश्रोत्रं मे माहिंसिष्टेति ॥६॥ स यस्स रस आसीद्य एवायम्पवत एष एव स रसः ॥७॥ स यथा मध्वालोपमद्यादिति ह स्माह सुचित्तश्शैलन एवमेतस्य रसस्यात्मानम्पूरयेत् । स एवोद्गातात्मानं च यजमानं चामृतत्वं गमयतीति ॥८॥ १।२२

षष्ठेऽनुवाके तृतीयः खण्डः । षष्ठोऽनुवाकस्समाप्तः ।

———:०:———

११–त्ता ।

१–धुवने । २ 'स' अधिक पढ़ो । ३–यत । ४–शम । ५ एवं । ६–व । ७ ऽद्गा–,–तॄन् । ८–तॄन् ।

अयमेवेदमग्र आकाश आसीत् । स उ एवाप्येतर्हि ॥१॥ स यस्स आकाशो वागेव सा । तस्मादाकाशाद्वाग्वदति ॥२॥ तामेतां[1] वाचम्प्रजापतिरभ्यपीळयत् । तस्या अभिपीळितायै रसः[2] प्राणेदत्[3] । त एवेमे लोका अभवन् ॥३॥ स इमाँ[4] लोकानभ्यपीळयत् । तेषामभिपीळितानां रसः प्राणेदत् । ता एवैता देवता अभवन्नग्नि-र्वायुरसावादित्य[5] इति ॥४॥ स एता देवता अभ्यपीळयत् । तासामभिपीळितानां रसः प्राणेदत् । सा त्रयीविद्याभवत् ॥५॥ स[6] त्रयीं विद्यामभ्यपीळयत् । तस्या अभिपीळितायै रसः प्राणेदत् । ता एवैता व्याहृतयोऽभवन् भूर्भुवस्स्वरिति ॥६॥ स एता व्या-हृतीरभ्यपीळयत् । तासामभिपीळितानां रसः प्राणेदत् । तदेतद-क्षरमभवदोमिति यदेतद् ॥७॥ स एतदक्षरमभ्यपीळयत् । तस्या-ऽभिपीळितस्य[7] रसः प्राणेदत् ॥८॥ १।२३॥

सप्तमेऽनुवाके प्रथमः खण्डः ।

तदक्षरदेव । यदक्षरदेव तस्मादक्षरम् ॥१॥ यद्वेवाक्षरं[1] ना-क्षीयत तस्मादक्षयम् । अक्षयं ह वै नामैतत् । तदक्षरमिति

१. एता वा । २. रसम् । ३. 'स त्रयीम्.........रसम् (!) प्राणेदत्' अधिक है । ४. नास्ति । ५–आ । ६ नास्ति । स त्रयीम् ....प्राणेदत् । ७–आ ।

१–वा ।

परोक्षमाचक्षते ॥२॥ तद्धैतदेक ओमिति गायन्ति । तत्तथा न गायेत । ईश्वरो हैनदेतेन रसेनान्तर्धातो[2]: । अथो[3] द्वै[4] इवैवम्भवत ओमिति । ओ इत्यु हैके गायन्ति । तदु ह[5] तन्न[6] गीतम् । नैव[7] तथा गायेत् । ओं[8] इत्येव गायेत् । तदेनदेतेन रसेन सन्दधाति ॥३॥ तदेतं रसं तर्पयति । रसस्तृप्तोऽक्षरं[9] तर्पयति । अक्षरं तृप्तं व्याहृती स्तर्पयति । व्याहृतयस्तृप्तावेदाँस्तर्पयन्ति । वेदास्तृप्ता देवतास्तर्पयन्ति । देवतास्तृप्ता लोकाँस्तर्पयन्ति । लोकास्तृप्ता अक्षरं तर्पयन्ति । अक्षरं तृप्तं वाचं तपर्यति[10] । वाक्[11] तृप्ताकाशं तर्पयति । आकाशस्तृप्तः प्रजास्तर्पयति । तृप्यति प्रजया पशुभिर्य एतदेवं वेदाथो यस्यैवं विद्वानुद्गायति[12] ॥४॥ १।२४॥

सप्तमेऽनुवाके द्वितीयः खण्डः । सप्तमोऽनुवाकस्समाप्तः ।

——:०:——

अयमेवेदमग्र[1] आकाश आसीत् स उ एवाप्येतर्हि ॥१॥ स यस्स आकाश आदित्य एव स । एतस्मिन् (ह्) उदिते[2] सर्वमिदमाकाशते ॥२॥ तस्य मर्त्यामृतयोर्वै[3] तीराणि[4] समुद्र एव ।

---

२ या– । ३–थे । ४ द्वै, द्वै । ५ नास्ति । ६ नि– । ७ ने एव । ८ ओ । ९ अक्षरं ········ वाचं तर्पयति यह पाठ नहीं । १०–यन्ति । ११ वार्कस् । १२ गायत ।

१ दव् (!) । २ सुदिते । ३ वैर्वं । ४ तरणी ।

तद्यत्समुद्रेणं परिगृहीतं[5] तन्मृत्योराप्तमथ यत्परं तदमृतम् ॥३॥ स यो ह स समुद्रो य एवायम्पवत एष एव स समुद्रः । एतं हि संद्रवन्तं[6] सर्वाणि भूतान्यनुसंद्रवन्ति[7] ॥४॥ तस्य द्यावापृथिवी[8] एव रोधसी । अथ यथा नद्यां[9] कंसानि[10] वा प्रहीणानि[11] स्युस्सराँसि वै- व मस्यायम्पार्थिवस्ससमुद्रः[12] ॥५॥ स एष पार एव समुद्रस्योदेति । स उद्यन्नेव वायोः पृष्ठ आक्रमते । सोऽमृतादेवोदेति । अमृतमनु- संचरति । अमृते प्रतिष्ठितः[13] ॥६॥ तस्यैतत् त्रिवृद्रूपम्मृत्योरनाप्तं शुक्लं कृष्णम्पुरुषः ॥७॥ तद्यच्छुक्लं तद्वाचोरूपमृचोऽग्नेर्मृत्योः । सा या सा वाग्[14]ऋक्[15] सा । अथ योऽग्निर्मृत्युस्सः ॥८॥ अथ यत्कृष्णं तदपां रूपमन्नस्य[16] मनसोयजुषः । तद्यास्ता[17] आपोऽन्नं तत् । अथ यन्मनो यजुष्टत् ॥९॥ अथ यः पुरुषस्स प्राणस्तत्साम तद्ब्रह्म तदमृतम् । स यः प्राणस्तत्साम । अथ यद्ब्रह्म तदमृतम् ॥१०॥ १।२५॥

अष्टमेऽनुवाके प्रथमः खण्डः ।

अथाध्यात्मम् । इदमेव चक्षुस्त्रिवृच्छुक्लं कृष्णम्पुरुषः ॥१॥ तद्यच्छुक्लं तद्वाचो रूपमृचोऽग्नेर्मृत्योः । सा या सा वाग्[1]ऋक्[2] सा ।

५—गृह्य— । ६—द्रे— । ७ अनुद्र— । ८—या । ९—याम् । १० कसा- नि । ११ प्रहीणाहीनि । १२ अधिक है 'सस्'. स । १३ प्रतितिष्ठतः । १४ वाक्स, वाग्ग् । १५ ऋत् । १६ अन्नमस्य । १७ नास्ति, तद्याः—यः पुरुषस् ॥ १ मृत् । २ अधिक 'ऽकसा' ।

अथ योऽग्निर्मृत्युस्सः ॥२॥ अथ यत्कृष्णं तदपां रूपमन्नस्य मनसो यजुषः। तद्यास्ता आपोऽन्नं तत्। अथ यन्मनो यजुष्टत् ॥३॥ अथ यः पुरुषस्स प्राणस्तत्साम तद्ब्रह्म तदमृतम्। स यः प्राणस्तत्साम। अथ यद्ब्रह्म तदमृतम ॥४॥ सैऽषोऽत्क्रान्तिर्ब्रह्मणः। अथातः पराक्रान्तिः ॥५॥ सा या साऽऽक्रान्तिर्विद्युदेव सा। स यदेव विद्युतो विद्योतमानायै श्येतं रूपम्भवति तद्वाचो रूपमृचोऽग्नेर्मृत्सोः ॥६॥ यद्वेव विद्युतस्संद्रवन्त्यै नीलं रूपम्भवति तदपां रूपमन्नस्य मनसो यजुषः ॥७॥ य एवैष विद्युति पुरुषस्स प्राणस्तत्साम तद्ब्रह्म तदमृतम। स यः प्राणस्तत्साम। अथ यद्ब्रह्म तदमृतम् ॥८॥ १।२६॥

अष्टमेऽनुवाके द्वितीयः खण्डः।

स हैषोऽमृतेन परिवृढो मृत्युमध्यास्तेऽन्नं कृत्वा ॥१॥ अथैऽष एव पुरुषो योऽयं चक्षुषि। य आदित्ये सोऽतिपुरुषः। यो विद्युति स परमपुरुषः ॥२॥ एते ह वाव त्रयः पुरुषाः। आ ह्यस्यैते जायन्ते ॥३॥ स योऽयं चक्षुष्येषोऽनुरूपो नाम। अन्वङ् ह्येष

३–षो। स (!)। ४–त। ५ नास्ति। ६ श्र्येतं। ७–न्न्–। ८–वे। ९–मा।

१–सी। २–यो। ३–षो,-षा,-ष। ४–वज। ५ हू।

सर्वाणि रूपाणि । तमनुरूप इत्युपासीत । अन्वञ्चि[६] हैनं[७] सर्वाणि रूपाणि भवन्ति ॥४॥ य आदिशे स प्रतिरूपः । प्रत्यङ् ह्येष सर्वाणि रूपाणि । तम्प्रतिरूप इत्युपासीत । प्रत्यञ्चि[८] हैनं सर्वाणि रूपाणि भवन्ति ॥५॥ यो विद्युति स सर्वरूपः । सर्वाणि[९] ह्येतस्मिन् रूपाणि । तं[१०] सर्वरूप इत्युपासीत । सर्वाणि हाऽस्मिन् रूपाणि[१०] भवन्ति ॥६॥ एते ह वाव त्रयः पुरुषाः । आ हाऽस्यैते जायन्ते य एतदेवं वेदाथो यस्यैवं विद्वानुद्गायति ॥७॥ १।२७॥

अष्टमेऽनुवाके तृतीयः खण्डः । अष्टमोऽनुवाकस्समाप्तः ।

———:०:———

अयमेवेदमग्र आकाश आसीत् । स उ एवाप्येतर्हि ॥१॥ स यस्स आकाश इन्द्र एव सः । स यस्स इन्द्र एष एव स य एष एव[१] तपति । स एष सप्तरश्मिर्वृषभस्तुविष्मान् ॥२॥ तस्य वाङ्मयो रश्मिः प्राङ् प्रतिष्ठितः । सा या सा वागग्निस्सः । स दशधा भवति शतधा सहस्रधाऽयुतधा प्रयुतधा नियुतधाऽर्बुदधा[२] न्यर्बुदधा निखर्वधा[३] पद्ममक्षितिर्व्योमान्तः[४][५] ॥ ३ ॥ स एष एतस्य रश्मिर्वा-

---

६-वञ्ची,-वञ्ची,-वं । ७ ह्येनम् । ८ प्रत्यं । ९ अधिक है ' रूपाणि; ' नास्ति-तं .... रूपाणि ।

१ नास्ति । २ अर्-। ३ निखर्वाचं । ४-ति । ५-त, रसोम-।

ग्भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थितः । स यः कश्च वदत्येतस्यैव[6] रश्मिना वदति[7] ॥४॥ अथ[8] मनोमयो दक्षिणा[9] प्रतिष्ठितः । तद्य-त्तन्मनश्चन्द्रमास्सः[10] । स दशधा भवति ॥५॥ स एष एतस्य रश्मिर्मनो भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थितः । स यः कश्च मनुत एतस्यैव रश्मिना मनुते ॥६॥ अथ चक्षुर्मयः[11] प्रत्यङ्[12] प्रतिष्ठितः[13] । तद्यत्तच्चक्षु-[14] रादित्यस्सः । स दशधा भवति ॥७॥ स एष एतस्य रश्मिश्चक्षु-र्भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थितः । स यः कश्च पश्यत्येतस्यैव रश्मिना पश्यति ॥८॥ अथ श्रोत्रमय उदङ्प्रतिष्ठितः[15] । तद्यत्तच्छ्रोत्रं दिशस्ताः । स दशधा भवति ॥९॥ स एष एतस्य रश्मिश्श्रोत्र-म्भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थितः । स यः कश्च शृणोत्येतस्यैव रश्मिना शृणोति ॥१०॥ १।२८॥

नवमेऽनुवाके प्रथमः खण्डः ।

अथ प्राणमय ऊर्ध्वः प्रतिष्ठितः[1] । स यस्स प्राणो वायुस्सः । स[2] दशधाभवति ॥१॥ स एष एतस्य रश्मिः प्राणो भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थितः । स यः कश्च प्राणित्येतस्यैव रश्मिना प्राणिति

---

६ पश्यति । ७ पश्यति । ८ नास्ति । ९ दक्षिणा । १० मन्वश् । ११ चक्षुम- । १२-य । १३ वस्थितः । १४ त, नास्ति । १५ प्रत्यवस्थितः ॥

१-स्थ- । २ नास्ति ।

॥२॥ अथाऽसुमयस्तिर्यङ् प्रतिष्ठितः । स ह[3] स ईशानो नाम । स दशधा भवति[4] ॥३॥ स एष एतस्य रश्मिरसुर्भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थितः । स यः कश्चाऽसुमानेतस्यैव रश्मिनाऽसुमान् ॥४॥ अथाऽन्नमयोऽर्वाङ् प्रतिष्ठितः । त[5]द्यत्तद[6]न्नमापस्ता[7]ः । स दशधा भवति शतधा सहस्रधाऽयुतधा प्रयुतधा नियुतधाऽर्बुदधान्यर्बुदधा निखर्व[8]धा पद्ममक्षितिर्व्यो[9]मान्तः ॥५॥ स एष एतस्य रश्मिरन्नम्भूत्वा सर्वास्वा[10]सु प्रजासु प्रत्यवस्थितः । स यः कश्चाश्नात्येतस्यैव रश्मिना-श्नाति ॥६॥ स एष सप्तरश्मिर्वृषभस्तुविष्मान् । तदे[11]तदृचाऽभ्यनूच्यते

यस्सप्तरश्मिर्वृषभस्तुविष्मानवासृजत्सर्तवे सप्तसिन्धून् ।
यो रौहि[12]णमस्फुरद्वज्रबाहु[13]र्द्यामारोहन्तं[14] स जनास इंद्र इति

॥७॥ यस्सप्तरश्मिरिति । सप्त ह्येत आदित्यस्य रश्मयः । वृषभ इति । एष ह्येवाऽऽसाम्प्रजानामृषभः । तुविष्मानिति । म[15]हीयैऽवास्यैषा ॥८॥ अवासृजत् सर्तवे सप्तसिन्धूनिति । सप्त ह्येते सिन्धवः ।

---

३ स्थान खाली है 'स······ई' । ४-वन्ति । ५ 'यत्' के पश्चात् 'तच्लुदं नाम' पाठ है, 'तदन्नम······स' नहीं है । ६ अँदन्नम । ७ तेदा, स्त । ८ निखर्वाच्चम, निखर्वधाच । ९ वं.म- । १० सामास्व् ११ नास्ति तदेतद्·········वृषभस्तुविष्मान् । १२ रोह- । १३-ह्व । १४-त । १५ मह्यै ।

तैरिदं सर्वं सितम् । तद्यदेतैरिदं सर्वं सितं तस्मात्सिन्धवः ॥९॥

यो रौहिणामस्फुरद्वज्रबाहुरिति । एष (हि) रौहिणामस्फुरद्वज्रबाहुः

॥१०॥ द्यामारोहन्तं[१६] स जनास इन्द्र इति । एष हीन्द्रः ॥११॥ १।२९॥

नवमेऽनुवाके द्वितीयः खण्डः।

तद्यथा गिरिम्पन्थानस्समुदियुरिति हस्माऽऽह शाट्यायनि-

रेवमेत आदित्यस्य रश्मय एतमादित्यं[१] सर्वतोऽपियन्ति[२] । स हैवं

विद्वानोमित्यादद्दान एतैरेतस्य रश्मिभिरेतमादित्यं सर्वतोऽप्येति॥१॥

तदेतत् सर्वतो द्वारमनिषेधं[३] साम । अन्यतोद्वारं है[४]ऽनदै[५]क[६] एवा[७]-

ऽभ्रङ्गमुपासते[८] । अतो[९]ऽन्यथाविदुः[१०] ॥२॥ अथ य एतदेवं वेद स

एवैतत् सर्वतो द्वारमनिषेधं सामवेद ॥३॥ सा एषा विद्युत् । (यद्)

एतन्मण्डलं समन्तम्परिपताति तत्साम । अथ यत्परमतिभाति स

पुण्यकृत्याये रसः । तमभ्यातिमुच्यते ॥४॥ तदेतदभ्रातृव्यं[११] साम ।

न ह वा इन्द्रः कंचन भ्रातृव्यम्पश्यते । स यथेन्द्रो न कंचन

भ्रातृव्यम्पश्यत एवमेव न कंचन भ्रातृव्यम्पश्यते य एतदेवं

वेदाथो यस्यैवं विद्वानुद्गायति ॥५॥ १।३०॥

नवमेऽनुवाके तृतीयः खण्डः। नवमोऽनुवाकस्समाप्तः ।

——:०:——

---

१६ स्थान खाली है–हनू–वाला,–हन्तं ।

१ एवम् । २ तिप्रतिवियन्ति । ३ अनुष्– । ४ नास्ति । ५ नत, त ।
६ नास्ति । ७ एताव, एता । ८ गम्‌''' । ९ एतो । १० विदुः । ११–तृर्वि ॥

अयमेवेदमग्र आकाश आसीत् । स उ एवाऽप्येतर्हि । स यस्स आकाश इन्द्र एव सः । स यस्स इन्द्रस्सामैवतत् ॥१॥ तस्यैतस्य साम्न इयमेव प्राचीदिग्घिङ्कार[1] इयम्प्रस्ताव इयमादिरियमुद्गीथोऽसौ प्रतिहारोऽन्तरिक्ष[2]मुपद्रव इयमेवनिधनम् ॥२॥ तदेतत्सप्त[3]विधं साम । स य एवमेतत्सप्तविधं साम वेद यत्किञ्च प्राच्यांदिशि या[4] देवता ये मनुष्या ये पशवो यदन्नाद्यं तत्सर्वं[5] हिङ्कारेणा[6]प्नोति ॥३॥ अथ यद्दक्षिणायां दिशि तत्सर्वं प्रस्तावेनाप्नोति ॥४॥ अथ यत्[7]प्रतीच्यां दिशि तत्सर्वमादिनाप्नोति ॥५॥ अथ यदुदीच्यांदिशि तत्सर्वमुद्गीथेनाप्नोति ॥६॥ अथ यद[8]मुष्यां दिशि तत्सर्वम्प्रतिहारेणाप्नोति ॥७॥ अथ यदन्तरिक्षे[2] तत्सर्वमुपद्रवेणाप्नोति ॥८॥ अथ यदस्यां दिशि या देवता ये मनुष्या ये पशवो यदन्नाद्यं तत्सर्वं निधनेनाप्नोति ॥९॥ सर्वं हैवाऽस्याऽऽप्तम्भवति सर्वं जितं न हाऽस्य कश्चन कामोऽनाप्तो भवति य एवं वेद ॥१०॥ स यद्धकिञ्च किञ्चैवं विद्वानेषु लोकेषु कुरुते स्वस्य हैव तत्स्वतः कुरुते । तदेतदृचाऽभ्यनूच्यते ॥११॥ ११३१॥

दशमेऽनुवाके प्रथमः खण्डः ।

---

१ दीर् । २–ईच्—। ३ पत् । ४ 'मनुष्या' अधिक है । ५–वा । ६ यहां चौथा श्लोक (मन्त्र) अधिक है और साथ ही प्रतिहारेण 'प्रस्तावेन' के स्थान में । ७ 'अव्यात्' अधिक है । ८ 'दक्षिणायांदिशि' ॥

यद् द्याव इन्द्र ते शतं शतम्भूमीरुत स्युः । न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी इति ॥१॥

यद् द्याव इन्द्र ते शतं शतम्भूमीरुतस्युरिति । यच्छतं द्यावस्स्युश्शतम्भूम्यस्ताभ्य एष एवाऽऽकाशो ज्यायान् ॥२॥ न त्वा वज्रिन्त्सहस्रं सूर्या अन्विति । न ह्येतं सहस्रं चन सूर्या अनु ॥३॥ न जातमष्ट रोदसी इति । न ह्येतं जातं रोदन्ति । इमे ह वाव रोदसी ताभ्यामेष एवाकाशो ज्यायान् । एतस्मिन् ह्येवैते अन्तः ॥४॥ स यस्स आकाश इन्द्र एव सः । स यस्स इन्द्र एष एव स य एष तपति ॥५॥ स एषोऽभ्राण्यतिमुच्यमान एति । तद्यथैषोऽभ्राण्यतिमुच्यमान एत्येवमेव स सर्वस्मात्पाप्मनोऽतिमुच्यमान एति य एवं वेदाथो यस्यैवं विद्वानुद्गायति ॥६॥ १।३२॥

दशमेऽनुवाके द्वितीयः खण्डः । दशमोऽनुवाकस्समाप्तः ।

———:०:———

त्रिवृत्साम चतुष्पात् । ब्रह्म तृतीयमिन्द्रस्तृतीयम्प्रजापतिस्तृतीयमन्नमेव चतुर्थः पादः ॥१॥ तद्यद्ब्रह्म स प्राणोऽथ य इन्द्र-

---

१ नास्ति । २—र्यां । ३ नास्ति । ४—यन् । ५ नास्ति, स—स ।
६ स्थान खाली 'य्र' तक । ७—मानय,—यमानय ॥
१त्रित्—

स्सा वागथ यः प्रजापतिस्तन्मनोऽन्नमेवं चतुर्थः पादः ॥२॥ मन एव हिङ्कारो वाक्प्रस्तावः प्राण उद्गीथोऽन्नमेव चतुर्थः पादः ॥३॥ करोत्येव वाचा नयति प्राणेन गमयति मनसा। तदेतन्निरुद्धं यन्मनः। तेन यत्र कामयते तदात्मानं च यजमानं च दधाति ॥४॥ अथाधि-दैवतम्[2]। चन्द्रमा एव हिङ्कारोऽग्निः प्रस्ताव आदित्य उद्गीथ आप एव चतुर्थः पादः[3]। तद्धि प्रसन्नमन्नम् ॥५॥ ता वा[4] एता देवता अमावास्यां रात्रिं संयन्ति। चन्द्रमा अमावास्यां रात्रिमादित्यम्प्र-विशत्यादित्योऽग्निम् ॥ ६ ॥ तद्यत्संयन्ति[5] तस्मात्साम। स ह वै सामवित्स साम वेद य एवं वेद ॥७॥ तासां वा एतासां देवतानामे-कैकैव देवता साम भवति ॥८॥ एष एवादित्यस्त्रिवृच्चतुष्पाद्रश्मयो मण्डलम्पुरुषः। रश्मय एव हिङ्कारः। तस्मात्ते प्रथमत एवोद्यत-स्तायन्ते। मण्डलम्प्रस्तावः पुरुष उद्गीथो या एता आपोऽन्तस्स एव चतुर्थः पादः ॥९॥ एवमेव चन्द्रमसो रश्मयो मण्डलम्पुरुषः। रश्मय एव हिङ्कारो मण्डलम्प्रस्तावः पुरुष उद्गीथो या एता आपोऽन्त-[6]स्स एव चतुर्थः पादः ॥१०॥ चत्वार्यन्यानि चत्वार्यन्यानि। तान्यष्टौ[7]। अष्टाक्षरा गायत्री[8] गायत्रं साम ब्रह्म उ[9] गायत्री। तदु ब्रह्माऽभि-सम्पद्यते। अष्टाशफाः पशवस्तेनोपशव्यम् ॥११॥ २।३३॥

एकादशोऽनुवाके प्रथमः खण्डः।

२–दैवत–। ३–अन्नम्। ४–आ। ५ सय–। ६–अं। ७नास्ति। ८उक्त्वा। ९–श्री,ब्रं॥

अथाऽध्यात्मम् । इदमेव चक्षुस्त्रिवृच्चतुष्पाच्छुक्लं कृष्णम्पुरुषः । शुक्लमेव हिङ्कारः कृष्णम्प्रस्तावः पुरुष उद्गीथो या इमा आपोऽन्तस्स एव चतुर्थः पादः ॥१॥ इदमादित्यस्यायनमिदं चन्द्रमसः । चत्वारीमानि चत्वारीमानि । तान्यष्टौ । अष्टाक्षरा गायत्री । गायत्रं साम ब्रह्म उ गायत्री । तदु ब्रह्माभिसम्पद्यते[1] । अष्टाशफाः पशवस्तेनो पशव्यम् ॥२॥ स यो ऽयम्पवते स[2] एष एव[2] प्रजापतिः । तद्वेव साम । तस्यायं देवो योऽयं चक्षुषि पुरुषः । स एष आहुतिमतिमत्योत्क्रान्तः ॥३॥ अथ यावेतौ चन्द्रमाश्चादित्यश्च यावेतावप्सु दृश्येते[3] एतावेतयोर्[4]देवौ ॥४॥ यद्ध वा इदमाहुर्देवानां देवा इत्येते ह ते । त एत आहुतिमतिमत्योत्क्रान्ताः ॥५॥ तद्ध पृथुर्वैन्यो दिव्यान्व्रात्यान्[5]पप्रच्छ येभि[6]र्वात इषितः प्रवाति ये ददन्ते पञ्च दिशस्[7]समीचीः । य आहुतीरत्य[8]मन्यन्त[9] देवा अपां[10] नेतारः कतमे त आसन्निति ॥६॥ ते ह प्रत्यूचु रिमामेषाम्पृथिवीं वस्त एकोऽन्तरिक्ष[11]म्पर्येको बभूव । दिवमेको ददते यो विधर्ता[12] विश्वा आशाः प्रतिरक्षन्त्यन्य[13] इति ॥७॥ इमामेषाम्पृथिवीं

१–पाद्र्–। २ नास्ति । ३–यते । ४ एता उ । ५ तान् । ६ पभिर् । ७ वशास्, दशा । ८–हंर् । ९ हत्यम्–। १० पराड् । ११–ईस्न्–। १२–धत्ता । १३ मन्य ।

वस्त एक इत्यग्निर्ह सः ॥८॥ अन्तरिक्षम्पर्येको बभूवेति वायुर्ह सः ॥९॥ दिवमेको ददते यो विधर्ताऽऽदित्यो ह सः ॥१०॥ विश्वा आशाः प्रतिरक्षन्त्यन्य इति । एता ह वै देवता विश्वा आशाः प्रतिरक्षन्ति चन्द्रमा नक्षत्राणीति । ता एतास्सामैव सन्तो व्यूढोऽन्वाख्याय ॥११॥ १ । ३४ ॥

एकादशोऽनुवाके द्वितीयः खण्डः । एकादशोऽनुवाकस्समाप्तः ।

———:०:———

अथैतत्साम । तदाहुस्संवत्सर एव सामेति ॥१॥ तस्य वसन्त एव हिङ्कारः । तस्मात्पशवो वसन्ता हिङ्कुरिक्रतस्समुदायन्ति ॥२॥ ग्रीष्मः प्रस्तावः । अनिरुक्तो वै प्रस्तावोऽनिरुक्त ऋतूनां ग्रीष्मः ॥३॥ वर्षा उद्गीथः । उदिव वै वर्षं गायति ॥४॥ शरत्प्रतिहारः । शरदि ह खलु वै भूयिष्ठा ओषधयः पच्यन्ते ॥५॥ हेमन्तो निधनम् । निधनकृता इव वै हेमन्प्रजा भवन्ति ॥६॥ तावेतावन्तौ संधत्तः । एतदन्वनन्तस्संवत्सरः । तस्यैतावन्तौ यद्धेमन्तश्च वसन्तश्च । एतदनु ग्रामस्यान्तौ समेतः । एतदनु निष्कस्यान्तौ समेतः । एतदन्वहिर्भोगान्पर्याहृत्यशये ॥७॥ तद्यथा ह वै निष्कस्समन्तं ग्रीवा अभिपर्यक्त

---

१४ विधर्त्ते, विधत्ते । १५ अन्नू–, 'न्नू–'–याया ।

१–करिङ्कुतस्,–करिक्रतस् । २ नास्ति । ३–तत् । ४ सवत्– । ५ अभी– । ६–यत्तः ।

एवमनन्तं साम । स य एवमेतदनन्तं साम वेदानन्ततामेव जयति ॥८॥ १।२५॥

द्वादशोऽनुवाके प्रथमः खण्डः ।

अथैतत्पर्जन्ये साम । तस्य पुरोवात एव हिङ्कारः । अथ यदभ्राणि सम्प्लावयति स प्रस्तावः। अथ यत् स्तनयति स उद्गीथः । अथ यद्विद्योतते स प्रतिहारः । अथ यद्वर्षति तन्निधनम् ॥१॥ तदेतत्पर्जन्ये साम । स य एवमेतत्पर्जन्ये साम वेद वर्षुको हास्मै पर्जन्यो भवति ॥२॥ अथैतत् पुरुषे साम । तस्यायमेव हिङ्कारोऽयम्प्रस्तावोऽयमुद्गीथोऽयम्प्रतिहार इदं निधनम् ॥३॥ तदेतत्पुरुषे साम । स य एवमेतत्पुरुषे साम वेदोऽऽर्ध्व एव प्रजया पशुभिरारोहन्नेति ॥४॥ य उ एनत्प्रसङ्वेद ये प्रसञ्चो लोकास्ताञ्जयति । तस्यायमेव हिङ्कारोऽयम्प्रस्तावोऽयमुद्गीथोऽयम्प्रतिहार इदं निधनम् । ये प्रसञ्चो लोकास्ताञ्जयति ॥५॥ य उ एनत्तिर्यग्वेद ये तिर्यञ्चो लोकास्ताञ्जयति । तस्य लोमैव हिङ्कारस्त्वक्प्रस्तावो मांसमुद्गीथोऽस्थि प्रतिहारो मज्जानिधनम् ॥६॥ तस्य त्रीण्याविर्गायति प्रस्तावम्प्रतिहारं

---

७ ऽनन्ताम् ।

१–षक–। २–थो। ३ प्रजा । ४–नं। ५ नास्ति । ६ एन, एनं । ७–ङ्ख–, 'म' अधिक है। ८ खाक–। ९ हिंकारं ॥

निधनम् । तस्मात्पुरुषस्य श्रीण्यस्थीन्याविर्दन्ताश्च द्वयाश्चनखाः ।
ये तिर्यञ्चो लोकास्ताञ्जयति ॥७॥ य उ एनत्संयग्वेद ये सम्यञ्चो
लोकास्ताञ्जयति । तस्य मन एव हिङ्कारो वाक्प्रस्तावः प्राण उद्गीथ-
श्चक्षुः प्रतिहार श्श्रोत्रं निधनम् । ये सम्यञ्चो लोकास्ताञ्जाति ॥८॥
अथैतद्देवतासु साम । तस्य वायुरेव हिङ्कारोऽग्निः प्रस्ताव आदित्य
उद्गीथश्चन्द्रमा प्रतिहारो दिश एव निधनम् ॥९॥ तदेतद्देवतासु साम ।
स य एवमेतद्देवतासु साम वेद देवतानामेव सलोकतां जयति ॥१०॥
१।३६॥

द्वादशेऽनुवाके द्वितीयः खण्डः ।

तस्यैतास्तिस्त्र आगा आग्नेय्यैकैन्द्र्येका वैश्वदेव्येका ॥१॥ सा या
मन्द्रा साऽऽग्नेयी । तया प्रातस्सवनस्योद्गेयम् । आग्नेयं वै प्रातस्स-
वनमाग्नेयोऽयं लोकः। स्वयाऽऽगया प्रातस्सवनस्योऽद्गायत्यृध्नोतीमं
लोकम् ॥२॥ अथ या घोषिण्युपब्दिमती सैऽऽन्द्री । तया माध्य-
न्दिनस्य सवनस्योद्गेयम् । ऐन्द्रं वै माध्यन्दिनं सवन मैन्द्रोऽसौ
लोकः । स्वयाऽऽगया माध्यन्दिनस्य सवनस्योद्गायत्यृध्नोत्यमुंलोकम्
॥३॥ अथ यां वीङ्ख्यन्निव प्रथयन्निव गायति सा वैश्वदेवी । तया

---

१ पेक्--। २ ऽऽन्द्र । ३ नास्ति, सा ··········· ऽद्र । ४ मनधी ।
५ नास्ति अथ ··········· लोकम् । ६--अन्द्री--के लिये स्थान खाली है।
७--ण्दिन । ८--तिऽमं । ९ या, ' घोषिण्यु ', भी लिखा है ।

तृतीयसवनस्योद्गेयम् । वैश्वदेवं वै तृतीयसवनं वैश्वदेवोऽयमन्तरालोकः । स्वयाऽऽगया तृतीयसवनस्योद्गायत्यृध्नोतीममन्तरालोकम्[10] ॥४॥ अथो उच्चा खल्वाहु रेकयैवाऽऽगयोद्गेयं यदेवास्य मध्यं वाच इति । तद्यया वै वाचा न्यायच्छमान उद्गायति तदेवास्यमध्यं वाचः । तया[11] वा एतया वाचा सर्वां वाच उपगच्छति । अभ्यासिक्तामेकस्थां श्रियमृध्नोति य एवं वेद ॥५॥ अथ या क्रौञ्चा सा बार्हस्पत्या । स यो ब्रह्मवर्चसकामस्स्यात्स[12] तयोद्गायेत् । तद्ब्रह्म वै बृहस्पतिः । तद्ध्रै ब्रह्मवर्चसमृध्नोति तथा ह ब्रह्मवर्चसीभवति ॥६॥ अथ ह चैकितानेय एकस्यैव साम्न आर्गा गायति गायत्रस्यैव । तदनवानं गेयम्[13] । तत्[14] साम्न एवा प्रतिहारादनवानं गेयम् । तत्प्राणो वै गायत्रम् । तद्ध्रै प्राणमृध्नोति । तथा ह सर्वमायुरेति ॥७॥ १।३७॥

द्वादशेऽनुवाके तृतीयः खण्डः ।

अथ ह ब्रह्मदत्तं[1] चैकितानेयमुद्गायन्तं कुरव उपोदुरुज्जिहीहि[2] साम दाल्भ्येऽति ॥१॥ स होऽपोद्यमानो नितरां जगौ । तं होचुः किमुपोद्यमानो नितरामगासीरिति ॥२॥ स होवाचेदं वै लोमे[3]रखे-

---

१०–यन्ति । ११ ताया । १२ स्र, नास्ति । १३ 'वै गायत्रम्' नीचे से ले के अधिक लिखा है । १४ 'साम्नस्' अधिक है ॥

१ तश् । २ उज्जिहि । ३ सोमे ।

तदेवैतन्मृत्युपस्थरणमः[४] । तस्मादु ये न एतदुपावादिषु[५]र्लोमशानीऽव तेषां श्मशानानि भवितारः । अथ वयमुदेव[६] गातारस्स्म इति ॥३॥ अथ ह राजा जैवलिर्गल्नुनसमा[७]र्त्ताकायणं शामूल पर्णाभ्यामुत्स्थितम्पप्र-च्छर्चा[८]ऽऽगाता शालावत्या३ साम्ना३ इति ॥४॥ नैव राजन्नृचेति होवाच न साम्नेऽति । तद्यूयं तर्हि सर्व एव पर्णाग्र्या[९] भविष्यथ य एवं विद्वाँसोऽगायतेति ॥५॥ अथ यद्धाऽवन्त्यदृचा च साम्ना चाऽऽगामे[१०]-ति धीतेन वै तद्या तथाम्नाऽमलाकाण्डेनाऽऽगातेऽति हैनाँस्तदवन्त्यत् । तद्ध तदुवाच स्वरेण चैव हिङ्कारेण चाऽऽगामेति ॥६॥ १।३८॥

द्वादशोऽनुवाके चतुर्थः खण्डः ।

अथ ह सत्याधिवाकश्चैत्ररथिस्सत्ययज्ञम्पौलुषितमुवाच प्राचीन-योग्येति मम चेद्वै[१] त्वं साम विद्वान् साम्नाऽऽर्त्विज्यं करिष्यसि नैव तर्हि पुनर्दीक्षामभिध्यातासीति । मुहुर्दीक्षी[२] ह्यास[३] ॥१॥ स होवाच यो वै साम्नश्श्रियं विद्वान्साम्नाऽऽर्त्विज्यं करोति श्रीमानेव भवति । मनो वाव साम्नश्श्रीरिति ॥२॥ यो वै साम्नः प्रतिष्ठां विद्वान्साम्ना-ऽऽर्त्विज्यं करोति प्रत्येव तिष्ठति । वाग्वाव साम्नः प्रतिष्ठेति ॥३॥

४–उपाश्र– । ५–धुख । ६–तार । ७ गल्नूनसम, गुल्विनसम । ८–र्च । ९ पर्णाग्र्यो । १० च आगामे ॥

१ मम् । २–क्षी । ३ ग्रा ।

यो वै साम्नस्सुवर्णं विद्वान् साम्नाऽऽर्त्विज्यं करोत्यध्यस्य गृहे सुवर्णं गम्यते । प्राणो वाव साम्नस्सुवर्णमिति ॥४॥ यो वै साम्नोऽपचितिं विद्वान्साम्नाऽऽर्त्विज्यं करोत्यपचितिमानेव भवति । चक्षुर्वाव साम्नोऽपचितिरिति ॥५॥ यो वै साम्नश्श्रुतिं विद्वान्साम्नाऽऽर्त्विज्यं करोति श्रुतिमानेव भवति । श्रोत्रं वाव साम्नश्श्रुतिरिति ॥६॥ १।३८॥

द्वादशोऽनुवाके पञ्चमः खण्डः । द्वादशोऽनुवाकस्समाप्तः ।

:०:

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्तीऽति ॥ १ ॥

वागेव साम । वाचा हि साम गायति । वागेवोऽक्थम् । वाचा ह्युक्थं शंसति । वागेव यजुः । वाचा हि यजुरनुस्तेते ॥२॥ कच्चित्किंचाऽर्वाचीनम्ब्रह्मणस्तद्वागेव सर्वम् । अथ यदन्यत्र ब्रह्मोपदिश्यते । नैव हि तेनाऽऽर्त्विज्यं करोति । परोक्षेणैव तु कृतम्भवति ॥३॥

४-ह्रो ।

१-ह्यानि । २-हितानी । ३ नास्ति । ४-क्रु- । ५ यार्च । ६ ने । ७ नास्ति ।

तस्या एतस्यै वाचो मनः पादश्चक्षुः पादश्श्रोत्रम्पादो वागेव चतुर्थः[8]
पादः[9] ॥४॥ तद्यद्वै मनसा ध्यायति तद्वाचा वदति। यच्चक्षुषा पश्यति
तद्वाचा वदति। यच्छ्रोत्रेण शृणोति[10] तद्वाचा वदति ॥५॥ तद्यदे-
तत्सर्वं वाचमेवाऽभिसमयति[11] तस्माद्वागेव साम। स ह वै सामवित्स
साम वेद य एवं वेद ॥६॥ तस्या एतस्यै वाचः प्राणा[12] एवाऽसुः।
एषु हीदं सर्वमसूतेति[13] ॥७॥ १।४०॥

त्रयोदशेऽनुवाके प्रथमः खण्डः।

तेन हैतेनाऽसुना देवा जीवन्ति[1] पितरो जीवन्ति मनुष्या जी-
वन्ति पशवो जीवन्ति गन्धर्वाप्सरसो जीवन्ति सर्वमिदं जीवति ॥१॥
तदाहुर्यदसुनेदं[2] [3] सर्वं[4] जीवति कस्साम्नोऽसुरिति। प्राण इति ब्रूयात्।
प्राणो ह वाव साम्नोऽसुः ॥२॥ स एष प्राणो वाचि प्रतिष्ठितो वागु
प्राणे प्रतिष्ठिता। तावेतावेवमन्यो[5]ऽन्यस्मिन्प्रतिष्ठितौ[6]। प्रतितिष्ठति[7]
य एवं वेद ॥३॥ तदेतदृचाऽभ्यनूच्यते—

---

८ 'चतुर्थः' अधिक है। ९ स्वादू। १० शृणोति। ११ ऽहिसम-न।
१२-णा। १३ 'असूते' के परे 'एषु हीऽदं सर्वं सूतेऽति' सब में
लिखा है (नास्ति 'ति) ॥

१-न्तीऽति। २ यदा। ३ येने। ४ 'इदं' अधिक है। ५-ये।
६ मन्यस्-न ७ प्रतिष्ठितः।

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥ इति ॥४॥

अदितिर्द्यौरदितिरन्तरिक्षमिति। एषा वै द्यौरेषाऽन्तरिक्षम् ॥५॥ अदितिर्माता स पिता स पुत्र इति। एषा वै मातैषा पितैषा पुत्रः ॥६॥ विश्वेदेवा अदितिः पञ्चजना इति। येदेवा असुरेभ्यः पूर्वे पञ्चजना आसन् य एवासावादित्ये पुरुषो यश्चन्द्रमसि यो विद्युति योऽप्सु योऽयमक्ष्णन्तरेष एव ते। तदेषैव ॥७॥ अदितिर्जातमदितिर्जनित्वमिति। एषा ह्येव जातमेषा जनित्वम् ॥८॥१॥४१॥

त्रयोदशोऽनुवाके द्वितीयः खण्डः। त्रयोदशोऽनुवाकस्समाप्तः।

आरुणिर्ह वासिष्ठं चैकितानेयम्ब्रह्मचर्यमुपेयाय। तं होवाचाऽऽजानासि सौम्य गौतम यदिदं वयं चैकितानेयास्सामैवोपास्महे। कां त्वं देवतामुपास्स इति। सामैव भगवन्त इति होवाच ॥१॥ तं ह पप्रच्छ यदग्नौ तद्वेत्था३ इति। ज्योतिर्वा एतत्तस्य साम्नो यद्वयं

८—रीक्ष—। ६ नास्ति, अदितिर्माता······अदितिरन्तरिक्षम्। १०—च्चँ। ११—द्यो। १२—वैर्। १३—षम। १४ इतिर्, इति॥
१ (वाचा) आज। २ यं। ३—माह—इति। ४—स नहीं। ५—वत। ६ ता ६

सामोऽपास्मह इति[७] ॥२॥ यत्पृथिव्यां तद्वेस्था३ इति । प्रतिष्ठा वा एषा तस्य साम्नो यद्वयं सामोपास्मह इति ॥३॥ यदप्सु तद्वेस्था३ इति । शान्तिर्वा एषा तस्य[८] साम्नो यद्वयं सामोपास्मह इति ॥४॥ [९]यदन्तरिक्षे तद्वेस्था३ इति । आत्मा वा एष तस्य साम्नो यद्वयं सामोपास्मह इति ॥५॥ यद्वायौ तद्वेस्था३ इति । श्रीर्वा एषा तस्य साम्नो यद्वयं सामोऽपास्मह इति ॥६॥ यदिक्षु तद्वेस्था३ इति । व्याप्तिर्वा एषा तस्य साम्नो[१०] यद्वयं सामोपास्मह इति[११] ॥७॥ यद्दिवि तद्वेस्था३ इति । विभूतिर्वा[१२] एषा तस्य साम्नो यद् वयं सामोपा-स्मह[१२] इति ॥८॥ १।४२॥

चतुर्दशोऽनुवाके प्रथमः खण्डः ।

यदादित्ये तद्वेस्था३ इति । तेजो वा एतत्तस्य[१] साम्नो यद्वयं सामोपास्मह इति ॥१॥ यच्चन्द्रमसि तद्वेस्था३ इति । भा वा एषा[१] तस्य साम्नो यद्वयं सामोपास्मह इति ॥२॥ यन्नक्षत्रेषु तद्वेस्था३ इति । प्रज्ञा[२] वा एषा तस्य[१] साम्नो यद्वयं सामोपास्मह इति ॥३॥ यदन्ने तद्वेस्था३ इति । रेतो वा एतत्तस्य[३][१] साम्नो यद्वयं सामोपास्मह

---

७ हाशिया पर लिखा है । ८ एतस्य । ९ नास्ति यद्......इति । १० नास्ति साम्नो.........ऽप । ११—हा । १२ नास्ति य......स्मह ॥

१ नास्ति । २ प्रजा । ३ नास्ति, 'एतत्' में 'तत्' ।

इति ॥४॥ यत्[4]पशुषु तद्वेत्था३ इति । यशो वा एतत्तस्य साम्नो यद्वयं सामोपास्महे इति ॥५॥ यदृचि तद्वेत्था३ इति । स्तोमो[5] वा एष तस्य[6] साम्नो यद्वयं सामोपास्महे इति ॥६॥ यद्यजुषि तद्वेत्था३ इति । कर्म वा एतत्तस्य[6] साम्नो यद्वयं सामोपास्महे इति ॥७॥ अथ किं उपास्स[7] इति । अक्षरमिति । कतमत्तदक्षरमिति । यत्क्षरन्नाऽक्षीयतेति । कतमत्तत्[8] क्षरन्ना[9]ऽक्षीयतेति । इन्द्र इति ॥८॥ कतमस्स इन्द्र इति । योऽक्ष[10]न्त्र[11]मत इति । कतमस्स[12] यो[13]ऽक्षन्त्रमत इति । इयं देवतेति होऽवाच ॥९॥ योऽयं चक्षु[14]षि पुरुष एष इन्द्र एष प्रजापतिः । (स) समः पृथिव्या सम आकाशेन समोदिवा समस्सर्वेण भूतेन । एष परो दिवो दीप्यते[15] । एष एवेदं सर्वमित्युपासित[16]व्यः ॥१०॥ स य एवमेवं वेद ज्योतिष्मान् प्रतिष्ठावान्कान्तिमानात्मवाञ्छ्रीमान् व्याप्तिमान् विभूतिमांस्तेजस्वी[17] भावान् प्रज्ञावान्तेजस्वी यशस्वी स्तोम[18]वान् कर्मवानक्षरवानिन्द्रियवान् सामन्वीभवति ॥११॥ तद्वे[19]तदृचाऽभ्यनूच्यते ॥१२॥ १।४३॥

चतुर्दशमेऽनुवाके द्वितीयः खण्डः ।

---

४ नास्ति । ५ वो । ६ स्ते- । ७.......'स्स' के लिये स्थान छोड़ा है । ८-द् । ९ अक्षरैं । १०-च । ११ इन्द्रमत् । १२ सो । १३ नास्ति । १४-ई । १५ दिव्य- । १६-सीतव्यं । १७-वी । १८ स्तोमान् । १९ उद् ॥

रूपं-रूपम्प्रति रूपोबभूव तदस्य रूपम्प्रतिचक्षणाय।
इन्द्रोमायाभिःपुरुरूप ईयते युक्ता ह्यस्य हरयश्शतादश॥

इति ॥१॥ रूपं-रूपम्प्रतिरूपो बभूवेति । रूपं-रूपं ह्येष प्रतिरूपो बभूव ॥२॥ तदस्य रूपम्प्रतिचक्षणायेति । प्रतिचक्षणाय ह्याऽस्यैतद्रूपम ॥३॥ इन्द्रो मायाभिः पुरुरूप ईयत इति । मायाभिर्ह्येष एतत्पुरु रूप ईयते ॥४॥ युक्ता ह्यस्य हरयश्शता दशेति । सहस्रं हैत आदित्यस्य रश्मयः । तेऽस्य युक्तास्तैरिदं सर्वं हरति । तद्यदेतैरिदं सर्वं हरति तस्माद्धरयः ॥५॥ रूपं रूपम्मघवा बोभवीति

मायाः कृण्वानः परितन्वं स्वाम् । त्रिर्यद्दिवः परि मुहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावेति ॥६॥

रूपं-रूपम्मघवा बोभवीतीति । रूपं-रूपं ह्येष मघवा बोभवीति ॥७॥ मायाः कृण्वानः परि तन्वं स्वामिति । मायाभिर्ह्येष एतत्स्वां तनुं गोपायति ॥८॥ त्रिर्यद्दिवः परिमुहूर्तमागादिति । त्रिर्ह वा एष एतस्य मुहूर्तस्येमाम्पृथिवीं समन्तः पर्येतीमाः प्रजास्संचक्षाणः ॥९॥ स्वैर्मन्त्रैरनृतुपा ऋतावेति । अनृतुपा ह्येष एतदृतावा ॥१०॥१।४४

चतुर्दशेऽनुवाके तृतीयः खण्डः ।

---

१ पुरुरूप इप, पुरुरूपं । २ रम्यते । ३—णा । ४—पम । ५—पम । ६ रमीयते । ७ नास्ति, हरयश्श......तेऽस्य । ८ 'म' अधिक है । ९ मुहूर्—१० नास्ति, इति । ११ पुनः लिखा है 'रूपंरूपं'......वीत्तीऽति (!) । १२ कृष्णा । १३—भि । १४ स्वा । १५ नास्ति । १६ प्रति । १७ नृत्त— । १८ ऋता ॥

तद्ध पृथुर्वैन्यो दिव्यान्व्रात्यान्पप्रच्छ—

इन्द्रमुक्थमृचमुद्गीथमाहुर्ब्रह्म साम प्राणं व्यानम् ।
मनो वा चक्षुरपानमाहुश्श्रोत्रं श्रोत्रिया बहुधावदन्तीति ॥१॥ ते प्रत्यूचुः—

ऋषय एते मन्त्रकृतः पुराजाः पुनराजायन्ते वेदानां गुप्त्यैकम् ।
ते वै विद्वांसो वैन्य तद्वदन्ति समानम्पुरुषम्बहुधा निविष्टम्, इति ॥२॥

इमां ह वा तद्देवतां त्रय्यां विद्यायामिमां समानामभ्येक आपयन्ति नैके । यो ह वावैतदेवं वेद स एवैतां देवतां सम्प्रति वेद ॥३॥ स एष इन्द्र उद्गीथः । स यदैष इन्द्र उद्गीथ आगच्छति नैवोद्गातुश्चोपगातॄणां च विज्ञायते । इत एवोऽऽर्ध्वस्स्वरुदेति । स उपरि मूर्ध्नो लेलायति ॥४॥ स विद्यादगमदिन्द्रो नेह कश्चन पाप्मा न्यङ्गः परिशेक्ष्यत इति । तस्मिन् ह न कश्चन पाप्मा न्यङ्गः परिशिष्यते ॥५॥ तदेतदभ्रातृव्यं साम । न ह वा इन्द्रः कंचन भ्रातृव्यम्पश्यते । स यथेन्द्रो न कंचन भ्रातृव्यम्पश्यत एवमेव न कंचन भ्रातृव्यम्पश्यते य एतदेवं वेदाथो यस्यैवं विद्वानुद्गायति ॥६॥१४५॥

चतुर्दशोऽनुवाके चतुर्थः खण्डः । चतुर्दशोऽनुवाकस्समाप्तः ।

———:o:———

१–इदम । २ नो । ३ त्रय्यां, तृय्यां । ४ ईमां । ५–नी । ६ न्य । ७ हवै । ८ य वै । ९–त्तन्– । १० 'ति' अधिककरो । ११ ध्वां । १२ स्वर । १३ परिषे–।

प्रजापतिर्वा वेद अग्र आसीत्। सोऽकामयत बहुस्स्याम्प्रजायेय भूमानं गच्छेयमिति ॥१॥ स षोडशधाऽऽत्मानं व्यकुरुत भद्रं च समाप्तिश्चाऽऽभूतिश्च[1] सम्भूतिश्च भूतं च सर्वं च रूपं चाऽपरिमितं च श्रीश्च यशश्च नाम चाऽग्रं च सजाताश्च पयश्च महीया[2] च रसश्च ॥२॥ तद्यद्भद्रं हृदयमस्य तत् । ततस्संवत्सरमसृजत । तदस्य संवत्सरोऽनूपतिष्ठते[3] ॥३॥ समाप्तिः कर्मास्य तत् । कर्मणा हि समाप्नोति । तत ऋतूनसृजत । तदस्यर्तवोऽनूपतिष्ठन्ते ॥४॥ आभूतिरन्नमस्य[4] तत्[5] । (तच्) चतुर्धा[6] भवति । ततो मासानर्धमासानहोरात्राण्युषसोऽसृजत। तदस्य मासा अर्धमासा अहोरात्राण्युषसोऽनूपतिष्ठन्ते ॥५॥ सम्भूती[7] रेतोऽस्य तद्[8]। रेतसो हि सम्भवति ॥६॥ १।४६॥

पञ्चदशोऽनुवाके प्रथमः खण्डः ।

ततश्चन्द्रमसमसृजत । तदस्य चन्द्रमा अनूपतिष्ठते ।तस्मात्स रेतसः प्रतिरूपः ॥१॥ भूतम्[1]प्राणोऽस्य[2] सः । ततो वायुमसृजत । तदस्य वायुरनूपतिष्ठते॥२॥ सर्वमपानोऽस्य सः। ततः पशूनसृजत । तदस्य पशवोऽनूपतिष्ठन्ते[3] ॥३॥ रूपं व्यानोऽस्य सः । ततः प्रजा

१ चे। २—याँ । ३—मन्ते । ४ 'त' अधिक है । ५ तद् । नास्ति । ६ चतुर्धा, धर्धा । ७—ति,—ता, त ।

१—त । २—णा । ३ रूपशवो ।

असृजत। तदस्य प्रजा अनूपतिष्ठन्ते। तस्मादासु प्रजासु रूपाण्य-
धिगम्यन्ते[४] ॥४॥ अपरिमितम्मनोऽस्य तत्। ततो दिशोऽसृजत।
तदस्य दिशोऽनूपतिष्ठन्ते। तस्मात्ता अपरिमिताः। अपरिमितमिव हि
मनः ॥५॥ श्रीर्वागस्य सा। ततस्समुद्रमसृजत। तदस्य समुद्रो-
ऽनूपतिष्ठते ॥६॥ यशस्तपोऽस्य तत्। ततोऽग्निमसृजत। तदस्या[६]-[७]
ऽग्निरनूपतिष्ठते। तस्मात्स मथितादिव[८] सन्तप्तादिव जायते ॥७॥
नाम चक्षुरस्य तत् ॥८॥ १।४७॥

पञ्चदशोऽनुवाके द्वितीयः खण्डः।

तत आदित्यमसृजत। तदस्यादित्योऽनूपतिष्ठते ॥१॥ अग्र-
म्मूर्धास्य सः। ततो दिवमसृजत। तदस्य द्यौरनूपतिष्ठते ॥२॥
सजाता अङ्गान्यस्य[१] तानि[२]। अङ्गैर्हि[३] सह जायते। ततो वनस्पती-
नसृजत। तदस्य वनस्पतयोऽनूपतिष्ठन्ते ॥३॥ पयो[४] लोमान्यस्य
तानि। तत ओषधीरसृजत। तदस्यौषधयोऽनूपतिष्ठन्ते ॥४॥ महीया[५]
मांसान्यस्य तानि। मांसैर्हि[६] सह महीयते। ततो वयांस्यसृजत।
तदस्य वयांस्यनूपतिष्ठन्ते। तस्मात्तानि प्रपतिष्णूनि। प्रपतिष्णूनी-

---

४–यते। ५ नास्ति, ततो⋯⋯⋯तस्मात्। ६ नाति। ७ तस्या।
८ मथितामिव, मथितिलाद् ॥

१ अंगान्य, अंगहान्य, अङ्गंस्य्। २ ता। ३ गैर्। ४ नास्ति,
पयो⋯⋯⋯अनूपतिष्ठन्ते। ५ मभिया, महिया। ६ न ॥

ऽव महामाँसानि[7] ॥५॥ रसो मज्जाऽस्य[8] सः । ततः पृथिवीमसृजत ।
तदस्य पृथिव्यनूपतिष्ठते[9] ॥६॥ स हैवं षोडशधाऽऽत्मानं विकृत्य
सार्धं समैत् । तद्यत्सार्धं समैतत्[10] तत्साम्नस्सामत्वम् ॥७॥ स एवैष
हिरण्मयः पुरुष उदतिष्ठत्प्रजानां जनिता[11] ॥८॥ १४८॥

पञ्चदशोऽनुवाके तृतीयः खण्डः ।

देवासुरा अस्पर्धन्त । ते देवाःप्रजापतिमुपाधावाञ्जयामाऽसु-
रानिति ॥१॥ सोऽब्रवीन्न वै मां यूयं वित्थ[1] नाऽसुराः । यद्वै मां यूयं
विद्यात[2] ततो वै यूयमेव स्यात पराऽसुराभवेयुरिति ॥२॥ तद्वै
ब्रूहीत्यब्रुवन्[3] । सोऽब्रवीत्पुरुषः प्रजापतिस्सामेति मोऽपाद्ध्वम् ।
ततो वै यूयमेव भविष्यथ पराऽसुरा भविष्यन्तीति ॥३॥ तम्पुरुषः
प्रजापतिस्सामेऽत्युपासत । ततो वै देवा अभवन् पराऽसुराः । स
यो हैवं विद्वान्पुरुषः प्रजापतिस्सामेऽत्युपास्ते भवत्यात्मना पराऽस्य
द्विषन् भ्रातृव्यो भवति ॥४॥ १४९॥

पञ्चदशोऽनुवाके चतुर्थः खण्डः । पञ्चदशोऽनुवाकस्समाप्तः ।

---

७ महीम्न- ८ मज्ज्या । ९-न्ते । १० समैत्; तत्पश्चात्,
'तद्यत्सार्धं समैतत्' (!) पुनः है । ११ जयिता ॥

१ वत्थ । २-र्यात । ३-हिं, ॥

देवा वै विजिग्याना[1] अब्रुवन्द्वितीयं करवामहै । माऽद्वितीया भूमेति । तेऽब्रुवन सामैव[2] द्वितीयं करवामहै । सामैव नो द्वितीय-मस्त्विति ॥१॥ त इमे द्यावापृथिवी अब्रुवन् समेतं साम प्रजनयत-मिति ॥२॥ सो[3]ऽसावस्या अबीभत्स[4]त । सो[3]ऽब्रवीद्बहु वा एतस्यां किं च किं च कुर्वन्त्यधिष्ठी[5]वन्त्यधिचरन्त्यध्यासते । पुनीतन्वेनामपूता वा इति ॥३॥ ते गाथामब्रुन्त्वया पुनामेति । किं ततस्स्यादिति । शतसनि[6]स्स्या इति । तथेति । ते गाथयाऽपुनन् । तस्मादुत गाथया शतं सुनोति ॥४॥ ते कुम्भ्यामब्रुवन् त्वया पुनामेति । किं तत-स्स्यादिति । शतसनिस्स्या इति । तथेति । ते कुम्भ्यया[7]-ऽपुनन् । तस्मादुत कुम्भ्यया[7] शतं सुनो[8]ति ॥५॥ ते[9] नाराशँसीमब्रु-वन् त्वया पुनामेति । किं ततस्स्यादिति । शतसनिस्स्या[10] इति । तथेति । ते नाराशँस्याऽपुनन् । तस्मादुत नाराशँस्या शतं सुनोति ॥६॥ ते रैभी[11]मब्रुवन् त्वया पुनामेति । किं ततस्स्या[12]दिति । शतस-निस्स्या[10] इति । तथेति । ते रैभ्याऽपुनन् । तस्मादुत रैभ्या शतं

---

१. विजिज्ञाना । २ वा । ३ सा । ४ प्रबीद्दत्– । ५–ष्ठिव– । ६–नि,–नी । ७–म्य– । ८ '५' पुनः । लिखा है । ९ तेन । १० शतनी । ११–भिम्र । १२ त ॥

सुनोति ॥७॥ सेयम्पूता । अथाऽमुमब्रवीद्बहु वै किं च किं च पुमाँश्चरति । त्वमनुपुनीष्वेति ॥८॥ १।५०॥

षोडशोऽनुवाके प्रथमः खण्डः ।

स ऐलवेनाऽपुनीत । पूतानि ह वा अस्य सामानि पूता ऋचः पूतानि यजूँषि पूतमनूक्तम्पूतं सर्वम्भवति य एवं वेद ॥१॥ ते समेत्य साम प्राजनयताम् । तद्यत्समेत्य साम प्राजनयतां तत्सा-म्नस्सामत्वम् ॥२॥ तदिदं साम सृष्टमद उत्क्रम्य लेलायदातिष्ठत् । तस्य सर्वे देवा ममत्विन आसन्मम ममेति ॥३॥ तेऽब्रुवन्वीद-म्भजामहा इति । तस्य विभागे न समपादयन् । तान्प्रजापतिर-ब्रवीद्पेत । मम वा एतत् । अहमेव वो विभक्ष्यामीति ॥४॥ सोऽग्निमब्रवीत्त्वं वै मे ज्येष्ठः पुत्राणामसि । त्वम्प्रथमो वृणीष्वेति ॥५॥ सोऽब्रवीन्मन्द्रं साम्नो वृणेऽन्नाद्यमिति । स य एतद्गायाद-न्नाद एव सोऽसन्मामु स देवानामृच्छाद्य एवं विद्वाँसमेतद्गायन्त-मुपवदादिति ॥६॥ अथेन्द्रमब्रवीत्त्वमनुवृणीष्वेति ॥७॥ सोऽब्र-

---

१३ तम ।

१–लव–। ऐलवैनां । २–वाम । ३ प्रेज्–। ४–ग्रत । ५ मे । ६ 'षोडस' के लिये स्थान खाली है, वीदां । ७ भविष्य–। ८ श्रियम । ९ गायत्राच् । १० ह्रीमान् । ११ अथ । १२ सोमम ।

१/न
13067

वीदुग्रं[13] साम्नो वृणे[14] श्रियमिति । स[15] य एतद्गायाच्छ्रीमानेव[16] सोऽस-
न्मामु स देवानामृच्छाद्य एवं विद्वाँसमेतद्गायन्तमुपवदादिति ॥८॥
अथ सोममब्रवीत्त्वमनुवृणीश्वेति ॥९॥ सोऽब्रवीद्वल्गु[15] साम्नो वृणे
प्रियमिति । स य एतद्गायात्प्रिय एव स कीर्तेः प्रियश्चक्षुषः प्रिय-
स्सर्वेषामसन् मामु स देवानामृच्छाद्य एवं विद्वाँसमेतद्गायन्तमुप-
वदादिति ॥१०॥ अथ बृहस्पतिमब्रवीत्त्वमनुवृणीष्वेति[17][18] ॥११॥
सोऽब्रवीत्क्रौञ्चं साम्नो वृणे ब्रह्मवर्चसमिति । स य एतद्गायाद्ब्रह्म-
वर्चस्येव सोऽसन्मामु स देवानामृच्छाद्य एवं विद्वाँसमेतद्गायन्तमुप-
वदादिति ॥१२॥ ३।५१॥

षोडशोऽनुवाके द्वितीयः खण्डः ।

अथ विश्वान्देवानब्रवीद्यूयमनुवृणीध्वमिति ॥१॥ तेऽब्रुवन्वैश्व-
देवं साम्नो वृणीमहे प्रजननमिति । स य एतद्गायात्प्रजावानेव सोऽस-
दस्मानु[1] देवानामृच्छाद्य[2] एवं विद्वाँसमेतद्गायन्तमुपवदादिति ॥२॥
अथ पशूनब्रवीद्यूयमनुवृणीध्वमिति ॥३॥ तेऽब्रुवन्वायुर्वा अस्माक-
मीशे । स एव नो वरिष्यत[3] इति । ते वायुश्च पशवश्चाब्रुवन्निरुक्तं[4] साम्नो

---

१३ वल्गु । १४ प्रियम । १५ नास्ति, स य ...... सोऽब्रवीद् ९ में ।
१६ गायत्रच्च । १७ नास्ति । १८ नुवृ— ।

१ 'म' अधिक है । २ नीचे से 'च स वायु' अधिक लेता है ।
३ वरिष्ठ । ४ अनिर— ।

वृणीमहे पशव्यमिति। स य एतद्गायात्पशुमानेव सोऽसदस्मानु च
स वायुं[5] च देवानामृ[6]च्छाद्य एवं विद्वाँसमेतद्गायन्तमुपवदादिति॥४॥
अथ प्रजापतिरब्रवीदहमनुवरिष्य इति[7] ॥५॥ सोऽब्रवीदनिरुक्तं
साम्नो वृणे स्वर्ग्य[8]मिति। स य एतद्गायात्स्वर्गलोक एव सोऽसन्मासु[9]
स देवानामृ[6]च्छाद्य एवं विद्वाँसमेतद्गायन्तमुपवदादिति ॥६॥
अथ वरुणमब्रवीत्त्वमनुवृणीष्वेति ॥७॥ सोऽब्रवीद्यद्वो न कश्चना-
ऽव्रत तदहम्परिहरि[10]ष्य इति। किमिति। अपध्वान्तं[11] साम्नो वृणेऽपश-
व्यमिति। स य एतद्गायादपशुरेव[12] सोऽसन्मासु स देवानामृच्छाद्य[13]
एतद्गायादिति ॥८॥ तानि वा एतान्यष्टौ गीतागीतानि साम्नः।
इमान्यु ह वै सप्तगीतानि। अथेयमेव[14] वारुण्यागाऽगीता ॥९॥ स
यां[15] ह कां चैवं विद्वानेतासां सप्तानामागानां गायति गीतमेवास्य
भवत्येतानु कामा[16]न्राध्नोति[17] य एतासु कामाः। अथेमामेव वारुणी-
मागां न गायेत् ॥१०॥ ३५२॥

षोडशोऽनुवाके तृतीयः खण्डः। षोडशोऽनुवाकस्समाप्तः।

—:०:—

५–युग्। ६ 'इति' तक शेष नहीं लिखा। ७ ति। ८ स्वर्गम्।
९ समुत्। १०–हष्य्–क–, यत। ११ अपद्ध्मातम्, अपध्मातम्। १२
पशुा–। १३ अंच्छाद्। १४–ष, स्थ। १५–द्। १६ कामा। १७ मीरध्न–,
निर्भ्रंभेति॥

द्वयं वावेदमग्र आसीत्सच्चैवासच्च ॥१॥ तयोर्यत् सत् तत्साम तन्मनस्स प्राणः। अथ यदसत्सर्क[1] सा वाक् सोऽपानः ॥२॥ तद्यन्मनश्च प्राणश्च तत्समानम्। अथ या वाक् चापानश्च तत्समानम्। इदमायतनम्मनश्च प्राणश्चेदमायतनं[2] वाक् चापानश्च। तस्मात्पुमान्दक्षिणतो योषामुपशेते[3] ॥३॥ सेयमृगास्मिन् सामन्[4] मिथुनमैच्छत। तामपृच्छत् का त्वमसीति। साहमस्मीत्यब्रवीत्। अथ वा अहममोऽस्मीति ॥४॥ तद्यत्सा चाऽमश्चतत् सामाऽभवत् तत्साम्नस्सामत्वम् ॥५॥ तौ वै सम्भवावेति। नेत्यब्रवीत्स्वसा वै मम त्वमस्यन्यत्र मिथुनमिच्छस्वेति॥६॥साऽब्रवीन्न वै तं विन्दामि येन सम्भवेयम्[5]। त्वयैव सम्भवानीति। सा वै पुनीष्वेत्यब्रवीत्। अपूता वा असीति[6] ॥७॥ साऽपुनीत यदिदं विप्रा[7] वदन्ति तेन। साऽब्रवीत्त्वेदम्भविष्यतीति[8]। प्रत्यूहेत्यब्रवीत्। धीर्वा[9] एषा। प्रजानां जीवनं वा एतद्भविष्यतीति। तथेति। तत्प्रत्यौहत। तस्मादेषाधीरेव प्रजानां जीवनमेव ॥८॥ पुनीष्वेत्यब्रवीत्। साऽपुनीत गाथया साऽपुनीत कुम्भ्यया[10] साऽपुनीत नाराशँस्या साऽपुनीत पुराणेति-

---

१ म्यक-असम्यदग्र भवितेऽति, (असत्य) भवितेति। २-ना। ३ उपवशेते। ४-म। ५ सम्भवेत। यम्। ६ 'वा' अधिक है। ७ प्रा, विप्रा। ८ त्वे। ९ त्यत्र। १०-म्भ-, 'वा' अधिक है।

हासेम[11] साऽपुनीत यदिदमादाय[12] नाऽऽगायन्ति तेन ॥९॥ साऽब्र-
वीत्केदम्भविष्यतीति । प्रत्यूहेत्यब्रवीत् । धीर्वा एषा । प्रजानां
जीवनं वा एतद्भविष्यतीति । तथेति । तत्प्रत्यौहत् । तस्मादेषा
धीर्वेव प्रजानां जीवनम्वेव ॥१०॥ पुनीष्वैवेत्यब्रवीत् ॥११॥ १।५३॥

सप्तदशोऽनुवाके प्रथमः खण्डः ।

सा मधुनाऽपुनीत[1] । तस्मादुत ब्रह्मचारी मधु नाऽश्नीयाद्वेदस्य
पलाव[2] इति । कामं ह त्वाचार्यदत्तमश्नीयात् ॥१॥ अथर्क् सामा-
ब्रवीद्बहु वै किं च किं च पुमाँश्चरति । त्वमनुपुनीष्वेति । स
भरण्डकेष्णोनाऽपुनीत[3] । पूतानि ह वा अस्य सामानि पूता ऋचः
पूतानि यजूँषि पूतमनूक्तम्पूतं सर्वम्भवति य एवं वेद ॥२॥ ताभ्यां
सदो मिथुनाय पर्यश्रयन्[4] । तस्मादुपवसथीयां[5] रात्रिं सदसि[6] न
श्रयीत[7] । अत्र ह्येतावृक्सामे उपवसथीयां[8] रात्रिं सदसि सम्भवतः ।
स यथा श्रेय स उपद्रष्टैवं[9] हि शश्वदीश्वरोऽनुलब्धः[10] पराभवितोः
॥३॥ अथो आहुरुद्गातुर्मुखे सम्भवतः । उद्गातुरेव मुखं नेत्ते[11]-

---

११ इमम । १२ मादायना, आदायना ॥

१. सारे पद का पुनर्लेख है । २ स 'कामम' के स्थान में । मा सर्वत्र है । ३ हरुण्डकेष्णोना, भरण्ड, भरुण्डकोद्रणोना । ४—वन् । ५—धीयाम,—शीयाम । ६—ई । ७ यीत, येत । ८—ध— । ९ भद्र । १० नुनुलप, अनुनुलुप— ।

तेति ॥४॥ तदु ना आहुः काममेवोद्गातुर्मुखमीत्तेत। उपवसथीयामे-
वैतां रात्रिं सदसि न शयीत। अत्र ह्येवैतावृक्सामे उपवस्थीयां[12]
रात्रिं सदसि सम्भवत इति ॥५॥ तां सम्भविष्यन्नाहाऽमोऽहम-[13]
स्मि सा त्वं सा त्वमस्यमोऽहम्। सा मामनुव्रता भूत्वा प्रजाः प्रज-[14]
नयावहै। एहि सम्भवावहा इति ॥६॥ तां सम्भवन्नत्यारिच्यत[15][16]
सोऽब्रवीन्न वै त्वाऽनुभवामि। विराड् भूत्वा प्रजनयावेति।
तथेति ॥७॥ तौ विराड्भूत्वा प्राजनयताम्। हिङ्कारश्चाऽऽहावश्च[17]
प्रस्तावश्च प्रथमा चोद्गीथश्च मध्यमा च प्रतिहारश्चोत्तमा च निधनं
च षषट्कारश्चैवं विराड् भूत्वा प्राजनयताम्। ते अमुमजनयतां[18][19]
योऽसौ तपति। ते व्यद्रवताम् ॥८॥ १।५४॥[20]

सप्तदशोऽनुवाके द्वितीयः खण्डः।

मदध्यभूश्न्मदध्यभूश्दिति। तस्मादाहुर्मधुपुत्र इति ॥१॥[1]
तस्मादुतस्त्रियो मधु नाऽश्नन्ति पुत्राणामिदं व्रतं चराम इति वदन्तीः
॥२॥ तदयं तृचोऽनुदश्रयत। इयमेव गायत्र्यन्तरित्तं त्रिष्टुबसौ[2]
जगती। तस्यैतत्तृचः ॥३॥ स उपरिष्टात्सामाऽभ्याहितं तपति।[3]

---

११ न। १२–थी–। १३ 'रश' अधिक है। १४–प्र्–। १५ संभवत।
१६ आत्यरिच्यते। १७ हिं–। १८ ष। षवम्। १९ प्रंज्–।
२० व्यहप्ताम, भ्यहवताम, व्यहपताम (?)॥

१–आ। २ इदम्। ३–ईस्–।

सोऽध्रुव इवासीदलेलायदिव । स नोर्ध्वो[4]ऽतपत् ॥४॥ स देवानब्रवीदुन्मा गायतेति । किं ततस्स्यादिति । श्रियं वः प्रयच्छेयम् । मामिह हँहेतेति[5] ॥५॥ तथेति । तमुदगायन्[6] । तमेतदत्राऽदँहन्[7] । तेभ्यश्श्रियम्प्रायच्छत् । सैषा देवानां श्रीः ॥६॥ तत एतदूर्ध्वस्तपति । स नार्वाङ्तपत्[8] ॥७॥ स ऋषीनब्रवीदनु मा गायतेति । किं ततस्स्यादिति । श्रियं वः प्रयच्छेयम् । मामिहदँहेतेति ॥८॥ तथेति । तमन्वगायन् । तमेतदत्राऽदँहन् । तेभ्यश्श्रियम्प्रायच्छत् । सैषा ऋषीणां श्रीः ॥९॥ तत एतदर्वाङ् तपति । स न तिर्यङ्[9] ङतपत् ॥१०॥ स गन्धर्वाप्सरसोऽब्रवीदामा गायतेति । किं ततस्स्यादिति[10] । श्रियं वः प्रयच्छेयम् । मामिहदँहेतेति[5] ॥११॥ तथेति । तमागायन् । तमेतदत्राऽदँहन् । तेभ्यश्श्रियम्प्रायच्छत् । सैषा गन्धर्वाप्सरसां श्रीः ॥१२॥ तत एतत् तिर्यङ्[11] तपति ॥१३॥ तानि वा एतानि त्रीणि साम्न उद्गीतमनुगीतमागीतम् । तद्यथेदं वयमागायो[12]द्गायाम एतदुद्गीतम्[13] । अथ यद्यथागीतं तदनुगीतम् । अथ यत्किंचेति साम्नस्तदागीतम् । एतानि ह्येव त्रीणि साम्नः ॥१४॥ २।५५॥

सप्तदशेऽनुवाके तृतीयः खण्डः । सप्तदशोऽनुवाकस्समाप्तः ।

:o:

---

४ द्-,ध्- । ५ दुंहेते । ६ उदगात् । ७-हत् । ८ तप्- । ९ तिर्य्यंङ् । १० ल । ११ तिर्यँद । १२ आगयो, आगेयो- । १३-घम ॥

आपो वा इदमग्रे महत्सलिलमासीत्। स ऊर्मिरूर्मिमस्कन्दत्[1]। ततो हिरण्मयौ कुद्यौ[2] समभवतां ते[3] एवर्क्सामे[4] ॥१॥ सेयमृगिदं सामाऽभ्यप्लवत[5]। तामपृच्छत् का त्वमसीति। साहमस्मीत्यब्रवीत्। अथ वा अहममोऽस्मीति। तद्यत्सा चाऽमश्च तत्साम्नस्सामत्वम् ॥२॥ तौ वै सम्भवावेति। नेत्यब्रवीत्स्वसा वै मम त्वमसि। अन्यत्र मिथुनमिच्छस्वेति ॥३॥ सा पराप्लवत[6] मिथुनमिच्छमाना। सा समास्सहस्रं सप्ततीः पर्यप्लवत ॥४॥ तदेष श्लोकः—

स्त्री रैमिवाऽग्रे सञ्चरतीच्छन्ती[7] सलिले[8] पतिम्।
समास्सहस्रं सप्तती स्ततोऽजायत पश्यत, इति ॥५॥

असौ वा आदित्यः पश्यतः[9]। एष एव तदजायत[10]। एतेन हि पश्यति ॥६॥ साऽविक्त्वा[11] न्यप्लवत। साऽब्रवीन्न[12] वै तं विन्दामि येन सम्भवेयम्। त्वयैव सम्भवानीति ॥७॥ सा वै द्वितीयामिच्छस्वेत्यब्रवीन्न वै मैकोऽध्वंस्यसीति। सा द्वितीयां[13] विक्त्वा[14] न्यप्लवत ॥८॥ (तृतीयाम्) इच्छस्वैवेत्यब्रवीन्नो[14] वाव[15] मा[16] द्वे[17] उध्वंस्यथ इति। सा तृतीयां[13] विक्त्वा न्यप्लवत। सोऽब्रवीदत्र वै मोऽध्वंस्यथेति[18]

१–द। २ कुद्यौ। ३ येप। ४ कैसा–। ५ ह्यप्लु–। ६ पपरा–। ७ सप्तती। ८–ति। ९ पश्यः–। १० तम्। ११ पित्वा। १२ नास्ति सा..........न्यप्लवत। १३–यँम। १४ वै। १५ वा। १६ स्थान छोड़ा हुआ है, ध्वे। १७ अव– १८–स्यसी।

॥९॥ स यदेकयाऽग्रे समवदत[19] तस्मादेकर्चे साम। अथ यद्द्वे अपा-
सेधत्तस्माद्द्वयोर्न कुर्वन्ति। अथ यत् तिसृभि[20]स्समपादयत्[21] तस्मादु
तृचेसाम॥१०॥ ता अब्रवीत्पुनीध्वं न पूता वै स्थेति॥११॥ १।५६॥

अष्टादशेऽनुवाके प्रथमः खण्डः।

सा गायत्री गाथयाऽपुनीत नाराशँस्या[1]त्रिष्टुब्रैभ्या जगती।
भीमम्बत[2] मलमपावधिषतेति। तस्माद्भीमलाधियो वा एताः। धियो
वा इमा मलमपावधिषता[3]ति। तस्मादु भीमलाः। तस्मादु गायतां[4]
नाऽश्नीयात्[5]। मलेन ह्येते जीवन्ति॥१॥ अथर्क्[6] सामाऽब्रवीद्वहु वै
किं च किं च पुमाँश्चरति। त्वमनुपुनीष्वेति। स ऊर्ध्वगणेना-
ऽपुनीत॥२॥ पूतानि ह वा अस्य सामानि पूता[7] ऋचः पूतानि
यजूँषि पूतम[8]नूक्त[9]म्पूतं सर्वम्भवति य एवं वेद॥३॥ ताभ्यां
दिशो मिथुनाय पर्यौहन्। तां सम्भाविष्य[10]न्नह्वयता[11]ऽमोऽहमस्मि सा
त्वं[12] सा त्वमस्यमोऽहमिति॥४॥ तामेतदुभयतो[13] वाचाऽसरिच्यत[14]
हिङ्कारेण पुरस्तात्स्तोभेन मध्यतो निधनेनोपरिष्टात्। अतितिस्रो
ब्राह्मणायनीस्सदृशी रिच्यते य एवं वेद॥५॥ तयोर्यस्सम्भवतो-

१९—पदू—। २० तिस्र—। २१ सम्प्—॥

१—स्योत्। २ व। ३—थे। ४—ता। ५ ऽश्नी—। ६ र्क। ७—तानी।
८—ता। ९ नूक्—। १०—ष्यन्न्। ११ अवचयत, अह्वयन्त। १२ साम
१३—र्च। १४ स्यरूच्यते।

रूर्ध्वश्शृ[15]षोऽद्रवत् (प्राणास्) ते । ते प्राणा एवोर्ध्वा अद्रवन्[16] ॥६॥
सोऽसावादित्यस्स एष एव उदग्निरेव गी चन्द्रमा एव थम् ।
सामान्येव उद्दच एव गी यजूँष्येव थमित्यधिदेवतम् ॥७॥ अथा-
ऽध्यात्मम्[17] । प्राण एव उद्वागेव गी मन एव थम् । स एषोऽधिदेवतं
चाऽध्यात्मं चोद्गीथः[18] ॥८॥ स य एवमेतदधिदेवतं चाऽध्यात्मं
चोद्गीथं वेदैतेन हास्य सर्वेणो[19]द्गीतम्भवत्ये[20]तस्मादु एव सर्वस्मादा-
त्मच्यते य एवं विद्वाँसमुपवदति ॥६॥ १।५७॥

अष्टादशेऽनुवाके द्वितीयः खण्डः ।

तद्यदिदमाहुः क उदगासीरिति क एतमादित्यमगासी[1]रिति
ह वा एतत्पृच्छन्ति[2] ॥१॥ एतं ह वा एतं त्रय्या[3] विद्यया गायन्ति ।
यथा वीणागाथिनो[4] गापयेयुरेवम् ॥२॥ स एष हृदः[5] कामानाम्पूर्णो
यन्मनः । तस्यैषा कुल्या[6] यद्वाक्[7][8] ॥३॥ तद्यथा[9] वा अपो[10] हृदात्कु-
ल्ययोऽपरामुपनयन्त्ये[11]वमेवैतन्मनसोऽधि वाचोद्गाता यजमानम्[12]
यस्य कामान् प्रयच्छति ॥४॥ स य उद्गातारं दक्षिणाभि[13]राराधयति[14]

---

१५ च्छु–। १६ द्र–। १७ ऽद्धा–। १८ गीथ्–। १९–गीश्–।
२० भवत्येति, भवन्ति ॥

१–सी । २ प्रच्छँन्य् । ३ तृय्या । ४–गायिनो, गायय्–। ५ हृद्–।
६ कूल्–। ७ यत् । ८ वात् । ९–त्र । १० अदो । ११–यँन्य,–यन्ते,
–यन्त्य् । १२–ना । १३ दक्षिणोभि । १४ राध्–।

तं सा कुल्योऽ[६]पधावति । य उ एनं नाऽऽराधयति स उ तामपि-हन्ति ॥५॥ अथ वा अतः[१५] प्रत्तिश्चैव[१६] प्रतिग्रहश्च । तद्भूमामिति[१७] वै प्रदीयते । तद्वाचा यजमानाय प्रदेयम्मनसाऽऽत्मने[१८] । तथा ह सर्वं न प्रयच्छति ॥६॥ तद्यदिदं सम्भवतो रेतोऽसिच्यत[१९] तदशयत[२०] । यथा हिरण्यमविकृतं[२१] लेलायदेवम् ॥७॥ तस्य सर्वे देवा ममात्विन आसन्मम ममेति । तेऽब्रुवन्वीदं करवामहा इति । तेऽब्रुवञ्छ्रेयो[२२] वा इदमस्मत् । आत्मभिरेवैनाद्विकरवामहा इति ॥८॥ तदात्मभिरेव व्यकुर्वत । तेषां वायुरेव हिङ्कार आसाऽग्निः प्रस्ताव इन्द्र आदि-स्सोमबृहस्पती[२३] उद्गीथोऽश्विनौ प्रतिहारो विश्वे देवा उपद्रवः प्रजापतिरेव निधनम् ॥९॥ एता वै सर्वा देवता एता हिरण्यम्[२४] । अस्य सर्वाभिर्देवताभिस्स्तुतम्भवति य एवं वेद । एताभ्य उ एव स सर्वाभ्यो देवताभ्य आवृश्च्यते य एवं विद्वाँसमुपवदति ॥१०॥ ॥५८॥

अष्टादशेऽनुवाके तृतीयः खण्डः ।

अथ ह ब्रह्मदत्तश्चैकितानेयः कुरू[१]ञ्जगामाऽभिप्रतारिणं[२] काक्ष-सेनिम् । स हाऽस्मै मधुपर्कं ययाच ॥१॥ अथ हास्य वैप्रपद्य[३] पुरो-

---

१५ अधः । १६ प्रतिश् । १७ धुं- । १८ आत्- । १९ सिच्य्- । २० दश्- । २१ अपि-,अपितृतं । २२ या । २३ सोमाबृ-ह । २४ हिरण्य ॥

१ कू-, आरैन् । २ पक्ष में यहां हि समाप्ति है । ३-य ।

हितोऽन्ते निषसाद शौनकः । तं हाऽनामन्त्र्य[4] मधुपर्कम्पपौ ॥२॥
तं होवाच किं विद्वान्नो दाल्भ्याऽनामन्त्र्य मधुपर्कम्पिबसीति ।
सामवैर्यम्[5]प्रपद्येति होवाच ॥३॥ तं ह तत्रै[6]व पप्रच्छ यद्वा यौ
तद्वेत्था३इति । हिङ्कारो वा अस्य स इति ॥४॥ यदग्नौ तद्वेत्था३-
इति । प्रस्तावो वा अस्य स इति ॥५॥ यदिन्द्रे तद्वेत्था३इति ।
आदिर्वा अस्य स इति ॥६॥ यत्सोमबृहस्पत्योस्त[7]द्वेत्था३इति । उद्-
गीथो वा अस्य स इति ॥७॥ यदश्विनोस्तद्वेत्था३इति । प्रतिहारो
वा अस्य स इति ॥८॥ यद्विश्वेषु[8] देवेषु तद्वेत्था[9]३इति । उपद्रवो
वा अस्य स इति ॥९॥ यत्प्रजापतौ तद्वेत्था३इति । निधनं वा
अस्य तदिति होवाच । आर्षेयं वा अस्य तद्बन्धुता वा अस्य[10]
सेति ॥१०॥ स होवाच नमस्तेऽस्तु भगवो विद्वानपा मधुपर्कमिति
॥११॥ अथ हैवरः पप्रच्छ किं देवत्यं[11] सामवैर्यम्[12]प्रपद्येति । यदेवत्या-
सु स्तुवत इति होवाच तदेवत्यमिति ॥१२॥ तदेतत् साध्वेव
प्रत्युक्तम्[13] । व्याप्तिर्वा अस्यैषेति होवाच ब्रूह्येवेति । मेदं ते नमो-
ऽकर्मेति होवाच । मैव नोऽतिप्राप्सीरिति ॥१३॥ स होवाचाऽप्रच्छ्यं

४-मन्त्रः । ५ सामवैर्य्यं, 'र' रहित । ६ तत्र । ७ सोमाब्-।
८ 'द-' का पुनर्लेख । ९ नास्ति । १० अस्य । ११-वत्या ।
१२ सामवैर्य्या । १३-उत्तम ।

याव त्वा देवताममर्त्यं याव त्वा देवतायै देवताः । वाग्देवत्यं साम वाचो मनो देवता मनसः पशवः पशूनामोषधय ओषधीनामापः । तदेतदद्भ्यो[१४] जातं सामाऽप्सु प्रतिष्ठितमिति ॥१४॥ १५६॥

अष्टादशेऽनुवाके चतुर्थः खण्डः ।

देवासुरा अस्पर्धन्त । ते देवा मनसोदगायन्[१] । तदेषामसुरा अभिद्रुत्य[२] पाप्मना समसृजन्[३] । तस्माद्ध्रु किं च किं च मनसा ध्यायाति । पुण्यं चैनेन ध्यायाति पापं च ॥१॥ ते वाचोदगायन् । तां तथैवा[४]ऽकुर्वन्[५] । तस्माद्ध्रु किं च किं च वाचा वदति । सत्यं[६] चैनया[७] वदत्यनृतं च ॥२॥ ते चक्षुषोदगायन् । तत्तथैवाऽकुर्वन् तस्माद्ध्रु किं च किं च चक्षुषा पश्यति । दर्शनीयं चैनेन पश्यत्य दर्शनीयं च ॥३॥ ते श्रोत्रेणोदगायन् । तत्तथैवाऽकुर्वन् । तस्माद्ध्रु किं च[८] किं च[८] श्रोत्रेण शृणोति । श्रवणीयं चैनेन शृणोत्यश्रवणीयं च ॥४॥ तेऽपानेनोदगायन् । तं तथैवाऽकुर्वन् । तस्माद्ध्रु किं च किं चाऽपानेन जिघ्रति । सुरभि चैनेन जिघ्रति दुर्गन्धि च ॥५॥ ते प्राणेनोदगायन्[९] । अथासुरा आद्रवँस्तथा करिष्याम इति मन्यमानाः ॥६॥ स यथाऽश्मानमृत्वा लोष्टो विध्वँसेतैवमेवाऽसुरा

---

१४ भ्यो ।

१ ऽगाय् । २-द्रुत्य अथवा-द्रुत्य । ३-सृज् । ४ व । ५ कुर् । ६-त्य । ७ चै । ८ नास्ति । ९-गात् ।

व्यध्वँसन्त[10] । स एषोऽश्माऽऽखणो[11] यत्प्राणः ॥७॥ स यथाऽश्मान-

माखणमृत्वा[12] लोष्टो विध्वँसत एवमेव स विध्वँसते य एवं विद्वाँ-

समुपवदति ॥८॥ २।६०॥

अष्टादशोऽनुवाके पञ्चमः खण्डः । अष्टादशोऽनुवाकस्समाप्तः ।

[इति प्रथमोऽध्यायः ।]

———:o:———

---

१० सते, षन्ता । ११–र्णो । १२ आर्णम ।

[अथ द्वितीयोऽध्यायः ।]

देवानां वै षडुद्गातार आसन् वाक् च मनश्च चक्षुश्च श्रोत्रं चाऽपानश्च प्राणश्च ॥१॥ तेऽध्रियन्त तेनोद्गात्रा दीक्षामहै येनाऽपहत्य मृत्युमपहत्य पाप्मानं स्वर्गं लोकमियामेति ॥२॥ तेऽब्रुवन् वाचोद्गात्रा दीक्षामहा इति । ते वाचोद्गात्राऽदीक्षन्त । स यदेव वाचा वदति तदात्मन आगायदथ य इतरे कामास्तान्देवेभ्यः ॥३॥ ताम्[1]पाप्माऽन्वसृज्यत । स[2] यदेव वाचा पापं वदति स एव स पाप्मा ॥४॥ तेऽब्रुवन् न वै नोऽयम् मृत्युं[3] न पाप्मानमत्यवाक्षीत्। मनसोद्गात्रा दीक्षामहा इति ॥५॥ ते मनसोद्गात्राऽदीक्षन्त । स यदेव मनसा ध्यायति तदात्मन आगायदथ य इतरे कामास्तान्देवेभ्यः ॥६॥ तत्पाप्माऽन्वसृज्यत । स यदेव मनसा पापं ध्यायति स एव स पाप्मा ॥७॥ तेऽब्रुवन्[4] नो न्वाव[5] नोऽयम् मृत्युं[3] न पाप्मानमत्यवाक्षीत्[6] । चक्षुषोद्गात्रा दीक्षामहा इति ॥८॥ ते चक्षुषोद्गात्राऽदीक्षन्त । स यदेव चक्षुषा पश्यति तदात्मन[7] आगायदथ य इतरे कामास्तान्देवेभ्यः ॥९॥ तत्पाप्माऽन्वसृज्यत । स यदेव चक्षुषा पापम्पश्यति (स एव स पाप्मा) ॥१०॥ तेऽब्रुवन्नोन्वाव

१-म । २ 'य' अधिक है । ३-त्यु । ४ न्नवीन् । ५ न्व । ६ अत्यवक्- । ७-मान्- ।

नोऽयम्मृत्युं न पाप्मानमत्यवाक्षीत् । श्रोत्रेणोद्गात्रा दीक्षामहा इति ॥११॥ ते श्रोत्रेणोद्गात्राऽदीक्षन्त । स यदेव श्रोत्रेण शृणोति तदात्मन आगायदथ य इतरे कामास्तान्देवेभ्यः ॥१२॥ तत्पाप्माऽन्वसृज्यत । स यदेव श्रोत्रेण पापं शृणोति स एव स पाप्मा ॥१३॥ तेऽब्रुवन्नो न्वाव नोऽयम् मृत्युं न पाप्मानमत्यवाक्षीत् । अपानेनोद्गात्रा दीक्षामहा इति ॥१४॥ तेऽपानेनोद्गात्राऽदीक्षन्त । स यदेवाऽपानेनाऽपानिति तदात्मन आगायदथ य इतरे कामास्तान्देवेभ्यः ॥१५॥ तत्पाप्माऽन्वसृज्यत । स यदेवाऽपानेन पापं गन्धमपानिति स एव स पाप्मा ॥१६॥ तेऽब्रुवन्नो न्वाव नोऽयम्मृत्युं न पाप्मानमत्यवाक्षीत् । प्राणेनोद्गात्रा दीक्षामहा इति ॥१७॥ ते प्राणेनोद्गात्राऽदीक्षन्त । स यदेव प्राणेन प्राणिति तदात्मन आगायदथ य इतरे कामास्तान्देवेभ्यः ॥१८॥ तम्पाप्मा नान्वसृज्यत । न ह्येतेन प्राणेन पापं वदति न पापं ध्यायति न पापम्पश्यति न पापं शृणोति न पापं गन्धमपानिति[८] ॥१९॥ तेनाऽपहत्य मृत्युमपहत्य पाप्मानं स्वर्गं लोकमायन् । अपहत्य हैव मृत्युमपहत्य पाप्मानं स्वर्गं लोकमेति य एवं वेद ॥२०॥ २१॥

प्रथमेऽनुवाके प्रथमः खण्डः ।

---

८ अपानिति ।

सा या सा वागासीत्सोऽग्निरभवत् ॥१॥ अथ यत्तन्मन आसीत् स चन्द्रमा अभवत् ॥२॥ अथ यत्तच्चक्षुरासीत् स आदित्योऽभवत् ॥३॥ अथ यत्तच्छ्रोत्रमासीत्ता इमा दिशोऽभवन्। ता उ एव विश्वेदेवाः॥४॥ अथ यस्सोऽपान आसीत्स बृहस्पतिरभवत्। यदस्यै वाचो बृहस्यै पतिस्तस्माद्बृहस्पतिः ॥५॥ अथ यस्स प्राण आसीत्स प्रजापतिरभवत्। स एष पुत्री प्रजावानुद्गीथो य[1]ः प्राणः। तस्य स्वर एव प्रजाः। प्रजावान्भवति य एवं वेद ॥६॥ तं हैतमेके प्रसत्त्वमेव गायन्ति प्राणा३प्राणा३प्राणा३ हुम्भा ओवा इति ॥७॥ तदु होवाच शाट्यायनिस्तत एतमर्हति प्रसत्त्वं गातुम्। यद्वाव वाचा करोति तदेतदेवाऽस्य कृतम्भवतीति ॥८॥ अथ वा अ[2]त ऋक्साम्नोरेव प्रजातिः। स यद्धिङ्करोत[3]भ्येव तेन क्रन्दति। अथ यत्प्रस्तौ[4]त्येव तेन प्लवते। अथ यदादिमादत्ते रेत एव तेन सिञ्चति। अथ यदुद्गायति रेत एव तेन सिक्तं सम्भावयति[5]। अथ यत्प्रतिहरति रेत एव तेन सम्भूतम्प्रवर्धयति। अथ यदुपद्रवति रेत एव तेन प्रवृद्धं विकरोति। अथ यन्निधनमुपैति रेत एव तेन विकृतम्प्रज-

---

१ यत्। २ अतम, अथ। ३ कुर्वति। ४ प। ५-भेष्-, नास्ति प्रति। अथ यत्प्रतिहरति।

नयति । सैषर्क्साम्नोः प्रजातिः ॥९॥ स य एवमेतामृक्साम्नोः प्रजातिं वेद प्र हैनमृक्सामनी जनयतः ॥१०॥ २।२॥

प्रथमेऽनुवाके द्वितीयः खण्डः । प्रथमोऽनुवाकस्समाप्तः ॥

———:०:———

एष एवेदमग्र आसीद्य एष तपति । स एष सर्वेषाम्भूतानां तेजो हर इन्द्रियं वीर्यमादायोर्ध्व उदक्रामत ॥१॥ सोऽकामयतैकमेवाऽक्षरं स्वादु मृदु देवानां वनामेति ॥२॥ स तपोऽतप्यत । स तपस्तप्त्वैकमेवाऽक्षरमभवत् ॥३॥ तं देवाश्चर्षयश्चोपसमैप्सन् । अथैषोऽसुरान्भूतहनोऽसृजतैतस्य पाप्मनोऽनन्वागमाय ॥४॥ ते वाचोपसमैप्सन् । ते वाचं समारोहन् । तेषां वाचम्पर्यादत्त । तस्मात्पर्यादत्ता वाक् । सत्यं च ह्येनया वदत्यनृतं च ॥५॥ तम्मनसोपसमैप्सन् । ते मनस्समारोहन् । तेषाम्मनः पर्यादत्त । तस्मात्पर्यादत्तम्मन[ः]स् । पुण्यं च ह्येनेन ध्यायति पापं च ॥६॥ तं चक्षुषोपसमैप्सन् । ते चक्षुस्समारोहन् । तेषां चक्षुः पर्य्यादत्त । तस्मात्पर्य्यात्तं चक्षुः । दर्शनीयं च ह्येनेन पश्यत्यदर्शनीयं च ॥७॥

---

९ साम्नोः, क्साम्नोः ।

१ स । २ न्या । ३ मदु । ४ नास्ति । ५ प्रति । ६ पेवा । ७ 'उदेवानाम' पूर्व से पुनः है । ८ पर्य्यत्तं ।

तं श्रोत्रेणोपसमैप्सन् । ते श्रोत्रं समारोहन् । तेषां श्रोत्रम्पर्यादत्त ।
तस्मात्पर्यात्तं[1] श्रोत्रम् । श्रवणीयं चैनेन शृणोत्यश्रवणीयं च ॥८॥
तमपानेनोपसमैप्सन् । तेऽपानं समारोहन् । तेषामपानम्पर्यादत्त ।
तस्मात्पर्यात्तोऽपानः । सुरभि च ह्येनेन जिघ्रति दुर्गन्धि च ॥९॥
तम्प्राणेनोपसमैप्सन् । तम्प्राणेनोपसमाप्नुवन् ॥१०॥ अथाऽसुरा
भूतहन आद्रवन्मोहयिष्याम इति मन्यमानाः ॥११॥ स यथा-
ऽश्मानमृत्वा लोष्टो विध्वंसेतैवमेवाऽसुरा व्यध्वंसन्त । स एषोऽश्मा-
ऽऽखणो यत्प्राणः ॥१२॥ स यथाऽश्मानमाखणमृत्वा लोष्टो
विध्वंसत एवमेव स विध्वंसते य एवं विद्वांसमुपवदति ॥१३॥ ८।२॥

इति तृतीयेऽनुवाके प्रथमः खण्डः ।

स एष वशी दीक्षाग्र उद्गीथो यत्प्राणः । एष हीदं सर्वं वशीकुरुते[1]
॥१॥ वशी भवति वशे[2] स्वान्कुरुते य एवं वेद । अस्य ह्यसावग्रे
दीप्यते[3] अमुष्य[4] वासः ॥२॥ तं हैतमुद्गीथं शाट्यायनिराचष्टे वशी
दीक्षाग्र इति । दीक्षाग्रा ह वा अस्य कीर्तिर्भवति य एवं वेद ॥३॥
आभूतिरिति कारीरादयः प्राणं वा अनुप्रजाः पशव आभवन्ति ।
स य एवमेतमाभूतिरित्युपास्त ऐव प्राणेन प्रजया पशुभिर्भवति ॥४॥

---

९ पर्यात्त, पर्य्याप्तं ।

१ एषां तं ह्वं सर्वं वशीकुरुते ऐसा पाठ देते हैं । २—शो ।
३ ऽमुष— । ४ अदः ।

सम्भूतिरिति सात्ययज्ञयः । प्राणं वा अनुजाः पशवस्सम्भवन्ति । स य एवमेतं सम्भूतिरित्युपास्ते सम्भ[व] प्राणेन प्रजया पशुभिर्भवति ॥५॥ प्रभूतिरिति शैलनः । प्राणं वा अनुजाः पशवः प्रभवन्ति । स य एवमेतं प्रभूतिरित्युपास्ते प्रैव प्राणेन प्रजया पशुभिर्भवति ॥६॥ भूतिरिति भाल्लविनः । प्राणं वा अनुजाः पशवो भवन्ति । स य एवमेतं भूतिरित्युपास्ते भवत्येव प्राणेन प्रजया पशुभिः ॥७॥ अपरोधोऽनपरुद्ध इति पार्ष्णिश्शैलनः । एष ह्यन्यमपरुणाद्धि नैतमन्यः । एष ह वाऽस्य द्विषन्तम्भ्रातृव्यमपरुणाद्धि य एवं वेद ॥८॥२॥

इति पञ्चमेऽनुवाके द्वितीयः खण्डः ।

एकवीर इत्यारुणेयः । एको ह्येवैष वीरो यत्प्राणः । आ हाऽस्यैको वीरो वीर्यवाञ्जायते य एवं वेद ॥१॥ एकपुत्र इति चैकितानेयः । एको ह्येवैष पुत्रो यत्प्राणः ॥२॥ स उ एव द्विपुत्र इति । द्वौ हि प्राणापानौ ॥३॥ स उ एव त्रिपुत्र इति । त्रयो हि प्राणोऽपानो व्यानः ॥४॥ स उ एव चतुष्पुत्र इति । चत्वारो हि प्राणोऽपानो

५–भूर । ६ शलि– । ७ 'प्रजया' अधिक है । ८ भूर । ९ अपरोद्धा । १०–णाद्धि । ११ से । १२–त । १३–र्यमू– ।

१–ह । २ त्यु । ३–णेय, 'एकः' के स्थान में सर्वत्र 'एका' । ४–त्र । ५ द्विपु– ।

व्यानस्समानः ॥५॥ स उ एव पञ्चपुत्र इति। पञ्च हि प्राणो[6]ऽपानो व्यानस्समानोऽवानः ॥६॥ स उ एव षट्पुत्र इति। षड्[7]ढि प्राणोऽपानो व्यानस्समानोऽवान उदानः ॥७॥ स उ एव सप्तपुत्र इति सप्त हीमे शीर्षण्याः प्राणाः ॥८॥ स उ एव नवपुत्र इति सप्त हि शीर्षण्या[8]ः प्राणा द्वाववाञ्चौ ॥९॥ स उ एव दशपुत्र इति। सप्तशीर्षण्याः प्राणा द्वाववाञ्चौ नाभ्यां दशमः ॥१०॥ स उ एव बहुपुत्र[9] इति। एतस्य [10]हीयं सर्वाःप्रजाः ॥११॥ एतं ह स्म वैतदुद्गीथं विद्वाँसः पूर्वेब्राह्मणाः कामागायिन[11] आहुः कति ते पुत्रानागास्याम इति ॥१२॥२।५॥

इति द्वितीयेऽनुवाके तृतीयः खण्डः।

स यदि ब्रूयादेक[1]न्न आगायेति प्राण उद्गीथ इति विद्वानेकम्मनसा ध्यायेत्। एको हि प्राणः। एकोहाऽस्याऽऽजायते ॥१॥ स यदि ब्रूयाद्द्वौ न आगायेति प्राणउद्गीथ इत्येव विद्वान्द्वौ मनसा ध्यायेत्। द्वौ[2] हि प्राणापानौ द्वौ[3] हे[2]वाऽस्याऽऽजायेते[4]॥२॥स यदि ब्रूयात्त्रीन्न[5] आगायेति प्राणउद्गीथ इत्येव विद्वाँस्त्रीन्मनसा ध्यायेत्। त्रयो हि प्राणो

६—ना। ७ अभि। ८—ऽआं। ९ वसुपुत्र। १० यम, दयम। ११—गैन॥

१ ऐक—। २ त्रयो। ३ 'व्यानः' अधिक है। ४ 'स हैवाऽस्याऽऽजायन्ते' अधिक है। ५ मन।

ऽपानोव्यानः। त्रयो हैवाऽस्याऽऽजायन्ते ॥३॥ स[6] यदि ब्रूयाच्चतुरो म आगायेति प्राणा उद्गीथ इत्येव विद्वाँश्चतुरो मनसा ध्यायेत्। चत्वारो हि प्राणोऽपानो[6] व्यानस्समानः। चत्वारो हैवास्याऽऽजायन्ते ॥४॥ स यदिब्रूयात्पञ्च म आगायेति प्राणाउद्गीथइत्येव विद्वान्पञ्चमनसा ध्यायेत्। पञ्चहिप्राणोऽपानो व्यानस्समानोऽवानः। पञ्च हैवाऽस्याऽऽजायन्ते ॥५॥ स यदि ब्रूयात् षण्म आगायेतिप्राणाउद्गीथ इत्येव विद्वान् षण्मनसा ध्यायेत्। षाड्[7] प्राणोऽपानोव्यानस्समानोऽवान उदानः। षड्[8]ढैवाऽस्याऽऽजायन्ते ॥६॥ स यदि ब्रूयात्सप्त म आगायेति प्राणउद्गीथ इत्येव विद्वान् सप्तमनसा ध्यायेत्। सप्त हीमे शीर्षण्याः प्राणाः। सप्त हैवाऽस्याऽऽजायन्ते ॥७॥ स यदि ब्रूयान्नव म आगायेति प्राणउद्गीथ इत्येव विद्वान्नव मनसा ध्यायेत्। सप्त शीर्षण्याः प्राणा द्वाववाञ्चौ। नव हैवाऽस्याऽऽजायन्ते ॥८॥ स यदिब्रूयादश म आगायेति प्राणउद्गीथ इत्येव विद्वान्दश[9] मनसा ध्यायेत्। सप्त शीर्षण्याः प्राणा द्वाववाञ्चौ नाभ्यां दशमः। दश हैवाऽस्याऽऽजायन्ते ॥९॥ स यदिब्रूयात्सहस्रम्म आगायेति प्राणउद्गीथ इत्येव विद्वान् सहस्रम्मनसा ध्यायेत। सहस्रं हैत आदित्यरश्मयः। ते[10]ऽस्य पुत्रः। सहस्रंहैवाऽस्याऽऽजायन्ते ॥१०॥ एवं हैवे[11]तमुद्गीथ

---

६ नास्ति। स यदि......व्यानस्स्। ७ भि। ८ ढे। ९ द्वा। १० त। ११ ह।

न्त आरुणारभ्कक्षीवाँस्त्रसदस्युरिति पूर्वे महाराजा[12]ऽभिदास्तस्त-
स्सुत्रसुत्रनिषेदुः । ते ह सर्व एव सहस्रपुत्रा आसुः ॥२१॥ य[13] एवं
वेद सहस्रं हैवाऽस्य पुत्रा भवन्ति ॥२२॥ २।६॥

द्वितीयेऽनुवाके चतुर्थः खण्डः । द्वितीयोऽनुवाकस्समाप्तः ।

शर्यातो[1] वै मानवः प्राच्यां स्थल्या[2]मयजत[3] । तस्मिन् ह भूता-
न्युद्गीथेऽपित्व[4]मीषिरे[5] ॥१॥ तं देवा बृहस्पतिनोद्गात्रा दीक्षामहा
इति पुरस्तादागच्छन्नयं न उद्गास्यतीति । यमेनाऽऽजद्विषेण[6]
पितरो दक्षिणतो[7]ऽयं न उद्गास्यतीत्युशनसा काव्येना[8]ऽसुराः[9]
पश्चाद[10]यं न उद्गास्यतीत्ययास्ये[11]नाऽऽङ्गिरसेन मनुष्या उत्तरतो-
ऽयं न उद्गास्यतीति ॥२॥ स है[12]क्षांचक्रे हन्तैनान् पृच्छानि
कियन्तो[13] वा एक ईशे कियत एकः कियत एक इति ॥३॥ स होवाच
बृहस्पतिं[16] यन्मेत्वमुद्गायेः किं ततस्स्या[14]दिति ॥४॥ स[15] होवाच देवे-
ष्वेव श्रीस्स्याद्देवेष्वीशा स्वर्गमुत्वा लोकं गमयेयमिति ॥५॥ अथ
होवाच यममाजद्विषं यन्मेत्वमुद्गायेः किं ततस्स्यादिति ॥६॥ स

---

१२ ऊँश् । १३ यद् ।

१ शैग्या– २ स्थालगाद् । ३ अंजॅयत । ४ ऽविसत्रम् ।
५ येशिरे । ६ विम्ब– । ७ दक्षयातो । ८ कांब्देना । ९–रां १० इत्वातः ।
११ अ-गांङ्खस्रेन", अयंह्निस्येना । १२ कियं । १३ ति: । १४ 'अरम्' अधिक
है । १५ नास्ति, स होवाच .... ततस्स्यादित ।

होवाच पितृष्वेव श्रीस्स्यात्पितृष्वीशा स्वर्गमु त्वां लोकं गमयेयमिति ॥७॥ अथ होवाचोशनसं काव्यं[16] यन्मे[17] त्वमुद्गायेः किं ततस्स्यादिति ॥८॥ स होवाचाऽसुरेष्वेव श्रीस्स्यादसुरेष्वीशा स्वर्गमु[18] त्वां लोकं गमयेयमिति ॥९॥ अथ होवाचाऽयास्यमाङ्गिरसं यन्मे त्वमुद्गायेः[19] किं ततस्स्यादिति ॥१०॥ स होवाच देवानेव देवलोके दध्याम्[20] मनुष्यान्मनुष्यलोके पितॄन्[21] पितृलोके नुदेयाऽस्माल्लोकादसुरान्[22] स्वर्गमु त्वां लोकं गमयेयामिति ॥११॥२।७॥

तृतीयेऽनुवाके प्रथमः खण्डः।

स होवाच त्वं मे भगव उद्गाय य एतस्य सर्वस्य यशो[1][ऽसी]ति ॥१॥ तस्य हाऽयास्य एवोज्जगौ । तस्मादुद्गाता द्दत उत्तरतो निवेशनं लिप्सेत। एतद्ध नाऽऽरुद्ध निवेशनं यदुत्तरतः ॥२॥ उत्तरत आगतो यास्य आङ्गिरसश्शर्यात[4]स्य मानवस्योज्जगौ। स प्राणेन देवान्देवलोके ऽदधादपानेन मनुष्यान्मनुष्यलोके व्यानेन पितॄन्[2] पितृलोके हिङ्कारेण वज्रेणाऽस्माल्लोकादसुराननुदत ॥३॥ तान् होवाच दूरं गच्छतेति। स दूरो ह नाम लोकः। तं ह जग्मुः। त एतेऽसुरा असम्भाव्यम्[3]पराभूताः ॥४॥ छन्दोभिरेव वाचा

१६ य। १७ जे। १८-शाः। १९ न्वं। २०-ध्यात्। २१-तॄन्।
२२ 'ड' अधिक है। २३ है॥
१-शस। २-तॄन्। ३ असंख्येयम-।

श्य तिम्मानवं[४] स्वर्गं लोकं गमयांचकार ॥५॥ ते होचुरसुरा एत तं वेदाम यो नोऽयामित्थमधत्तेति । तत[५] आगच्छन्[६] । तमेत्याऽपश्यन् ॥६॥ तेऽब्रुवन्नयं वा आस्य इति । यदब्रुवन्नयं वा आस्य इति तस्मादयमास्यः । अयमास्यो[७] ह वै नामैषः । तमयास्य इति परोक्षमाचक्षते ॥७॥ स प्राणो वा अयास्यः । प्राणो ह वा एनान् स नुनुदे ॥८॥ स य एवं विद्वानुद्गायति प्राणेनैव देवान्देवलोके दधात्यपानेन[८] मनुष्यान्[१०]मनुष्यलोके व्यानेन पितॄन्[९] पितृलोके हिङ्कारेणेव[१] वज्रेणाऽस्माल्लोकाद्द्विषन्तम्भ्रातृव्यं नुदते ॥९॥२॥८॥

तृतीयेऽनुवाके द्वितीयः खण्डः ।

तं ह ब्रूयाद्दूरं गच्छेति । स यमेव लोकमसुरा अगच्छंस्तं हैव[१] गच्छति ॥१॥ छन्दोभिरेव वाचा यजमानं स्वर्गं लोकं गमयति ॥२॥ ता एता व्याहृतयः[२] । भ्रेत्येति वाग्[इति]भूर्भुवस्स्वारित्य[उदिति]॥३॥ तद्यत्प्रेति तत्[३]प्राणस्तदयं लोकस्तदिमं लोकमस्मिँलोक आभजति ॥४॥ एत्यपानस्तदसौ लोकस्तदमुं लोकममुष्मिँलोक आभजति ॥५॥ वागिति तद्ब्रह्म तदिदमन्तरिक्षम् ॥६॥ भूर्भुवस्स्वरिति सा त्रयीविद्या ॥७॥ उदिति सोऽसावादित्यः । तद्यदुदित्युदिव श्लेष-

---

४ शय्या- । ५ त । ६-च्छन् । ७-असो । ८ पान्- । ९ पहिङ्- । १०-ष्यान् ॥

१-श्रा । २ स्या- । ३ सत् ।

यति[४] ॥८॥ तद्यदेकमेवाऽभिसम्पद्यते तस्मादेकवीरः । एको ह तु सन्वीरो वीर्यवान् भवति । आहाऽस्यैको[५] वीरो वीर्यवान्[६] जायते य एवं वेद ॥९॥ तद्ध होवाच शाट्यायनिर्बहुपुत्र एष उद्गीथ इत्ये-[७]वोपासितव्यम् । बहवो ह्येत आदित्य[८] रश्मयस्ते[९]ऽस्य पुत्राः । तस्माद्बहुपुत्र एष उद्गीथ इत्येवोपासितव्यमिति ॥१०॥२।६॥

तृतीयेऽनुवाके तृतीयः खण्डः । तृतीयोऽनुवाकस्समाप्तः ।

देवासुरास्समयतन्तेत्याहुः । न ह वै तद्देवासुरास्सम्येतिरे । प्रजापतिश्च ह वै तन्मृत्युश्च सम्येताते ॥१॥ तस्य ह प्रजापतेर्देवाः[१] प्रियाः पुत्रा अन्त आसुः । तेऽब्रियन्त तेनोद्गात्रा दीक्षामहै येना-ऽपहत्य मृत्युमपहत्य पाप्मानं स्वर्गं लोकमियामेति ॥२॥ तेऽब्रुवन्वाचोद्गात्रा दीक्षामहा इति ॥३॥ ते वाचोद्गात्राऽदीक्षन्त । तेभ्य[२] इदं वागागायद्यदिदं वाचा वदति यदिदं वाचा भुञ्जते ॥४॥ ताम्पाप्माऽन्वसृज्यत । स यदेव वाचा पापं वदति स एव स पाप्मा ॥५॥ तेऽब्रुवन् न वै नोऽयम्मृत्युं न पाप्मानमत्यवाक्षीत्[३] । मनसोद्गात्रा दीक्षामहा इति ॥६॥ ते मनसोद्गात्रा दीक्षन्त । तेभ्य इदम्मन

---

४ इत्येष्–। ५–प। ६–यावान्। ७–प (इत्य)। ८ आदित्यस्य। ९ त॥

१–याय। २ 'नोद्गात्रा दीक्षामहा इति' अधिक है पर 'ते' और 'भ्य' के बीच लाल रङ्ग से काटा गया है। ३ अवत्य्–।

आगायद्यदिदम्मनसा ध्यायति यदिदम्मनसा भुञ्जते ॥७॥ तत्पा-
प्माऽन्वसृज्यत । स यदेव मनसा पापं ध्यायति स एव स
पाप्मा ॥८॥ तेऽब्रुवन्नोन्वाव नोऽयं मृत्युं न पाप्मानमसवात्तीद् ।
चक्षुषोद्गात्रा दीक्षामहा इति ॥९॥ ते चक्षुषोद्गात्राऽदीक्षन्त ।
तेभ्य इदं चक्षुरागायद्यदिदं चक्षुषा पश्यति यदिदं चक्षुषा
भुञ्जते ॥१०॥ तत्पाप्माऽन्वसृज्यत । स यदेव चक्षुषा पापम्पश्यति
स एव स पाप्मा ॥११॥ तेऽब्रुवन्नोन्वाव नोऽयम्मृत्युं न पाप्मा-
नमसवात्तीद् । श्रोत्रेणोद्गात्रा दीक्षामहा इति ॥१२॥ ते श्रोत्रेणो-
द्गात्राऽदीक्षन्त । तेभ्य इदं श्रोत्रमागायद्यदिदं श्रोत्रेण शृणोति
यदिदं श्रोत्रेण भुञ्जते ॥१३॥ तत्पाप्माऽन्वसृज्यत । स यदेव
श्रोत्रेण पापं शृणोति स एव स पाप्मा ॥१४॥ तेऽब्रुवन्नोन्वाव
नोऽयं[४] मृत्युं न पाप्मानमसवात्तीद्[५] । प्राणेनोद्गात्रा दीक्षामहा
इति ॥१५॥ ते प्राणेनोद्गात्राऽदीक्षन्त । तेभ्य इदं प्राण आगाय-
द्यदिदं प्राणेन प्राणिति यदिदं प्राणेन भुञ्जते ॥१६॥ तम्पाप्मा-
ऽन्वसृज्यत । स यदेव प्राणेन[पापं]प्राणिति स एव स
पाप्मा ॥१७॥ तेऽब्रुवन्नोन्वाव नो[६]ऽयं मृत्युं न पाप्मानमसवात्तीद् ।
अनेन मुख्येन प्राणेनोद्गात्रा दीक्षामहा इति ॥१८॥ तेऽनेन

४-त्युं । ५ 'स' अधिक है । ६ ने ।

मुख्येन प्राणेनोद्गात्राऽदीत्तन्त ॥१९॥ सोऽब्रवीन्मृत्युरेष एषां स उद्गाता येन मृत्युमत्येष्यन्तीति[7] ॥२०॥ न ह्येतेन प्राणेन पापं वदति न पापं ध्यायति न पापम्पश्यति न पापं शृणोति न पापं गन्धमपानिति ॥२१॥ तेनाऽपहत्य मृत्युमपहत्य पाप्मानं स्वर्गं लोकमायन्[8]। अपहत्य हैव मृत्युमपहत्य पाप्मानं स्वर्गं लोकमेति य एवं वेद ॥२२॥२।१०॥

चतुर्थेऽनुवाके प्रथमः खण्डः।

स यथा हत्वा अमृध्याऽतीयादेवमेवैतम्मृत्युमत्यायन्[1] ॥१॥ स वाचम्प्रथमामत्यवहत्। ताम्परेण मृत्युं[2] न्यदधात्। सोऽग्निरभवत् ॥२॥ अथ मनोऽत्यवहत्[3]। तत्परेण मृत्युं[2] न्यदधात्। स चन्द्रमा अभवत् ॥३॥ अथ चक्षुरत्यवहत्। तत्परेण मृत्युं[2] न्यदधात्। स आदित्योऽभवत् ॥४॥ अथ श्रोत्रमत्यवहत्। तत्परेण मृत्युं[2] न्यदधात्। ता इमा दिशोऽभवन्। ता उ एव विश्वे देवाः ॥५॥ अथ प्राणमत्यवहत्। तम्परेण मृत्युं[2] न्यदधात्। स वायुरभवत् ॥६॥ अथाऽऽत्मने[4] केवलमेवाऽन्नाद्यमागायत् ॥७॥ स एष

७–यम। ८ गमयन्।

१ स अधिक है, 'अत्यायन्' के स्थान में–यत्। २–युं। ३–न्। ४ वृथा।

एवाऽयास्यः । आस्ये[5] धीयते[6] । तस्मद्‌यास्यः । यद्वेवा[7] [ऽयम] आस्य[8] रमते तस्माद्वेवाऽयास्यः[9] ॥८॥ स एष एवाऽऽङ्गिरसः । अतो हीमान्यङ्गानि रसं लभन्ते । तस्मादाङ्गिरसः[10] । यद्वेवैषा- मङ्गानां रसस्तस्मा द्वेवाऽऽङ्गिरसः ॥९॥ तं देवा अब्रुवन् केवलं वा आत्मनेऽन्नाद्यमागासीः । अनु न एतास्मिन्ननाद्य आभज[11] । एतदस्याऽनामयत्व[12]मस्ती[13]ति ॥१०॥ तं वै प्रविशतेति । स वा आकाशान्[14] कुरुष्वेति । स इमान् प्राणानाकाशान[15]कुरुत[16] ॥११॥ तं वागेव भूत्वाऽग्निः प्राविशन्[18]मनो भूत्वा चन्द्रमाश्चक्षुर्भूत्वा ऽऽदित्यश्श्रोत्रम्भूत्वा दिशः प्राणो भूत्वा वायुः ॥१२॥ एषा वै दैवी परिषदैवी सभा दैवी संसत् ॥१३॥ गच्छति ह वा एतां[17] दैवीम्परिषदं दैवीं सभां दैवीं[17] संसदं य एवं वेद ॥१४॥२॥११॥

चतुर्थेऽनुवाके द्वितीयः खण्डः ।

यत्रो ह वैक चैता[1] देवता निस्पृशन्ति न हैव तत्र कश्चन पाप्मान्यङ्गः परिशिष्यते ॥१॥ स विद्यान्नेह कश्चन पाप्मान्यङ्गः परिशेक्ष्यते[2] सर्व[3]मेवै[4]ता देवताः पाप्मानं निधक्ष्यन्तीति । तथा हैव

---

५ आसे । ६ ध्यति । ७ एगॅ । ८ स्ये । ९–ंऽयास्यः । १० ॲङ– । ११ अः । १२ आमयत्वम् । १३ असी । १४ आकाशात् । १५ आशासनम् । १६ कूरुत । १७ '–ं' नास्ति । १८ प्रॅवी–॥

१ चे । २ चते । ३ एवम् । ४ एता ।

भवति ॥२॥ य उ ह वा एवंविदमृच्छति[5] यथैता[6] देवता ऋत्वा नीयादेवं न्येति[7]। एतासु हैवेनं देवतासु मपन्नमेतासु वसन्तमुपवदति ॥३॥ तस्य हैतस्य नैव काचनाऽऽर्तिरस्ति[8] य एवं वेद। य एवैनमुपवदति स आर्तिमार्च्छति[9] ॥४॥ स य एनमृच्छादेव[10] तादेवता उपसृत्य ब्रूयादयम्माऽऽरत्[11] स इमामार्तिं[12] न्येत्विति। तां हैवाऽऽर्तिं न्येति ॥५॥ यावदावासा[13] उ हाऽस्येमे प्राणा अस्मिँलोक एतावदावासा[13] उ हाऽस्यैता देवता अमुष्मिँलोके भवन्ति ॥६॥ तस्मादु हैवं विद्वान्नैवाऽगृहतायै[14] बिभीयान्नाऽलोकतायै। एता मे देवता अस्मिँलोके गृहान् करिष्यन्ति। एता अमुष्मिँलोके[15] भवन्ति। तस्मादु लोकम्प्रदास्यन्तीति[16] ॥७॥ तस्मादु हैवं विद्वान्नैवाऽगृहतायै बिभीयान्नाऽलोकतायै। एता मे देवता अस्मिँलोके गृहेभ्यो गृहान् करिष्यन्ति स्वेभ्य[17] आयतनेभ्य इति हैव विद्याद् [एता] देवता[18] अमुष्मिँलोके लोकम्प्रदास्यन्तीति ॥८॥ तस्मादु हैवं

५–चिद् वा चिद। ६ दुच्छति। ७ नेति। ८–तीर्। ९ आकृछति। १० एम। ११ रात्। १२ अत्ति। १३–दावशा। १४ग्रह्–। १५ अस्मिल्। १६ प्रवदा–। १७ 'आयतनेभ्य' अधिक है। १८ एव ता॥

विद्वान्नैवाऽऽर्त्तहतायै बिभीयान्नाऽलोकतायै एता म एतदुभयं संनंस्यन्तीति हैव विद्यात् । तथा हैव भवति ॥६॥२।१२॥

चतुर्थेऽनुवाके तृतीयः खण्डः । चतुर्थोऽनुवाकस्समाप्तः ।

देवा वै ब्रह्मणो वत्सेन[1] वाचमदुहन् । अग्निर्ह वै ब्रह्मणो वत्सः ॥१॥ सा या सावाग्ब्रह्मैव तत् । अथ योऽग्निर्मृत्युस्सः ॥२॥ तामेतां वाचं यथा धेनुं वत्सेनो[2]पसृज्य प्रत्तां दुहीतैवमेव देवा वाचं सर्वान्कामानदुहन्[3] ॥३॥ दुहे[4] ह वै वाचं सर्वान्कामान्य एवं वेद । स हैषोऽनानृतो वाचं देवीमुदिन्धे[5] वद वद वदेति ॥४॥ तद्यदिह[6] पुरुषस्य पापं कृतम्भवति तदाविष्करोति । यदिहैनदपि रहसीव कुर्वन्मन्यते[7]ऽथ[8] हैनदाविरेव करोति । तस्माद्वाव पापं न कुर्यात्[9] ॥५॥२।१३॥

पञ्चमेऽनुवाके प्रथमः खण्डः ।

एष उ ह वाव देवानां नेदिष्ठमुपचर्यो यदग्निः ॥१॥ तं साधूपचरेत् । य एनमस्मिँल्लोके साधूपचरति[1] तमेषोऽमुष्मिँल्लोके

---

१ पत्सेन, पत्सेन । २ वत्त– । ३–र । ४ जहे । ५ उदिग्धे । ६ अमिह । ७–त । ८ अथ– । ६ 'एष उ ह वा' दूसरे अनुवाक का यहां अधिक है ॥

१ चराति ।

साधूपचरति । अथ य एनमस्मिँल्लोके नाऽऽद्रियते तमेषोऽमुष्मिँल्लोके नाऽऽद्रियते । तस्माद्वा अग्निं साधूपचरेत् ॥२॥ तं नैव हस्ताभ्यां स्पृशेन्न पादाभ्यां न दण्डेन[2] ॥३॥ हस्ताभ्यां स्पृशति यदस्याऽन्तिकमवनेनिक्ते । अथ यदभिप्रसारयति तत्पादाभ्याम् ॥४॥ स एनमास्पृष्ट ईश्वरो दुर्धायां धातोः । तस्माद्वा अग्निं साधूपचरति । सुधायां हैवैनं दधाति ॥६॥२।१।४॥

पञ्चमेऽनुवाके द्वितीयः खण्डः ।

एष उ ह वाव देवानाम्महाशनतमो यदग्निः ॥१॥ तस्मा अत्यम[1]दददानो[2]ऽश्नीयात् । यो वै महाशनेऽनश्नत्यश्नाति ईश्वरो हैनमभिषङ्क्तोः[3] । पूतिमिव[4] हा[5]ऽश्नीयात्[6] ॥२॥ अथो ह प्रोक्तेऽशने ब्रूयात् समिन्त्स्वाऽग्निमिति । स यथा प्रोक्तेऽशने श्रेयाँसम्परिवेष्टवै ब्रूयात्तादृक् तत्[7] ॥३॥ एतदु ह वाव साम यद्वाक् । यो वै चक्षुस्साम श्रोत्रं सामेत्युपास्ते न[8] ह तेन करोति ॥४॥ अथ य[9] आदित्यस्साम चन्द्रमास्सामेत्युपास्ते न[8] हैव तेन करोति ॥५॥ अथ यो वाक् सामेत्युपास्ते स एवाऽनुष्ठ्या साम वेद । वाचा हि

---

२ तखडेनम्, तयढेनम् ।

१ प्र– । २ ददासीनो । ३ अभिष(ष्व)ङ्क्ताः । ४–हर् । ५ हवमिव । ६ ऽश्नी– ७ तम् । ८ ना । ९ यद् ।

साम्नाऽऽर्त्विज्यं क्रियते ॥६॥ स यो वाचस्स्वरो जायते सोऽग्निर्वाग्वेव वाक् । तदैतैकधा[10] साम भवति ॥७॥ स य एवमेतदेकधा साम भवद्वेदैवं हैतदेकधा साम भवतीत्येकधेव श्रेष्ठस्स्वानाम्भवति ॥८॥ तस्मादु हैवंविदमेव साम्नाऽऽर्त्विज्यं कारयेत । स ह वाव साम वेद य एवं वेद ॥६॥२।१५॥

पञ्चमेऽनुवाके तृतीयः खण्डः । पञ्चमोऽनुवाकस्समाप्तः ॥

---

१० एक—।

[तृतीयोऽध्यायः ।]

एका ह वाव कृत्स्ना देवताऽर्धदेवता एवाऽन्याः । अयमेव योऽयम्पवते ॥१॥ एष एव सर्वेषां देवानां ग्रहाः ॥२॥ स हैषोऽस्तं नाम । अस्तमिति हेह पश्चाद्[1] ग्रहानाचक्षते ॥३॥ स यदादित्योऽस्तमगादिति ग्रहानगादिति हैतत् । तेन सोऽसर्वः । स एतमेवाऽप्येति ॥४॥ अस्तं चन्द्रमा एति । तेन सोऽसर्वः । स एतमेवाऽप्येति ॥५॥ अस्तं नक्षत्राणि यन्ति । तेन तान्यसर्वाणि । तान्येतमेवाऽपियन्ति ॥६॥ अन्वग्निर्गच्छति । तेनं सोऽसर्वः । स एतमेवाऽप्येति ॥७॥ एसहः । एति रात्रिः[2] । तेन ते असर्वे । ते एतमेवाऽपीतः[3] ॥८॥ मुह्यन्ति दिशो न वै ता[4] रात्रिम्प्रज्ञायन्ते । तेन ता असर्वाः । ता एतमेवाऽपियन्ति ॥९॥ वर्षति च पर्जन्य उच्च गृह्णाति । तेन सोऽसर्वः[5] । स एतमेवाऽप्येति ॥१०॥ क्षीयन्त आप एवमोषधय[6] एवं वनस्पतयः । तेन तान्यसर्वाणि । तान्येतमेवाऽपियन्ति ॥११॥ तद्यदेतत्सर्वं वायुमेवाऽप्येति तस्माद्वा-

---

१ पँचा । २-रः । ३-ताः । ४ तां । ५ 'स साम वेद' अधिक है ।
६ [illegible]-, ओषा-।

युरेव साम ॥१२॥ स ह वै सामवित्स [कृत्स्नं] साम वेद य एवं वेद ॥१३॥ अथाऽध्यात्मम् । न वै स्वपन् वाचा वदीति[7]। सेयमेव प्राणमप्येति ॥१४॥ न मनसा ध्यायति । तदिदमेव प्राणमप्येति[8] ॥१५॥ न चक्षुषा पश्यति । तदिदमेव प्राणमप्येति ॥१६॥ न श्रोत्रेण शृणोति । तदिदमेव प्राणमप्येति ॥१७॥ तद्यदेतत्सर्वं प्राणमेवाऽभिसमेति तस्मात्प्राण एव साम ॥१८॥ स ह वै सामवित्स कृत्स्नं साम वेद य एवं वेद ॥१९॥ तद्यदिदमाहुर्न वाताऽग्र वातीति[स] हैतत्पुरुषेऽन्तर्निरमते[9] स पूर्णस्स्वेदमान[10] आस्ते ॥२०॥ तद्ध शौनकं[11] च कापेयमभिप्रतारिणं च[काक्षसेनिम्] ब्राह्मणः परिविविष्यमाणा[12] उपावव्राज[13] ॥२१॥३।१॥

प्रथमेऽनुवाके प्रथमः खण्डः ।

तौ ह बिभिक्षे[1] । तं ह नाऽऽददाते[2] को वा कोवेति मन्यमानौ ॥१॥ तौ होपजगौ ।

महात्मनश्चतुरो देव एकः कस्स[3] जगार भुवनस्य गोपाः ।
तं कापेय[4] न विजानन्त्यकेऽभिप्रतारिन् बहुधा निविष्टम्[5] ॥

---

७ उमम । ८-यति । ९-मिते । १०-गा । ११-काश १२ विष्या-। १३-प्राजा ॥

१ क्षिम्-। २ दास्ते । ३ खे । ४ काक्षपेय । ५ निविन्दम् ।

इति ॥२॥ स होवाचाऽभिप्रतारी[६]मं [७]वाव प्रपद्य प्रतिगृहीति । त्वया[८] वा[९] अयम्प्रत्युच्य[१०] इति[११] ॥३॥ तं ह प्रत्युवाच[१२]—

आत्मा देवानामुत मर्त्या[१३]नां हिरण्यदन्तो रपसो[१४] न सूनुः[१५] ।
महान्तमस्य महि[१६]मानमाहुरनद्यमानो यद[१७]द[१८]न्त[१९]मत्ति ॥

इति ॥४॥ महात्मनश्चतुरो [देव] एक इति । वाग्वा[२०] अग्निः[२१] । स महात्मा देवः । स यत्र स्वपिति[२२] तद्वाचम्प्राणो गिरति ॥५॥ मनश्चन्द्रमास्स महात्मा देवः । स यत्र स्वपिति तन्मनः[२३] प्राणो गिरति ॥६॥ चक्षु[२४]रादित्यस्स महात्मा देवः । स यत्र स्वपिति तच्चक्षुः प्राणो गिरति ॥७॥ श्रोत्रं दिशस्ता[२५] महात्मानो देवाः । स यत्र स्वपिति तच्छ्रोत्रं प्राणो गिरति ॥८॥ तद्यन्महात्मनश्चतुरो देव एक इत्येतद्ध तत् ॥९॥ कस्स[२६][२७] जगारे[२८]ति । प्रजापतिर्वै कः । स हैतज्जगार ॥१०॥ भुवनस्य गोपा इति । स उ वाव भुवनस्य गोपाः ॥११॥ तं कापेय[२९] न विजानन्त्येक इति । न ह्येतमेके विजानन्ति ॥१२॥ अभिप्रतारिन् बहुधा निविष्टमिति । बहुधा ह्येवैष निविष्टो यत्प्राणः ॥१३॥ आत्मा देवानामुत मर्त्याना[३०]मिति । आत्मा ह्येष देवाना-

---

६–प्र(अ)म, मा । ७ वय्या, यय्या । ८ अया । ९ वाय । १०–युच्चे । ११ उति । १२–याच । १३ मत्य्– । १४ परसो । १५ नु । १६ मभि– । १७ यदि । १८ दतम, दंतम । १९ अँति । २० पाश, वा । २१ या । २२ स्वतिपिति । २३–न, इस के पश्चात् प्रा । २४–क्षर् । २५ महात्मा अधिक है । २६ क । २७ सो । २८ जगॅर– । २९–पध । ३०–प्रो ।

सुव मर्त्यानाम् ॥१४॥ हिरण्यदन्तो रपसो[31] न[15] सूनुरिति । न ह्येष सूनुः । सूनुरूपो[31] ह्येष सन्[32] सूनुः ॥१५॥ महान्तमस्य महिमानमाहुरिति । महान्तं[33] ह्येतस्य महिमानमाहुः[34] ॥१६॥ अनवमानो यददन्नमत्तीति[35] । अनवमानो ह्येषोऽदन्नमत्ति ॥१७॥३।२॥

प्रथमेऽनुवाके द्वितीयः खण्डः ॥

तस्यैष[1] श्रीरात्मा समुद्गूढो यदसावादित्यः । तस्माद्गायत्रस्य स्तोत्रेणाऽवान्याभेच्छिया भवछिधा[2] इति ॥१॥ स एष एवोक्थम् । यत्पुरस्तादवानिति[3] तदेतदुक्थस्य शिरो यद्दक्षिणतस्[4] स दक्षिणः पक्षो यदुत्तरतस्[5] स उत्तरः पक्षो यत्पश्चात् [तत्]पुच्छम् ॥२॥ अयमेव प्राण उक्थस्याऽऽत्मा । स य एवमेत[6]मुक्थस्याऽऽत्मानमात्मन्प्रतिष्ठितं वेद स हाऽमुष्मिँ[7] लोके साङ्गस्सतनुस[सर्वस्]सम्भवति ॥३॥ शश्वद्ध वा अमुष्मिँल्लोके यदिदम्पुरुषस्याऽऽण्डौ शिश्नं कर्णौ नासिके यत्किं[8] चाऽनस्थिकं न सम्भवति ॥४॥ अथ य एवमेतमुक्थस्या[9]ऽऽत्मानमात्मन्प्रतिष्ठितं वेद स हैवाऽमुष्मिँल्लोके साङ्गस्सतनुस्सर्वस्सम्भवति ॥५॥ तदेतद्वैश्वामित्रमुक्थम् । तदन्नं वै विश्वम्प्राणो मित्रम्

३१–से । ३२ सन् । ३३ स् । ३४ आहुर् । और 'इति महान्तं ह्येतस्य महिमाहुः' अधिक है । ३५ अन्तम । ३६ सूनुर्–॥

१ समाद्व– । २ वक्षुच– । ३ वा इति । ४–दक्षः । ५ सद् । ६ तद् । ७ अमुष्मिँ । ८–तद् । ९ अयस्य– ।

॥६॥ तद् विश्वामित्रश्श्रमेण तपसा व्रतचर्येणेन्द्रस्य प्रियं धामो-पजगाम ॥७॥ तस्मा उ हैतत्प्रोवाच यदिदम्मनुष्यानामवम ॥८॥ तद् स उपनिषसाद ज्योतिरेतदुक्थमिति ॥९॥ ज्योतिरिति द्वे अक्षरे प्राण इति द्वे अन्नमिति द्वे। तदतेदन्न एव प्रतिष्ठितम् ॥१०॥ अथ हैनं जमदग्निरुपनिषसादाऽऽयुरेतदुक्थमिति ॥११॥ आयुरिति द्वे अक्षरे प्राण इति द्वे अन्नमिति द्वे। तदेतदन्न एव प्रतिष्ठितं ॥१२॥ अथ हैनं वसिष्ठ उपनिषसाद गौरेतदुक्थमिति। तदेतदन्नमेव। अन्नं हि गौः ॥१३॥ तदाहुर्यदस्य प्राणस्य पुरुषश्शरीरमथ केना-ऽन्ये प्राणाश्शरीरवन्तो भवन्तीति ॥१४॥ स ब्रूयाद्यद्वाचा वदति तद्वाचश्शरीरं यन्मनसा ध्यायति तन्मनसश्शरीरं यच्चक्षुषा पश्यति तच्चक्षुषश्शरीरं यच्छ्रोत्रेण शृणोति तच्छ्रोत्रस्य शरीरम्। एवमु हाऽन्ये प्राणाश्शरीरवन्तो भवन्तीति ॥१५॥ ३।३॥

प्रथमेऽनुवाके तृतीयः खण्डः।

तदेतदुक्थं सप्तविधम्। शस्यते स्तोत्रियोऽनुरूपो धाय्या प्रगाथस्सूक्तं निवित्परिधानीया ॥ १ ॥ इयमेव स्तोत्रियो

---

१० प्र-। ११ तद्। १२ उत्थ-। १३ (-साद) गौर्, आयुर्गौर। १४-ष्ठ। १५ उ.त्तद्। १६ ऽन्येन।

१ अमिर ऋधिक द्वे। २-नीयम। ३ नास्ति।

ऽभिरनुरूपो वायुर्धाय्या[४]ऽन्तरिक्षम्प्रगाथो [५]द्यौस्सूक्तमादित्यो निवित्।
तस्माद्बह्वृचा उदिते निविदमधीयन्ते । आदित्यो हि निवित् ।
दिशः परिधानीयेत्यधिदैवतम् ॥ २ ॥ अथाध्यात्मम् । आत्मैव
स्तोत्रियः प्रजाऽनुरूपः प्राणो धाय्या[६] मनः प्रगाथश्शि[७]रस्सूक्तं
चक्षुर्निविच्छ्रोत्रम्परिधानीया[७] ॥३॥ तद्धैतदेके त्रिष्टुभा परिदधत्य-
नुष्टुभैके । त्रिष्टुभात्वेव परिदध्यात् ॥४॥ तद्धैतदेक एता व्याहृती-
रभिव्याहृत्य शंसन्ति[८] महान्मह्या[९] समधत्त देवो देव्या समधत्त
ब्रह्म ब्राह्मण्या[१०] समधत्त । तद्यत्समधत्त समधत्तेति ॥५॥ तस्मा-
दिदानी[११]म्पुरुषस्य शरीराणि प्रतिसंहितानि । पुरुषो ह्येतदुक्थम्
॥६॥ महान्मह्या समधत्तेति । अग्निर्वै महानियमेव मही ॥७॥
देवो देव्या समधत्तेति । वायुर्वै देवोऽन्तरिक्षं देवी[१२] ॥८॥ ब्रह्म
ब्राह्मण्या समधत्तेति । आदित्यो वै ब्रह्म द्यौ[१३]र्ब्राह्मणी ॥९॥ तासां
वा एतासां देवतानां द्वयोर्द्व[१४]योर्देवतयोर्नव-नवाऽक्षराणि सम्पद्यन्ते ।
एतादि[१५]मे लोका[१६]स्त्रिणवा भवन्ति ॥१०॥ तद्ब्रह्म वै त्रिवृत् ।
तद्ब्रह्माऽभिव्याहृत्य शंसन्ति । एष उ एव स्तोमस्सो[१८]ऽनुचरः॥११॥

---

४ द्वास्या, द्वार्य्या । ५ प्राग्-। ६ धार्य्या । ७-धात्नी-। ८ तदुक्थम् अधिक है (हाशिये में) ? । ९-य । १०-मह्या । ११ इदानि । १२-वा । १३-द्यौ । १४-यो । १५-द्यौ । १६-कौ । १७ चा । १८ सा ।

यदिममाहुरेकस्तोम इत्ययमेव योऽयम्पवते । एषोऽधिदेवतम् । प्राणोऽध्यात्मम् । तस्य शरीरमनुचरः[१६] ॥१२॥ तद्यथा ह वै मणौ मणिसूत्रं सम्प्रोतं स्याद्–॥१३।३।४॥

प्रथमेऽनुवाके चतुर्थः खण्डः ।

[१]–एवं हैतस्मिन्सर्वमिदं सम्प्रोतं गन्धर्वाप्सरसः पशवो मनुष्याः ॥१॥ तद्ध मुञ्जस्[२]साम[३]श्रवसः प्रययौ । तस्मै[४] ह श्वाजनिर्वैश्यः प्रेयाय[५] ॥२॥ तस्य हाऽन्तरिक्षात्पतित्वा नवनीतपिण्ड उरसि निपपात । तं हाऽऽदायाऽनुदधौ ॥३॥ ततो[६] हैव स्तोमं[७] ददर्शाऽन्तरिक्षे विततम्बहुशोभमानम् । तस्यो ह युक्तिं ददर्श ॥४॥ बहिष्पवमानभासय[८] टीत्र[९] विथि प्राणय इति कुर्यात् टीत्र[९] गृहित्र[१०] अपान्य इति वाचः । दिदृक्षेतैवाऽक्षिभ्यं शुश्रूषेतैव कर्णाभ्याम् । स्वयामिदम्मनोयुक्तम् ॥५॥ तद्यत्र वा इषुरत्यग्रो भवति न वै स ततो हिनस्ति[११] तदु[१२] वा एतं नोपाप्नुयात् । प इत्येवाऽपान्यात् । तद्यथा बिम्बेन मृगमानयेदेवमेवैनमेतया देवतयाऽऽनयाति । स युक्तः करोति । एष[१३] एवापि युक्तः[१४] ॥६।३।५॥

प्रथमेऽनुवाके पञ्चमः खण्डः । प्रथमोऽनुवाकस्समाप्तः ॥

१६–रन्तम् ॥

१ एवम् (एवा) के पहले पञ्चम कं० का द्वि० वाक्य । २ मौञ्ज्– । ३ साहश्– । ४ तमस्मै । ५ प्रोयाय । ६ तेतो ७–म । ८–इ । ९ टीत्व, पहला अक्षर ळ भी हो । १० गृहित्व । ११ श्रस्ति । हनस्ति । १२ स्यदु । १३–षो । १४–ति ॥

मोऽसौ साम्नः प्रत्ति[1] वेद प्र हास्मै दीयते ॥१॥ ददा[2] इति ह वा अयमग्निर्दीप्यते तथेति वायुः पवते हन्तेति चन्द्रमा ओमित्यादित्यः ॥२॥ एषा ह वै साम्नः प्रत्तिः[3] । एतां ह वै साम्नः प्रत्ति[4] सुदक्षिणः क्षैमिर्विदां चकार ॥३॥ तां हैतां होतुर्वाऽऽज्ये गायेन्मैत्रावरुणस्य वा तां[5] ददा३[6] तथा३ हन्ता३[7] हिम्भा ओवा इति। प्र ह वा अस्मै दीयते ॥४॥ [सो] ऽप्यन्यान्[8] बहूनुपर्युपरि[9][10] य एवमेतां साम्नः प्रत्तिं वेद ॥५॥ य उ ह वा अबन्धुर्बन्धुमत्साम[11] वेद यत्र हाऽप्येनं न विदुर्यत्र रोषन्ति यत्र परीवचक्षते तद्धाऽपि श्रैष्ठ्यमाधिपत्यमन्नाद्यम्पुरोधाम्पर्यैति[12] ॥६॥ अग्निर्ह वा अबन्धुर्बन्धुमत्साम[11] । कस्माद्धा ह्येनं दार्वोः कस्माद्धा पर्याहृत्य मन्थन्ति स श्रैष्ठ्यायाऽऽधिपत्यायाऽन्नाद्याय पुरोधायै[13][14] जायते ॥७॥ स यत्र ह वा अप्येवंविदं न विदुर्यत्र रोषन्ति यत्र परीवचक्षते[15] तद्धाऽपि श्रैष्ठ्यमाधिपत्यमन्नाद्यम्पुरोधाम्पर्यैति[16] ॥८॥३।६॥

द्वितीयेऽनुवाके प्रथमः खण्डः ।

स्वयमु तत्र यत्रैनं विदुः ॥१॥ सुदक्षिणो ह वै क्षैमिः प्राचीनशालिर्जाबालौ[1] ते ह सब्रह्मचारिण आसुः ॥२॥ ते हैमे[2] बहु जप्यस्य

---

१ प्रति । २ ददान्, ददान् । ३ प्रक्तिः, प्रवृक्तिः । ५ तौं । ६ 'हन्ता३' अधिक है । ७ नास्ति । ८ अप्य् । ९-हून्य । १०-उप । ११-धु । १२-धा । १३ श्रेष्ठ्- । १४-आये । १५ परिं ॥

१-शाःखिर । २ हैं ।

चाऽन्यस्य चाऽनूचिरे[३] प्राचीनशालिश्च[४] जाबालौ च ॥३॥ अथ ह स्म सुदक्षिणः[५] क्षैमिर्यदेव यज्ञस्याऽज्ञो यत्सुविदितं तद्ध स्मैव पृच्छति ॥४॥ त उ ह वा अपोदिता व्याक्रोशमानाश्चेरुः[६][७] शूद्रो दुरनूचान इति ह[८] स्म सुदक्षिणं क्षैमिमाक्रोशन्ति[९] प्राचीनशालिश्च[१०] जाबालौ च ॥५॥ स ह स्माऽऽह सुदक्षिणः क्षैमिर्यत्र भूयिष्ठाः कुरुपञ्चालास्समागता भवितारस्तन्न एष संवादो नाऽनुपदृष्टे शूद्रा इव संवदिष्यामह[११] इति ॥६॥ ता उ ह वै जाबालौ दिदीक्षाते[१२] शुकश्च गोश्रुश्च[१३]। तयोर्ह प्राचीनशालिर्वृत[१४] उद्गाता ॥७॥ स तद्ध सुदक्षिणो ऽनुबुबुधे जाबालौ हाऽदीक्षिषातामिति[१६]। स ह संग्रहीतारमुवाचा[१५]-ऽऽनयस्वाऽरे[१७] जाबालौ हाऽदीक्षिषातां[१८] तद्गमिष्याव इति ॥८॥३।७॥

द्वितीयेऽनुवाके द्वितीयः खण्डः ।

तस्य ह ज्ञातिका अश्रुमुखा इवाऽऽसुरन्यतरां वा भयमुपागा[१]दिति ॥१॥ अथ ह स्म वै यः पुराब्रह्मवाद्यं वदत्यन्यतरामुपागादिति ह स्मैनम्मन्यन्ते । अथो ह स्मैनम्मृत्मिवैवोपासते ॥२॥ तं ह संग्रहीतोवाचाऽथ यद्भगवस्ते ताभ्यां न कुशलं

---

२ है । ३ ऽनूच– । ४–शाखाश् । ५–णा । ६ प्य्–।–श्रा । ७ चोरुश् । ८–श्रा । ९ ध्यकोशि– । १० लीश् । ११–पतिष्य– । १२ ददीभ्– १३–रुश् । १४ प्र– । १५ संसं– । १६ दिदीक्षि– । १७–यास्वा ॥

१–म ।

कथे[2]त्थमात्थेति ॥३॥ ओमिति होवाच गन्तव्यम्म आचार्य[3]स्सुय-
मा[4]नमन्यतेति ॥४॥ स ह रथमास्थाय प्रधावयांचकार । तं ह स्म
प्रतीक्षन्ते ॥५॥ कं जानीतेति । सुदक्षिण इति । न वै नूनं स
इदमभ्यवेयादिति । स एवेति ॥६॥ स ह सोपानादेवाऽन्तर्वेद्यव-
स्थायोवाचाऽङ्गन्वित्थं गृहपता३ इति । तं ह नाऽनूदतिष्ठा-
स[5]त् । स होवाचाऽनूत्थाता[6] म[7] एधि । कृष्णाजिनोऽसी[ति] ।
तदिमे कुरुपञ्चाला अवि[8]दुरनूत्थातैव त इति होचुः ॥७॥ तं ह
कनीयान्भ्रातो[9]वाचा[10]ऽनुत्ति[11]ष्ठ । भगव उद्गातारमिति । तं हा
ऽनूत्तस्थौ ॥८॥ स होवाच त्रिर्वै गृहपते पुरुषो जायते ।
पितुरेवाऽग्रेऽधि जायतेऽथ मातुरथ यज्ञात् ॥९॥ त्रि[12]र्वे[13]व[14] म्रियत[15]
इति। स यद्ध वा एनमेतत्पिता योन्यां रेतो भूतं सिञ्चति-॥१०॥३।८।

द्वितीयेऽनुवाके तृतीयः खण्डः ।

—तत्प्रथमम्म्रियते ॥१॥ अन्ध[1]मिव वै तमो योनिः । लोहि-
तस्तोको वा[2] वै स तदाभवत्यपां वा स्तोकः । किं हि स[3] तदा-
भवति ॥२॥ स यस्तां देवतां वेद यां च[3] स ततोऽनुसम्भवति या

---

२ त्-। ३ आर्चर्-। ४ सुय्-। ५-ष्ठस्-। ६-ऊर्ध्वा-।
७ म। ८ 'इति' अधिक है। ९ भ्रातो। १० वा। ११ अनुतिष्ठ।
१२ भिव्। १३ भ, ऊ। १४ नास्ति। १५ भ्रियत॥
१ अन्ध्-। २ वो। ३ स्।

चै[४]नं तम्मृत्युमतिवहति स उद्गाता मृत्युमतिवहतीति ॥३॥ अथ
य एनमेतदीक्ष[५]यन्ति ताद्द्वितीयम्म्रियते । वपन्ति केशश्मश्रूणि ।
निकृन्तन्ति नखान् । मत्यअ[६]न्त्यङ्गानि । मत्यचत्य[७]ङ्गुलीः ।
अप[८]हतो ऽपवेष्ठि[८]त आस्ते । न जुहोति । न यजते । न योषि[९]तं
चरति । अमानुषीं वाचं वदति । मृतस्य वावैष[१०] तदा रूपम्भवति
॥४॥ स यस्तां देवतां वेद यां[११] च स ततो ऽनुसम्भवति या चैनं
तम्मृत्युमतिवहति स उद्गाता मृत्युमतिवहतीति ॥५॥ अथ य
एनमेतदस्माल्लोकात्प्रेतंचित्यामादधाति तद् तृतीयम्म्रियते ॥६॥ स
य[१२]स्तां देवतां वेद यां च स ततो ऽनुसम्भवति या चैनं तम्मृत्यु-
मतिवह[१३]ति स उद्गाता मृत्युमतिवहतीति ॥७॥ एतावद्दैवो[१४]क्त्वा
रथमास्थाय प्रधावयांचकार ॥८॥ तं ह जाबालम्प्रत्येतं कनीयान्
भ्रातोवाच का[१५]म्भवाञ्छूद्र[१६]को वाचमवादीति । हस्तिना गाधमैषी-
रिति ॥९॥ प्र हैवैनं तच्छशंस यः कथमवोचद्भगव इति । यस्त्रयाणा-
म्मृत्यूनां साम्नाऽतिवाहं वेद स उद्गाता मृत्युमतिवहतीति ॥१०॥३।९॥

द्वितीयेऽनुवाके चतुर्थः खण्डः ।

---

४ चे । ५ दि– । ६–भ्यजत्य् । ७ यज्– । ८ अप– ९ यौष– । १० स ।
११ 'का' अधिक है । १२ यन्तस्य । १३–तीति । १४ वा । १५ वहतीति'
अधिक है । १६–वच् ॥

ते वाव भगवस्ते पितोद्गातारममन्यतेति[1] होवाच । तदु ह प्राचीनशाला विदुर्य[2] एषामयं वृत उद्गाताऽऽस[3] । तस्मिन् ह नाऽनुविदुः ॥१॥ ते होचुरनुधावत काण्ड्वियमिति[4] । तं हाऽनुसस्नुः[5] । ते ह काण्ड्वियमुद्गातारं चक्रिरे ब्रह्माणम्प्राचीनशालिम[6] ॥२॥ तं हाऽभ्यवेद्योवाचैवमेष[7] ब्राह्मणो मोघाय वादाय नाऽग्लायत् । स नाऽणु साम्नोऽन्विच्छतीति[8] । अति हैवैनं तच्चक्रे ॥३॥ स यद्ध[9] वा एनमेतत्पिता[10] योन्यां रेतो भूतं सिञ्चत्यादित्यो हैनं तद्योन्यां रेतो भूतं[11] सिञ्चति । स हाऽस्य तत्र मृत्योरीशे[12] ॥४॥ अथो यदेवैनमेतत्पिता योन्यां रेतो भूतं सिञ्चति[13] तद्ध वाव स ततोऽनुसम्भवति प्राणं च । यदा ह्येव रेतस्सिक्तं प्राण आविशत्यथ तत्सम्भवति[14] ॥५॥ अथो यदेवैनमेतदीक्षयन्त्यग्निर्हैवैनं तद्योन्यां रेतो भूतं सिञ्चति । स हैवाऽस्य तत्र मृत्योरीशे[15] ॥६॥ अथो यामेवैतां वैसर्जनीयामाहुतिमध्वर्युर्जुहोति तामेव स ततोऽनुसम्भवति छन्दांसि[16] चैव ॥७॥ अथ य एनमे-

---

१–प । २ विदुर् । ३ सः । ४ कान्त्यावयम । ५–स्नः । ६ ब्राह्मणाम । ७–पेद्या । ८ न्वीच्–। ९ रणम । १० नास्ति । ११ रत्–। १२–मो । १३ 'अथोवाच' अधिक है । १४ 'अथो य एनमेतद्दीक्षयन्त्य·········तत्रमृत्योरीशे' अधिक है । १५ 'अथो यदेवैनमेतद्दीक्षयन्ति' अधिक है । १६ मासि ।

तदस्माल्लोकात्[17] प्रेतं चित्यामादधति चन्द्रमा हैवैनं तद्योन्यां रेतो भूतं सिञ्चति । स उ हैवाऽस्य तत्र मृत्योरीशे ॥८॥ अथो यदेवैन-मेतदस्माल्लोकात्[17] प्रेतं[17] चित्यामादधत्यथो या एवैता अवोत्तरणी-या आपस्ता एव स ततोऽनुसम्भवति[18] प्राणम्नेव । प्राणो ह्यापः ॥९॥ तं ह वा एवंविदुद्गाता यजमानमोमित्येतेनाक्षरेणाऽऽदित्यम्मृत्यु-मतिवहति वागित्यग्निं द्युमिति वायुम्भा इति चन्द्रमसम् ॥१०॥ तान्[19] वा एतान्मृत्यून् साम्नोद्गाताऽऽत्मानं च यजमानं चाऽति-वहत्योमित्येतेनाक्षरेण प्राणेनाऽमुनाऽऽदित्येन ॥११॥

तस्यैष श्लोकः—

> उतैषां ज्येष्ठ[20] उत वा किनष्ठ उतैषाम्पुत्र उत वा पितैषाम् ।
> एको ह देवो मनसि प्रविष्टः पूर्वो ह जज्ञे स उ गर्भेऽन्तः—

इति ॥१२॥ तद्यदेशोऽभ्युक्त[21] इममेव पुरुषं योऽयमाक्ष्णो[22]ऽन्तरोमित्येतेनैवाक्षरेण प्राणेनैवाऽमुनैवाऽऽदित्येन[···]॥१३॥३।१०

द्वितीयेऽनुवाके पञ्चमः खण्डः । द्वितीयोऽनुवाकस्समाप्तः ॥

त्रिर्ह[1] वै पुरुषो म्रियते त्रिर्जायते[2] ॥१॥ स हैतदेव प्रथमम्म्रियते यद्रेतस्सिक्तं सम्भूतम्भवति[3] । स प्राणमेवाऽभिसम्भवति । प्राणम-

---

१७-प्रान् । १८-घन्तीति । १९ ता । २० जैष्ठ + २१ त्यु—। २२ भक्षयन् ॥

१ हे । २ 'स हैतदेव प्रथमम्म्रियते त्रिर्जायते' अधिक है । ३सभ—।

भिजायते ॥२॥ अथैतद्द्वितीयम्म्रियते यद्दीक्षते । स छन्दांस्येवा-
ऽभिसम्भवति । दक्षिणामभिजायते ॥३॥ अथैतत् तृतीयम्म्रियते
यन्म्रियते[5] । स श्रद्धामेवाऽभिसम्भवति । लोकमभिजायते ॥४॥
तदेतत् त्र्यावृद्गायत्रं[6] गायति[7] । तस्य प्रथमयाऽऽवृतेममेव[8] लोकं जयति
यदु चाऽस्मिँल्लोके । तदेतेन चैनम्प्राणेन समर्धयति[9] यमभिसम्भवत्येतां
चाऽस्मा आशाम्[10] प्रयच्छति यामभिजायते ॥५॥ अथ द्वितीययाऽऽवृते-
दमेवाऽन्तरिक्षं जयति यदु चान्तरिक्षे । तदेतैश्चै[11]नं छन्दोभिस्स-
मर्धयति[1] यान्यभिसम्भवति । एतां चास्मै दक्षिणाम्प्रयच्छति याम-
भिजायते ॥६॥ अथ तृतीययाऽऽवृताऽमुमेव लोकम् जयति यदु
चाऽमुष्मिँल्लोके । तदेतया चैनं श्रद्धया समर्धयति[1] ययैवैनमेतच्छ्रद्ध-
याऽग्नाव[12]भ्यादधाति समयमितो भविष्यतीति । एतं चास्मै लो-
कम्प्रयच्छति[13] यमभिजायते ॥७॥३।१२॥

तृतीयेऽनुवाके प्रथमः खण्डः ।

एतद्वै तिसृभिरावृद्भिरिमाँश्च लोकाञ्जयत्येतैश्चैनम्भूतैस्समर्धय[1]-
ति[2] यान्यभिसम्भवति ॥१॥ अथ वा अतो हिङ्कारस्यैव । तं ह[3] स्वर्गे
लोके सन्तम्मृत्युरन्वै[4]क्षदशनया[5] ॥२॥ श्रीर्वा[6] एषा प्रजापतिस्साम्नो

४ ओव । ५-म । ६ त्रिय्-। ७-अन्ति । ८ इम्-(!) । ९-मृध्-।
१० 'न्यभिसम्भवति' अधिक है लाल रंग से कटा हुआ । ११ च ।
१२ ऽग्नाव् । १३-आ ।
१ ध्नोद्-। २-मृध्-। ३ नास्ति । ४ सितम् । ५ श्नेति । ६ श्री ।

यद्धिङ्कारः । तमिदुद्गाता श्रिया प्रजापतिना हिङ्कारेण मृत्युमपसेध-
ति ॥३॥ हुम्मेत्याह माऽत्र नु गा यत्रैतद्यजमान इति हैतत् ॥४॥
स यथा श्रेयसा सिद्धः पापीयान् प्रतिविजत[9] एवं[10] हैवाऽस्मान्मृत्युः
पाप्मा प्रतिविजते[8] ॥५॥ यन्मेत्याह चन्द्रमा वै मा मासः । एष
ह वै मा मासः। तस्मान्मेत्याह । भा[11] इति हैतत्परोक्षेणेव। यस्माद्धेव
मेत्याह यद्वेव[12] मेत्याहैतानि त्रीणि। तस्मान्मेति ब्रूयात् ॥६॥३।१२॥

तृतीयेऽनुवाके द्वितीयः खण्डः।

हुम्भा इति ब्रह्मवर्चसकामस्य। भातीव हि ब्रह्मवर्चसम् ॥१॥
हुम्बो[1] इति पशुकामस्य । बो इति ह पशवो वाश्यन्ते ॥२॥ हुम्
वगिति श्रीकामस्य[2]। वगिति ह श्रियम्पणायन्ति ॥३॥ हुम्
भा ओवा इत्येतदेवोपगीतम् ॥४॥ महद्दिवाऽभिपरिवर्तयन् गाये-
दिति ह स्माऽऽह नाको महाग्रामो महानिवेशो भवतीति। स यथा
स्थाणुमर्पयित्वेतरेण[3] वेतरेण[4] वा परियायात्[5] तादृक्तत् ॥५॥ तदु
होवाच शाट्यायनिः कस्मै कामाय स्थाणुमर्पयेत। अथोपगीतमे-
वैतत्। नैवैतदाद्रियेतेति[6][7] ॥६॥ [इति] नु हिङ्काराणाम्[8]। अथ वा

---

७ पद्। ८ 'इति' अधिक है। ९-विच-। १० प पवमं।
११ भाग। १२ येव॥

१ बो। २ श्रिंकु-,-सु। ३-वा, अपयित्वा। ४-रेव। ५ पर्य्या-।
६ त्वैंद्र। ७ धाँद्र-। ८ हिङ्काक-।

मतो निधनमेव । ओवा इति द्वे अक्षरे । अन्तो वै साम्नो निधनमन्तस्स्वर्गो लोकानामन्तो ब्रध्नस्य विष्टपम् ॥७॥ तमेतदुद्गाता यजमानमोमित्येतेनाक्षरेणान्ते स्वर्गे लोके दधाति ॥८॥ य उ ह वा अपक्षो वृक्षाग्रं गच्छत्यव वै स ततः पद्यते । अथ यद्ध पक्षी वृक्षाग्रे यदसिधारायां यत्क्षुरधारायामास्ते न वै स ततोऽवपद्यते । पक्षाभ्यां हि संयत[९] आस्ते ॥९॥ तमेतदुद्गाता यजमानमोमित्येतेनाक्षरेण स्वरपक्षं कृत्वाऽन्ते स्वर्गे लोके दधाति । स यथा अस्यविभ्यदासीतैवमेव स्वर्गे लोकेऽविभ्यदास्तेऽथाऽऽचरति[१०] ॥१०॥ ते ह वा एते अक्षरे देवलोकश्चैव मनुष्यलोकश्च । आदित्यश्च ह वा एते अक्षरे चन्द्रमाश्च ॥११॥ आदित्य एव देवलोकश्चन्द्रमा मनुष्यलोकः । ओमित्यादित्यो[११] वागिति चन्द्रमाः ॥१२॥ तमेतदुद्गाता यजमानमोमित्येतेनाक्षरेणाऽऽदित्यं देवलोकं गमयति ॥१३॥३॥१३॥

तृतीयेऽनुवाके तृतीयः खण्डः ।

तं हाऽऽगतम्पृच्छति कस्त्वमसीति । स यो ह नाम्ना वा गोत्रेण वा प्रब्रूते तं हाऽऽह यस्तेऽयम्मय्यात्माऽभूदेष ते स इति ॥१॥

९-हि संयत । १०-ओ । ११-ऐ ॥

१-भ्य ।

तस्मिन् हाऽऽत्मन् प्रतिपद्य । त[2]मृतवस्सम्पदार्यपद्गृहीतमपकर्षन्ति ।
तस्य हाऽहोरात्रे लोकमाप्नुतः ॥२॥ तस्मा उ हैवैनं[3] प्रब्रुवीत[4] को-
ऽहमस्मि सुवस्त्वम । स त्वां स्वर्ग्यं[5] स्वरगामिति ॥३॥ को ह वै
प्रजापतिरथ हैवंविदेव सुवर्गः[6] । स हि सुवर्गच्छति ॥४॥ तं हा-
ऽऽह यस्त्वमसि सोऽहमस्मि योऽहमस्मि स त्वमस्येहीति ॥५॥
स एतमेव सुकृतरसम्प्रविशति । यदु ह वा अस्मिँल्लोके मनुष्या
यजन्ते[7] यत्साधु[8] कुर्वन्ति तदेषामूर्ध्वमन्नाद्यमुत्सीदति । तदमुं
चन्द्रमसम्मनुष्यलोकम्प्रविशति ॥६॥ तस्येदम्मानुषनि[9]काशन-
यथ[10]दमुदरे[11]ऽन्वस्सम्भवति । तस्योर्ध्वम[12]न्नाद्यमुत्सीदति स्तनावभि[13] ।
स यदाजायतेऽथाऽस्मै माता स्तनमन्नाद्यम्प्रयच्छति ॥७॥ अजातो
ह वै तावत्पुरुषो यावन्न यजते[14] स यज्ञेनैव जायते । स यथाऽण्ड
म्प्रथमनिर्भिण्णमेवमेव ॥८॥ तदा तं ह वा एवंविदुद्गाता यज-
मानमोमित्येतेनाऽक्षरेणाऽऽदित्यं देवलोकं गमयति । वागि-
त्यस्मा उत्तरेणाऽक्षरेण च[15]न्द्रमसमन्नाद्यमक्षितिम्प्रयच्छति[16] ॥९॥
अथ यस्यैतदविद्वानुद्गायति न[17] हैवैनं देवलोकं गमयति नो

२ त । ३ तैन । ४-ब्रव्-, -वीत् । ५-गम् । ६ सुस्वर्-, -म ।
७जायन्ते।८ स्व-। ९-दै। १०-थँ-विक्-इस के पश्चात 'इदम'। ११ मदेरे।
१२ वृष-। १३-नाच् । १४ जायते। १५-स-। १६-यच्छिति। १७ ना ।

एवमन्नाद्येन समर्धयति[१८] ॥१०॥ स यथाऽखडं विदिग्धं[१९] शयीता-ऽन्नाद्यमलभमानमेवमेव विदिग्धश्शेतेऽन्नाद्यमलभमानः[२०] ॥११॥ तस्मादु हैवंविदमेवोद्गापयेत । एवंविदिहैवोद्गातारिति ब्रूतः प्रतिशृणुयात[२१] ॥१२॥३।१४॥

तृतीयेऽनुवाके चतुर्थः खण्डः। तृतीयोऽनुवाकस्समाप्तः।

---:o:---

वागिति हेन्द्रो[१] विश्वामित्रायोक्थमुवाच[२] । तदेतद्विश्वामित्रा उपासते वाचमेव ॥१॥ मनुर्ह वसिष्ठाय ब्रह्मत्वमुवाच । तस्मादाहुर्वासिष्ठमेव ब्रह्मेति ॥२॥ तदु वा आहुरेवंविदेव ब्रह्मा । क उ एवंविदं वासिष्ठमर्हतीति ॥३॥ प्रजापतिः प्राजिजनिषत । स तपोऽतप्यत । स ऐक्षत हन्त नु प्रतिष्ठां जनयै[३] ततो याः प्रजास्स्रक्ष्ये[४] ता[५] एतदेव प्रतिष्ठास्यन्ति नाऽप्रतिष्ठाश्चरन्तीः प्रदाधिष्यन्त इति ॥४॥ स इमं लोकमजनयदन्तरिक्षलोकममुं[६] लोकमिति । तानिमाँस्त्री-ल्लोकाञ्जनयित्वाऽभ्यश्राम्यत ॥५॥ तान् समतपत्[७] । तेभ्यस्तं तप्ते-भ्यस्त्रीणि शुक्राण्युदायन्नाग्निः पृथिव्या वायुरन्तरिक्षादादित्यो दिवः ॥६॥ स एतानि शुक्राणि पुनरभ्येवाऽतपत[८] । तेभ्यस्संतप्तेभ्य[९]

१८–मृध्–। १९–श्रा। २०–श्राः। २१–श्रुणु–॥

१ है। २ उत्थ्–। ३ जाये, जनये। ४ स्रक्–। ५ ताम्। ६–मुं। ७ समभवन्। ८ स्स। ९–न्र।

स्त्रीण्येव शुक्राण्युदायन्नृग्वेद एवाऽग्नेर्यजुर्वेदो वायोस्सामवेद आदित्यात् ॥७॥ स एतानि शुक्राणि पुनरभ्येवाऽतपत् । तेभ्यस्संतप्तेभ्यस्त्रीण्येव शुक्राण्युदायन्भूरित्यृग्वेदाद्भुव इति यजुर्वेदात्स्वरिति सामवेदात्तदेव[10] ॥८॥ तद्ध वै त्रय्यै विद्यायै शुक्रम् । एतावदिदं सर्वम् । स यो वै त्रयीं विद्यां विदुषो लोकस्सोऽस्य लोको भवति य एवं वेद ॥९॥३।१५॥

चतुर्थेऽनुवाके प्रथमः खण्डः ।

अयं वाव यज्ञो योऽयम्पवते । तस्य वाक् च मनश्च वर्तन्यौ । वाचा च ह्येष एतन्मनसा च वर्तते ॥१॥ तस्य होताऽध्वर्युरुद्गातेत्यन्यतरां वाचा वर्तनिं संस्कुर्वन्ति । तस्मात्ते वाचा कुर्वन्ति । ब्रह्मैव मनसाऽन्यतराम्[1] । तस्मात्स तूष्णीमास्ते ॥२॥ स यद्ध सोऽपि स्तूयमाने वा शस्यमाने वा वावद्यमान आसीताऽन्यतरामेवाऽस्यापि तर्हि स वाचा वर्तनिं संस्कुर्यात् ॥३॥ स यथा पुरुष एकपाद्यन्[2] भ्रेषन्नेति[3] रथो वैकचक्रो वर्तमान एवमेव तर्हि यज्ञो भ्रेषन्नेति[4] ॥४॥ एतद्ध तद्विद्वान् ब्राह्मण उवाच ब्रह्माणम्प्रातरनु-

---

१०–म ॥

१–माम् । २ भ्र– । ३–न्नो । ४ स ।

वाक उपाकृते वा यक्ष्यमानमासीनमर्धं वा इमे तर्हि यज्ञस्याऽन्तर-
गुरिति । अर्ध हि ते तर्हि यज्ञस्याऽन्तरीयुः ॥५॥ तस्माद्ब्रह्मा
प्रातरनुवाक उपाकृते वाचंयम आसीताऽऽपरिधानीयाया आ वषट्
कारादितरेषां स्तुतशस्त्राणामेवाऽऽसंस्थायै पवमानानाम् ॥६॥
स यथा पुरुष उभया पाद्यन् श्रेयं न न्योति रथो वोभयानक्रो-
वर्तमान एवमेतर्हि यज्ञो श्रेयं न न्येति ॥७॥३।१६॥

चतुर्थेऽनुवाके द्वितीयः खण्डः ।

स यदि यज्ञ ऋक्तो श्रेषभियाद्ब्रह्मणे मब्रूतेसाहुः । अथ यदि
यजुष्टो ब्रह्मणे मब्रूतेसाहुः । अथ यदि सामतो ब्रह्मणे मब्रूतेसाहुः ।
अथ यद्यनुपस्मृतात् कुत इदमजनीति ब्रह्मणे मब्रूतेसेवाऽऽहुः ॥१॥
स ब्रह्मा प्राङ् उदेत्य स्रुवेणाऽऽग्नीध्र आज्यं जुहुयाद्भूर्भुवस्स्वरित्ये-
ताभिर्व्याहृतिभिः ॥२॥ एता वै व्याहृतयस्सर्वप्रायश्चित्तयः । तद्यथा
लवणेन सुवर्णं संदध्यात् सुवर्णेन रजतं रजतेन त्रपु त्रपुणा
लोहायसं लोहायसेन कार्ष्णायसं कार्ष्णायसेन दारु दारु च चर्म

५-श्रो । ६ ' आसु-' द्विवार पढ़ा गया है । ७-र । ८-गु-
रूर । ९ ऽन्तर्यु: । १०-र्थ । ११-पाद् । १२ यद् । १३ नै ।
१ ई-। २-षो । ३ रथ । ४ प्रन्न्, प्रा । ५ विदध- । ६-पु
७ कार्-

च श्लेष्म[8]णो वमेवैवं विद्वाँस्तत्सर्वं भिषज्यति ॥३॥ तदाहुर्यद्धौत्रीन्मे प्रहान्मेऽग्रहीदित्यध्वर्यवे दक्षिणा नयन्त्यशंसीन्मे[21] वषट्[9] अकर्म[10,11] इति होत्र उदगासीन्म इत्युद्गात्रेऽथ किं चक्रुषे ब्रह्मणे तूष्णीमासीनाय समावतीरेवेतरै[12]र्ऋत्विग्भिर्दक्षिणा नयन्तीति ॥४॥ स ब्रूयादर्ध-भाग्घ[13] वै[14] स[15] यज्ञस्या[16]ऽर्धं ह्येष यज्ञस्य वहतीति । अर्धा ह स्म वै पुरा ब्रह्मणे दक्षिणा नयन्तीति । अर्धा इतरेभ्य ऋत्विग्भ्यः ॥५॥ तस्यैष श्लोको—

मयीदमन्ये भुवनादि सर्वम्, मयि लोका मयि दिशश्चतस्रः ।
मयीदमन्ये[17] निमिषद्यदेजति, मय्याप ओषधयश्च सर्वा, इति ॥६॥

मयीदमन्ये भुवनादि सर्वमित्येवंविदं ह वावेदं सर्वम्भुवनमन्वा-यत्तम् ॥७॥ मयि लोका मयि दिशश्चतस्र इत्येवंविदि ह वाव लोका एवंविदि दिशश्चतस्रः ॥८॥ मयीदमन्ये निमिषद्यदेजति मय्याप ओषधयश्च सर्वा इत्येवंविदि[18] ह वावेदं सर्वम्भुवनम्प्रतिष्ठितम् ॥९॥ तस्मादु हैवंविदमेव ब्रह्माणं कुर्वीत । स ह वाव[19] ब्रह्मा य एवं वेद ॥१०॥३।१७॥

चतुर्थेऽनुवाके तृतीयः खण्डः ।

---

८ श्लेष्म (संदिग्धपाठ) या कोष्ठ वाला रंग में कटा हुआ । ९-वषट् । १० अकृम । ११ मय् । २० 'एव' नास्ति । २१ आशांसीत् । १२-रैर् । १३-भाग् । १४ नास्ति । १५ वै । १६ च । १७ मतिही । १८-दं । १९ मम ।

अथ वा अतस्स्तोमभागानामेवाऽनुमन्त्राः ॥१॥ तद्धैतदेके स्तोमभागैरेवाऽनुमन्त्रयन्ते । तत्तथा न कुर्यात् ॥२॥ देवेन सवित्रा प्रसूतः प्रस्तोतर्देवेभ्यो वाचमिष्येत्यु हैकेऽनुमन्त्रयन्ते सविता वै देवानाम्प्रसविता सवित्रा प्रसूता इदमनु मन्त्रयामह इति वदन्तः । तदु तथा न कुर्यात् ॥३॥ भूर्भुवस्स्वरित्यु हैकेऽनुमन्त्रयन्त एषा वै त्रयीविद्या त्रय्यै वेदं विद्ययाऽनुमन्त्रयामह इति वदन्तः । तदु तथा नो एव कुर्यात् ॥४॥ ओमित्येवानुमन्त्रयेत ॥५॥ अथैष वसिष्ठस्यैकस्तोमभागानुमन्त्रः । तेन हैतेन वसिष्ठः प्रजातिकामोऽनुमन्त्रयां चक्रे देवेन सवित्रा प्रसूतः प्रस्तोतर्देवेभ्यो वाचमिष्य भूर्भुवस्स्वरोमिति । ततो वै स बहुः प्रजया पशुभिः प्राजायत ॥६॥ स एव तेन वसिष्ठस्यैकस्तोम भागानुमन्त्रेणाऽनुमन्त्रयेत बहुरेव प्रजया पशुभिः प्रजायते । इयं त्वेवस्थितिरोमित्येवाऽनुमन्त्रयेत ॥७॥३॥१८॥

चतुर्थेऽनुवाके चतुर्थः खण्डः ।

---

१ स्तोमा-। २ नु। ३ कुर्वाद्। ४ र्वे। ५ ने 'ए' लाल में कटा, ए। ६-ई। ७ त्रैय्ये। ८ ऽव। ९-याया। १०-हु। ११-जाया। १२ प्राज्-। १३ तत्स्तोम-। १४-येते। १५ इय। १६ पञ्चमः। १७-स्ता॥

अथैष[1] वाचा वज्रमुद्गृह्णाति। यदाह सोमः पवत इति वोपावर्त-ध्वमिति वा वाचैव तद्वाचो वज्रं विगृह्णते वाचस्सत्येनातिमुच्यते। तस्मादोमित्येवाऽनुमन्त्रयेत ॥१॥ देवा वा अनया त्रय्या[2] [विद्यया] सरसयोर्ध्वास्स्वर्गं लोकमुदक्रामन्। ते मनुष्याणामन्वागमाद्भिभ्यतस्त्रयं[3] वेदमपीलयन् ॥२॥ तस्य पीलयन्त एकमेवाक्षरं नाऽशक्नुवन्पीलयितुमोमिति यदेतत् ॥३॥ एष उ ह वाव सरसः। सरसा ह वा एवंविदस्त्रयी विद्या भवति ॥४॥ स यां ह वै त्रय्या[4] विद्यया सरसया जितिं जयति यामृद्धिमृध्नोति जयति तां जितिमृध्नोति तामृद्धिं य एवं वेद ॥५॥ एतद्ध वा अक्षरं त्रय्यै विद्यायै प्रतिष्ठा[5]। ओमिति वै होता प्रतिष्ठित ओमित्यध्वर्युरोमित्युद्गाता ॥६॥ एतद्ध वा अक्षरं वेदानां त्रिविष्टपम्। एतस्मिन्वा अक्षर[6] ऋत्विजो यजमानमाधाय स्वर्गे लोके समुदूहन्ति तस्मादोमित्येवानुमन्त्रयेत् ॥७॥३॥१६॥

चतुर्थेऽनुवाके पञ्चमः खण्डः। चतुर्थोऽनुवाकस्समाप्तः।

---:०:---

गुहासि देवोऽस्युपवा[1]स्युप[2] तं वायस्व[3] योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥१॥ माहिनासि[4] बहुलासि बृहत्यासि रोहिण्यस्यपमासि ॥२॥

---

१ य। २–श्रे। ३ विम्–। ४ त्रेय्–। ५ प्रतिष्ठे। ६–प।

१ देवास्मि। २ प्य्। ३ वयस्वि। ४ महिका।

सम्भूर्देवोऽसि समहम्भूयासम् । आभूतिरस्या[५]भूयासम् । भूतिरसि भूयासम् ॥३॥ यास्ते प्रजा उपदिष्टा नाहं तव ताः पर्येमि । उप ते ता दिशामि ॥४॥ नाम मे शरीरम्मे प्रतिष्ठा मे । तन्मे त्वयि तन्मे मोऽपह्वया इतीमाम्पृथिवीमवोचत् ॥५॥ तमियमागतम्पृथिवी प्रतिनन्दत्ययं ते भगवो लोकः । स ह[६] नावयं लोक इति ॥६॥ यद्वाव मे त्वयीत्याह तद्वाव मे पुनर्देहीति ॥७॥ किं नु ते मयीति[७] । नाम[८] मे शरीरम्मे प्रतिष्ठा मे । तन्मे त्वयि तन्मे पुनर्देहीति । तदस्मा[१४] इयम्पृथिवी पुनर्ददाति ॥८॥ तामाह प्र मा वहेति । किमभीति । अग्निमिति तमग्निमभिप्रवहति[९] ॥९॥ सोऽग्निमाहाऽभिजिदस्य[१०]भिजय्यासम्[११] । लोकाजिदसि लोकं जय्यासम् । अन्नादिरस्यन्नमद्यासम् । अन्नादो भवति यस्त्वैवं वेद ॥१०॥ सम्भूर्देवोऽसि समहम्भूयासम् । आभूतिरस्याभूयासम् । भूतिरसि भूयासम् ॥११॥ यास्ते प्रजा उपादिष्टा नाहं तव ताः पर्येमि । उप ते ता दिशामि ॥१२॥ तपो मे तेजो मेऽन्नम्मे वाङ् मे । तन्मे त्वयि । तन्मे मोऽपह्वया[१२] इत्यग्निमवोचत् ॥१३॥ तं तथैवाऽऽगत-

---

५ आभूरितिर् । ६ स । ७ मयी । ८ म । ९–ह्वस्ति ।
१० 'अभिजिदस्य' दो बार आया है । ११ जय्यं– । १२–याम ।
१३ तस्मा । १४ अस्माद् ॥

माग्निः प्रतिनन्दत्ययं ते भगवो लोकस्सह नावयं लोक इति ॥१४॥ यद्वाव मे त्वयीत्याहु तद्वाव मे पुनर्देहीति ॥१५॥ किं नु ते मयीति । तपो मे तेजो मेऽन्नम्मे वाङ् मे । तन्मे त्वयि । तन्मे पुनर्देहीति । [तद्] अस्मा[1][2] अग्निर्पुनर्ददाति ॥१६॥ तमाह प्र मा वहेति ॥१७॥३॥२०॥

पञ्चमेऽनुवाके प्रथमः खण्डः ।

किमभीति । वायुमिति । तं वायुमभिप्रवहति ॥१॥ स वायुमाह यत्पुरस्ताद्वासीन्द्रो राजा भूतो वासि । यद्दक्षिणतो वासीशानो भूतो वासि । यत्पश्चाद्वासि वरुणो राजा भूतो वासि । यदुत्तरतो वासि सोमो राजा भूतो वासि । यदुपरिष्टादववासि प्रजापतिर्भूतोऽववासि[1] ॥२॥ त्रासोऽस्येकत्रासोऽनवसृष्टो[2][3] देवानाम्बिलमप्यधा[4] ॥३॥ तव प्रजास्तवौषधयस्तवाऽऽपो विचलितमनुविचलन्ति ॥४॥ सम्भूर्देवोऽसि[5] समहम्भूयासम् । आभूतिरस्याभूयासम् । भूतिरसि भूयासम् ॥५॥ यास्ते प्रजा उपदिष्टनाऽहं तव ताः पर्यैमि । उप ते ता दिशामि ॥६॥ प्राणापाणौ[6] मे श्रुतम्मे । तन्मे त्वयि । तन्मे मोऽपहृथा इति वायुमवोचत् ॥७॥ तं तथैवागतं वायुः प्रतिनन्दत्ययं ते भगवो लोकः । स ह नावयं लोक इति ॥८॥ यद्वाव मे त्वयी[7]-

१ उप— । २ प्र— । ३—सृष्टो । ४ (अ) पिधि: । ५ संभूर्दे । ६ प्राणापानौ । ७ त्वयी ॥

साह तद्वाव मे पुनर्देहीति ॥९॥ किं नु ते मयीति । प्राणापानौ मे श्रुतम्मे । तन्मे त्वयि । तन्मे पुनर्देहीति । तदस्मै वायुः पुनर्ददाति ॥१०॥ तमाह प्र मा वहेति । किमभीति । अन्तरिक्षलोकमिति । तमन्तरिक्षलोकमभिप्रवहति ॥११॥ तं तथैवाऽऽगतमन्तरिक्ष लोकः प्रति नन्दत्ययं ते भगवो लोकः । स ह नावयं लोक इति ॥१२॥ यद्वाव मे त्वयीसाह तद्वाव मे पुनर्देहीति ॥१३॥ किं नु ते मयीति । अयम्मे आकाशः स मे त्वयि । तन्मे पुनर्देहीति । तमस्मा आकाशमन्तरिक्ष लोकः पुनर्ददाति ॥१४॥ तमाह प्र मा वहेति ॥१५॥३।२१॥

पञ्चमेऽनुवाके द्वितीयः खण्डः ।

किमभीति । दिश इति । तं[1] दिशोऽभिप्रवहति ॥१॥ तं तथैवागतं दिशः प्रतिनन्दत्ययं[2] ते भगवो लोकः । स ह नोऽयं लोक इति ॥२॥ यद्वाव मे युष्मास्वित्साह तद्वाव मे पुनर्दत्तेति ॥३॥ किं नु तेऽस्मास्विति । श्रोत्रमिति । तदस्मै श्रोत्रं दिशः पुनर्ददति ॥४॥ तमाह प्र मा वहतेति । किमभीति । अहोरात्रयोर्लोकमिति । तमहोरात्रयोर्लोकमभिप्रवहन्ति ॥५॥ तं तथैवागतमहोरात्रे प्रतिनन्दतोऽयं ते भगवो लोकः । स ह नोऽयं लोक इति ॥६॥ यद्वाव

१—द्व । २—द्वति ॥

मे युवयोरित्याह तद्वाव मे पुनर्दत्तमिति ॥७॥ किं नु त आवयोरिति। अक्षितिरिति। तामस्मा अक्षितिमहोरात्रे पुनर्दत्तः ॥८॥ ते आह प्र मा वहतमिति ॥९॥३॥२२॥

पञ्चमेऽनुवाके तृतीयः खण्डः।

किमभीति। अर्धमासानिति। तमर्धमासानभिप्रवहतः ॥१॥ तं तथैवागतमर्धमासाः प्रतिनन्दन्त्ययं[२] ते भगवो लोकः। स ह नोऽयं लोक इति ॥२॥ यद्वाव मे युष्मास्वित्याह तद्वाव मे पुनर्दत्तेति ॥३॥ किं नु तेऽस्मास्विति। इमानि क्षुद्राणि पर्वाणि। तानि मे युष्मासु। तानि मे प्रति संधत्तेति। तान्यस्यार्धमासाः पुनः प्रति संदधाति[३] ॥४॥ तानाह प्र मा वहतेति। किमभीति। मासानिति। तम्मासानभिप्रवहन्ति ॥५॥ तं तथैवागतम्मासाः प्रतिनन्दन्त्ययं[२] ते भगवो लोकः। स ह नोऽयं लोक इति ॥६॥ यद्वाव मे युष्मास्वित्याह तद्वाव मे पुनर्दत्तेति ॥७॥ किं नु तेऽस्मास्विति। इमानि स्थूलानि पर्वाणि। तानि मे युष्मासु। तानि मे प्रति संधत्तेति। तान्यस्य मासाः पुनः प्रति संदधति ॥८॥ तानाह प्र मा वहतेति ॥९॥३॥२३॥

पञ्चमेऽनुवाके चतुर्थः खण्डः।

---

१ नास्ति। २—दति। ३—धाति, लाल रंग से शोधा हुआ है॥

किमभीति । ऋतूनिति । तमृतूनभिप्रवहन्ति ॥१॥ तं तथैवाऽऽगतमृतवः प्रतिनन्दन्त्ययं ते भगवो लोकः । स ह नोऽयं लोक इति ॥२॥ यद्वाव मे युष्मास्वित्याह तद्वाव मे पुनर्दत्तेति ॥३॥ किं नु तेऽस्मास्विति । इमानि ज्यायांसि पर्वाणि । तानि मे युष्मासु तानि मे प्रतिसंधत्तेति । तान्यस्यर्तवः पुनः प्रतिसंदधति ॥४॥ तानाह प्र मा वहतेति । किमभीति । संवत्सरमिति । तं संवत्सरमभिप्रवहन्ति ॥५॥ तं तथैवाऽऽगतं संवत्सरः प्रतिनन्दत्ययं ते भगवो लोकः । स ह नावयं लोक इति ॥६॥ यद्वाव मे त्वयीत्याह तद्वाव मे पुनर्देहीति ॥७॥ किं नु ते मयीति । अयम्म आत्मा । स मे त्वयि तन्मे पुनर्देहीति । तमस्मा आत्मानं संवत्सरः पुनर्ददाति ॥८॥ तमाह प्र मा वहेति ॥९॥३२४॥

पञ्चमेऽनुवाके पञ्चमः खण्डः ।

किमभीति । दिव्यान् गन्धर्वानिति तं दिव्यान् गन्धर्वानभिप्रवहन्ति ॥१॥ तं तथैवाऽऽगतं दिव्या गन्धर्वाः प्रतिनन्दन्त्ययं ते भगवो लोकः । स ह नोऽयं लोक इति ॥२॥ यद्वाव मे युष्मास्वित्याह तद्वाव मे पुनर्दत्तेति ॥३॥ किं नु तेऽस्मास्विति ।

---

१ ते । २ त्वयी । ३ वहते ।
१ त ।

गन्धो[२] मे मोदो मे प्रमोदो मे । तन्मे युष्मासु । तन्मे पुनर्दत्तेति तदस्मै दिव्या गन्धर्वाः पुनर्ददति ॥४॥ तानाह प्र मा वहतेति । किमभीति । अप्सरस इति । तमप्सरसोऽभिप्रवहन्ति ॥५॥ तं तथैवाऽऽगतमप्सरसः प्रतिनन्दन्त्ययं ते भगवो लोकः । स ह नोऽयं लोक इति ॥६॥ यद्भाव[३] मे युष्मास्वित्याह तद्भाव मे पुनर्दत्तेति ॥७॥ किं नु तेऽस्मास्विति । हसो मे क्रीळा मे मिथुनम्मे । तन्मे युष्मासु । तन्मे पुनर्दत्तेति । तदस्मा अप्सरसः पुनर्ददति ॥८॥ ता आह प्र मा वहतेति ॥९॥३२५॥

पञ्चमेऽनुवाके षष्ठः खण्ड ।

किमभीति । दिवमिति । तं दिवमभिप्रवहन्ति ॥१॥ तं तथैवाऽऽगतं द्यौः प्रतिनन्दत्ययं ते भगवो लोकः । स ह नावयं लोक इति ॥२॥ यद्भाव मे त्वयीत्याह तद्भाव मे पुनर्देहीति ॥३॥ किं नु ते मयीति । तृप्तिरिति । सकृत्तृप्तेव ह्येषा । तामस्मै तृप्तिं द्यौः पुनर्ददाति ॥४॥ तमाह प्र मा वहेति । किमभीति । देवानिति । तं देवानभिप्रवहति ॥५॥ तं तथैवाऽऽगतं देवाः प्रतिनन्दन्त्ययं ते भगवो लोकः । स ह नोऽयं लोक इति ॥६॥ यद्भाव मे युष्मास्वि-

२ गन्धर्वो । ३ युयद् ॥

त्वाह तद्वाव मे पुनर्देचेति ॥७॥ किं नु तेऽस्मास्विति । अमृतमिति । तदस्मा अमृतं देवाः पुनर्ददाति[2] ॥८॥ तानाह प्र मा वहतेति॥९॥१।२९॥

पञ्चमेऽनुवाके सप्तमः खण्डः ।

किमभीति । आदित्यमिति । तमादित्यमभिप्रवहन्ति ॥१॥ स आदित्यमाह विभूः पुरस्तात्सम्पत्[1] पश्चात । सम्यङ्[2] त्वमसि । समीचो मनुष्यानरोषी[3] रुषतस्त्वषिः पाप्मानं हन्ति । अपहत-पाप्मा भवति यस्त्वै[4]वं[5] वेद ॥२॥ सम्भुर्दे[6]वोऽसि समहम्भूयासम् । आभूतिरस्याभूयासम् । भूतिरसि[7] भूयासम् ॥३॥ यास्ते प्रजा उपदिष्टा नाहं तव ताः पर्योमि । उप ते ता दिशामि ॥४॥ ओजो मे बलम्मे चक्षुर्मे । तन्मे त्वयि तन्मे मोऽपहृथा इत्यादित्यमवोचत ॥५॥ तं तथैवाऽऽगत[8]मादित्यः प्रतिनन्दत्ययं ते भगवो लोकः । स ह नावयं लोक इति ॥६॥ यद्वाव मे त्वयीत्याह तद्वाव मे पुनर्देही-ति ॥७॥ किं नु ते मयीति । ओजो मे[9] बलम्मे चक्षुर्मे । तन्मे त्वयि[10] । तन्मे पुनर्देहीति । तदस्मा आदित्यः पुनर्ददाति ॥८॥ तमाह प्र मा वहेति । किमभीति । चन्द्रमसमि[11]ति । तं चन्द्रमसमभि-

२–दाति ॥

१–वत् । २ सम्यँर्दे । ३ अरोतिषि 'ति' खाक से कटा हुआ है, । ४ त्व् । ५ एवम् । ६–भूतिर् । ७ भूतिर् । ८ ऽऽगता । ९ मास्ति । १० त्वीयी, त्वी यीति । ११ चँन्–।

प्रवहति ॥९॥ स चन्द्रमसमाह सत्यस्य[12] पन्था न त्वा[13] जहाति।
अमृतस्य[14] पन्था न त्वा जहाति ॥१०॥ नवो नवो भवसि जाय-
मानो भरो नाम ब्राह्मण उपास्से। तस्मात्ते सत्या उभये देवमनुष्या
अन्नाद्यम्भरन्ति। अन्नादो भवति यस्त्वैवं[4] वेद[5] ॥११॥ सम्भूर्देवो-
ऽसि सम्हम्भूयासम्। आभूतिरस्याभूयासम्। भूतिरसि
भूयासम् ॥१२॥ यास्ते प्रजा उपदिष्टा नाहं तव ताः पर्येमि।
उप ते ता दिशामि ॥१३॥ मनो मे रेतो मे प्रजा मे पुनस्सम्भू-
तिर्मे[15, 16] तन्मे त्वयि तन्मे मोऽपहृथा इति चन्द्रमसमवोचत् ॥१४॥ तं
तथैवाऽऽगतं चन्द्रमाः प्रतिनन्दत्ययं ते भगवो लोकः। सह नावयं
लोक इति॥१५॥ यद्राव मे त्वयीसाह तद्राव मे पुनर्देहीति॥१६॥
किं नु ते मयीति। मनो[17] मे रतो मे प्रजा मे पुनस्सम्भूतिर्मे[18]। तन्मे
त्वयि। तन्मे पुनर्देहीति। तदस्मै चन्द्रमाः पुनर्ददाति ॥१७॥
तमाह प्र मा वहेति ॥१८॥३॥२७॥

पञ्चमेऽनुवाके ऽष्टमः खण्डः।

किमभीति। ब्रह्मणो[1] लोकमिति। तमादित्यमभिप्रवहति ॥१॥
स आदित्यमाह प्र मा वहेति। किमभीति। ब्रह्मणो[2] लोकमिति।

---

११ चन्द्र–। १२ वा। १३–मास। १४ नास्ति, "अमृतस्य पन्था ....देवोऽसि समहम्"। १५–र्ति। १६ मे, म। १७ किं नु॥
१ प्रथमो। २ आह–।

तं चन्द्रमसमभिप्रवहति[3] । स एवमेते देवते अनुसंचरति[4] ॥२॥ एषोऽन्तोऽतः परः प्रवाहो नास्ति[5] । यातु कॉंश्चाऽतः प्राचो लोकानभ्यवादिष्म[6] ते[7] सर्व आप्ता भवन्ति ते जितास्तेष्वस्य सर्वेषु कामचारो भवति य एवं वेद ॥३॥ स यदि कामयेत पुनरिहाऽऽजायेयेति यस्मिन् कुलेऽभिध्यायेद्यदि ब्राह्मणकुले यदि राजकुले तस्मिन्नाजायते । स एतमेव लोकम्पुनः प्रजानन्नभ्यारोहन्नेति ॥४॥ तदु होवाच शाट्यायनिर्बहुव्याहितो वा अयम्बहुशो लोकः । एतस्य वै कामाय[8] नु[9] ब्रुवते [वा] श्राम्यन्ति[10] वा क एतत्प्राप्य पुनरिहेयादत्रैव स्यादिति ॥५॥१२८॥

पञ्चमेऽनुवाके नवमः खण्डः । पञ्चमोऽनुवाकस्समाप्तः ।

———— :०: ————

उच्चैश्श्रवा[1] ह कौपयेयः[2] कौरव्यो राजाऽऽस । तस्य ह केशी[3] दार्भ्यः पाञ्चालो राजा स्वस्रीय[4] आस । तौ[5] हाऽन्योन्यस्य प्रियावासतुः ॥१॥ स होच्चैश्श्रवाः[1] कौपयेयो[2]ऽस्माल्लोकात् प्रेयाय । तस्मिन् ह प्रेते केशी[3] दार्भ्योऽरण्ये मृगयां चचाराऽप्रिगं विनिनी-

---

३–अन्ति, । ४ 'एषोत्यमभिप्रवहति । ∽मा वहेऽति । किमभीऽति । ब्रह्मणो लोकमिति..........देवते अनु संचरति' अधिक है । ५ ऽस्मि । ६–दिष्ठ । ७ तेषु । ८ 'वा' अधिक है । ९ ध्रुवते । १० 'चा' अधिक है ।

१–पैश्र्–। २ कौव–। ३ केश्ची, केश्या । ४ स्वस्री–। ५ 'गा' लाल रङ्ग में कटा हुआ अधिक है ।

षमाणः ॥२॥ स ह तथैव पल्ययमानो मृगान् प्रसरन्न[6]न्तरेणौ-
चोच्चैःश्रवसं[7] कौपेयमभिजगाम ॥३॥ तं होवाच दृप्यामि स्वी३-
ज्जानामीति । न दृप्यसीति होवाच जानासि । स[8] एवास्मि यम्मा
मन्यस इति ॥४॥ अथ यद्भगव आहुरिति होवाच य आविर्भ[9]व-
त्यन्येऽस्य लोकमुपयन्तीत्यथ कथमशक्तो म आविर्भवितुमिति ॥५॥
ओमिति होवाच यदा वै तस्य लोकस्य गोप्तारमविदेऽतस्त आवि-
रभूवमाभियं[10] चास्य विनेष्याम्यनु चैनं शासिष्यामीति ॥६॥ तथा
भगव इति हो[11]वाच । तं वै नुत्वा परिष्वजा इति । तं ह स्म
परिष्वजमानो यथा धूमं वापीयाद्वायुं वा[12]काशं वाग्न्यर्चिं वाऽपो वैवं
ह स्मैनं व्येति । न ह स्मैनम्परिष्वङ्गायोपलभते ॥७॥३।२८॥

षष्ठेऽनुवाके प्रथमः खण्डः ।

स होवाच[1] यद्वै ते पुरा रूपमासीत्तत्ते रूपम् । न[2] तु त्वा परि-
ष्वङ्गा[3]योपलभ[4] इति ॥१॥ ओमिति होवाच ब्राह्मणो वै मे साम
विद्वान् साम्नोद्गायत् । स मेऽशरीरेण साम्ना शरी[5]राण्यधूनोत् ।
तद्यस्य वै किल साम विद्वान् साम्नोद्गायति देवतानामेव सलोकतां
गमयतीति ॥२॥ पतङ्गः प्राजापत्य इति होवाच प्रजापतेः प्रियः

---

६ प्रसरन्— । ७ ऽच्चैश्र—,ऽच्चैश्च— । ८ य । ९ भत । १० घा ।
११ हे । १२ वॅ ॥

१ ऽच । २ ने । ३—ोष्ठी । ४ ऽप लभते । ५—राण्य् ।

पुत्र आस[6]। स तस्मा एतत् सामाब्रवीत्। तेन स ऋषीणामुद्-गायत्[7]। त एत ऋषयो धूतशरीरा इति ॥३॥ एतेनो एव साम्नेति होवाच प्रजापतिर्देवानामुदगायत्। त एत उपरि देवा धूतशरीरा इति ।४॥ तस्मिन् हैनमनुशशास। तं हानुशिष्यो-वाच यस्मैवैतत[8] साम विद्यात् स स्मैव त उद्गायत्विति ॥५॥ स हानुशिष्ट[9] आजगाम। स ह स्म कुरुपञ्चालानाम्ब्राह्मणानुपपृ[10]-च्छमानश्चरति ॥६॥३।३०॥

षष्ठेऽनुवाके द्वितीयः खण्डः।

व्यूढच्छन्दसा वै द्वादशाहेन यक्ष्यमाणोऽस्मि[1]। स यो[2] वस्तत्साम[3] वेद[4] यदहं वेद स एव म उद्गास्यति। मीमांसध्वमिति ॥१॥ तस्मै ह मीमांसमानानामेकश्चन [न] सम्प्रत्यभिदधाति ॥२॥ स ह तथैव पल्ययमानश्श्मशाने[5] वा[6] वने[7] वाऽऽहिताग्नि[8]या-नमुपाधावयांचकार। तं ह चायमानः प्रजहौ ॥३॥ तं हो-वाच कोऽसीति। ब्राह्मणोऽस्मि मातृदो भाल्ल इति ॥४॥ स किं वेत्थेति। सामेति ॥५॥ ओमिति होवाच। व्यूढच्छन्दसा वै द्वादशाहेन यक्ष्यमाणोऽस्मि[10]। स यदि तत्साम वेत्थ यदहं वेद[11] त्व-

---

६ आ। ७ तं। ८ वै। ९—ष्ठा। १०—पाञ्चे—।

१—स्म—। २ यदि। ३ त्वम। ४ वेत्थ। ५ श्मश्रुनाम। ६ वाव; साध। ७ न। ८ ख, उप। ९ ख्वाय, न, जायान। १०—स्म—। ११ 'यदहं वेत्थ' अधिक है।

मेव मु उद्गास्यासि[12] । मीमांसस्वेति ॥६॥ तस्मै ह मीमांसमानस्त-
देव[13] सम्प्रत्यभिदधौ ॥७॥ तं हौवाचाऽयम्म उद्गास्यतीति[14] ॥८॥
तस्मै ह कुरुपञ्चालानाम्[15]ब्राह्मणा असूयन्त[16] आहुरेषु ह वा अयं
कुल्येषु[17] सत्सूद्गास्यति[18] । कस्मा अयमलमिति[19] ॥ ९ ॥ अलमु न्वै[20]
मह्यमिति हस्माऽह । सैवाऽलम्मस्याऽलमु मतायैद्गतस्य हाऽल-
मेवोज्जगौ[21,22] । तस्मादालम्यैलाजोद्गातेत्याख्यापयन्ति ॥१०॥३।३।१॥

षष्ठेऽनुवाके तृतीयः खण्डः ।

तद्ध सात्यकीर्ता आहुर्या वयं देवतामुपास्महे एकमेव वयं तस्यै
देवतायै रूपं गव्यादिशाम एकं वाहन एकं हस्तिन्येकम्पुरुष एकं
सर्वेषु भूतेषु। तस्या एवेदं देवतायै सर्वं रूपमिति॥१॥ तदेतदेकमेव
रूपम्प्राण एव । यावद्ध्येव प्राणेन प्राणिति तावद्रूपम्भवति तद्रू-[1]
पम्भवति ॥२॥ तदथ यदा प्राण उत्क्रामति दार्वेवेव[2] भूतोऽनर्थ्यः[3,4]
परिशिष्यते न किंचन रूपम् ॥३॥ तस्यान्तरात्मा तपः । तस्मा-
त्तप्यमानस्योष्णतरः प्राणो भवति ॥४॥ तपसोऽन्तरात्माग्निः ।
स निरुक्तः । तस्मात्स दहति[5] ॥५॥ अथाधिदेवतम्[6] । इयमेवैषा

१२–ति सैं ठीक किया हुआ। १३ 'त' अधिक है। १४ नास्ति 'इति'।
१५–पाञ्च–। १६ आसू–। १७ कुलेषु । १८ आस–। १९ अयमल। २० न्वै
इसके आगे 'म' लाल रंग में कटा हुआ है। २१ 'म' अधिक है। २२ पवौ॥

१ मद्रू। २ पयो। ३–प। ४–थः। ५ दति। ६–दैव–। ७–प्र–।

देवता योऽयम्पवते । तस्मिन्नेतस्मिन्नापोऽन्तः । तदन्नम । सो-ऽरूत्त उपासितव्यः । यदस्मिन्नापोऽन्तस्तेनाऽरूत्तः ॥६॥ तस्या-न्तरात्मा तपस् । तस्मादेष आतपत्युष्णतरः पवते ॥७॥ तपसो-ऽन्तरात्मा विद्युत । स निरुक्तः । तस्मात्सोऽपि दहति ॥८॥ तानि वा एतानि चत्वारि साम प्राणो वाङ्मनस्स्वरः । स एष प्राणो वाचा करोति मनो नेत्रः । तस्य स्वर एव प्रजाः । प्रजावान् भवति य एवं वेद ॥९॥३॥३२॥

षष्ठेऽनुवाके चतुर्थः खण्डः ।

स यो वायुः प्राण एव सः । योऽग्निर्वागेव सा । यश्चन्द्रमा मन एव तद् । य[1] आदित्यस्स्वर एव सः । तस्मादेतमादित्यमाहु-स्स्वर एतीति ॥१॥ स यो ह वा अमूर्देवता उपास्ते या अमूरधि-देवतं दूरूपा[2] वा एता दुरनुसम्प्राप्या[3] इव । कस्तद्वेद यद्येता अनु वा सम्प्राप्नुयान्न वा ॥२॥ अथ य एना अध्यात्ममुपास्ते स हा-ऽन्तिदेवो भवति । निर्जीर्यन्तीव[4] वा इत एता । [त] अस्य वा एतास्शरीरस्य सह प्राणेन निर्जीर्यन्ति । क उ एव तद्वेद यद्येता अनु वा सम्प्राप्नुयान्न वा[5] ॥३॥ अथ य एना उभयीरेकधा[6] भव-

'तानि ध्यासितव्यो (!) यदस्मिन्नापोऽन्तम्—तस्मात्सोऽपि दहति' दोबारा आया है ॥

१ यथा । २—दूरूर्वे । ३—प्रापा । ४ वा । ५ वे । ६ उभेधीर ।

न्तीर्वेद स एवानुष्टुभा साम वेद स आत्मानं वेद स ब्रह्मवेद ॥४॥ तदाहुः प्रादेशमात्राद्वा इत एता एकम्भवन्ति । अतो ह्ययम्प्राण-स्स्वर्य[७] उपर्युपरि[८] वर्तन[९] इति ॥५॥ अथ हैक आहुश्चतुरंगुलाद्वा[१०] इत एता एकम्भवन्तीति । अतो ह्येवायम्प्राणस्स्वर्य[७] उपर्युपरि[८][९] वर्तत इति ॥६॥ स एष ब्राह्मण[११] आवर्तः । स य एवमेतम्ब्रह्मण[११] आवर्तं वेदाऽभ्येनम्प्रजाः पशव आवर्तन्ते सर्वमायुरेति ॥७॥ स यो हैवं विद्वान्प्राणेन प्राणयाऽपानेनाऽपान्य मनसैता उभयोर्दे-वता आत्मन्येत्य मुख आधत्ते तस्य सर्वमाप्तम्भवति सर्वं जितम् । न हास्य कश्चन कामोऽनाप्तो भवति य एवं वेद ॥८॥२॥१३॥

षष्ठेऽनुवाके पञ्चमः खण्डः ।

तदेतन्मिथुनं यद्वाक्च प्राणश्च । मिथुनमृक्सामे । आचतुरं वाव[१] मिथुनम्प्रजननम् ॥१॥ तद्यत्राऽद आह सोमः पवत इति वोपावर्तध्वमिति वा तत्सहैव वाचा मनसा प्राणेन स्वरेण हिङ्-कुर्वन्ति । तद् हिङ्कारेण[२] मिथुनं क्रियते ॥२॥ सहैव वाचा मनसा प्राणेन स्वरेण निधनमुपयन्ति । तन्निधनेन मिथुनं क्रियते ॥३॥ तत्सप्तविधं साम्नः । सप्तकृत्व[३] उद्गाताऽऽत्मानं च यजमानं च शरीरात्प्रजनयति ॥४॥ यादृशस्यो ह वै रेतो भवति तादृशं

७–ष्य । ८ स्वप्य् । ९–रि (!) । १०–ॐ हदू । ११ ब्रह्मन ॥

१ पाप । २–कार । ३–प्रा ।

सम्भवति यदि वै पुरुषस्य पुरुष एव यदि गोर्गौरेव यद्यश्वस्याश्व एव यदि मृगस्य मृगएव। यस्यैव रेतो भवति तदेव सम्भवति ॥५॥ तद्यथा ह वै सुवर्णं हिरण्यमग्नौ प्रास्यमानं[५] कल्याणतरं कल्याणतरम्भवति एवमेव कल्याणतरेण कल्याणतरेणात्मना सम्भवति य एवं वेद ॥६॥ तदेतदृचा[४]भ्यनूच्यते ॥७॥३।३४॥

षष्ठेऽनुवाके षष्ठः खण्डः।

पतङ्गमक्तम[१]सुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः। समुद्रे अन्तः कवयो विचक्षते मरीचीनाम्पदमिच्छन्ति वेधस इति ॥१॥ पतङ्गमक्तमिति। प्राणो वै पतङ्गः। पतन्निव ह्येष्वङ्गेष्वति रथमुदीक्षते[२]। पतङ्ग इत्याचक्षते ॥२॥ असुरस्य माययेति। मनो[३] वा असुरम्। तद्ध्यसुषु रमते। तस्यैष माययाक्तः ॥३॥ हृदा पश्यन्ति मनसा विपश्चित इति। हृदैव[५] ह्येते[६] पश्यन्ति यन्मनसा विपश्चितः ॥४॥ समुद्रे अन्तः कवयो विचक्षत इति। पुरुषो वै समुद्र एवंविद उ कवयः। त[७] इमाम्पुरुषेऽन्तर्वाचं विचक्षते ॥५॥ मरीचीनाम्पदमिच्छन्ति वेधस इति। मरीच्य इव वा एता देवता यदग्निर्वायुरादित्यश्चन्द्रमाः ॥६॥ न ह

---

४ ऋच्या। ५–स्या–॥

१ मक्तम। २–ता:। ३–म। ४ न। ५ हृ। ६ एवं। ७ स।

वा एतासां देवतानाम्पदमस्ति । पदेनो ह वै पुनर्मृत्युरन्वेति ॥७॥
तदेतदनन्वितं साम पुनर्मृत्युना । अति पुनर्मृत्युं तरति य एवं
वेद ॥८॥३।३५॥

षष्ठेऽनुवाके सप्तमः खण्डः ।

पतङ्गो वाचम्मनसा बिभर्ति तां गन्धर्वोऽवदद्गर्भे[1] अन्तः ।
तां द्योतमानां[2] स्वर्यम्मनीषामृतस्य पदे कवयो निपान्ति
इति ॥१॥ पतङ्गो वाचम्मनसा बिभर्तीति । प्राणो वै पतङ्गः । स
इमां वाचम्मनसा बिभर्ति ॥२॥ तां गन्धर्वोऽवदद्[3]गर्भे अन्तरिति ।
प्राणो वै गन्धर्वः पुरुष उ गर्भः । स इमाम्पुरुषेऽन्तर्[4]वाचं वदति ॥३॥
तां द्योतमानां स्वर्[5]यम्मनीषामिति । स्वर्या ह्येषा मनीषा यद्वाक् ॥४॥
ऋतस्य पदे कवयो निपान्तीति । मनो वा ऋतमेवंविद उ कवयः ।
ओमित्येतदेवाक्षरमृतम्[6] । तेन यदृचम्मीमाँसन्ते यद्यजुर्यत्साम
तदेनां निपान्ति ॥५॥३।३६॥

षष्ठेऽनुवाकेऽष्टमः खण्डः ।

८वे ।

१–वो । २–मा । ३ वदति । ४ मन्त्–। ५–म । ६ 'यत्साम' के आगे 'ओमित्ये–ऋतम' है ॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तरम् ।

स सध्रीचीस्स[1] विषूचीर्वसान आ वरीवर्त्ति भुवनेष्वन्तर् इति ॥१॥

अपश्यं गोपामनिपद्यमानमिति । प्राणो वै गोपाः । स हीदं सर्वमनिपद्यमानो गोपायति ॥२॥ आ च परा च पथिभिश्चरन्तमिति । तद्ये च ह वा इमे प्राणा अमी च रश्मय एतैर्ह वा एष एतदा च परा च पथिभिश्चरति ॥३॥ स सध्रीचीस्स विषूचीर्वसान इति । सध्रीचीश्च ह्येष एतद्विषूचीश्च प्रजा वस्ते[2] ॥४॥ आ वरीवर्त्ति भुवनेष्वन्तरिति । एष ह्येवैषु भुवनेष्वन्तरावरीवर्त्ति ॥५॥ स एष इन्द्र उद्गीथः । स यदैष इन्द्र उद्गीथ आगच्छति नैवोद्गातुश्चोपगातॄणां[3] च विज्ञायते । इत एवोर्ध्वस्स्वरुदेति[4] । स उपरि मूर्ध्नो ललायति ॥६॥ स विद्यादागमदिन्द्रो[5] नेह कश्चन पाप्मा न्यङ्गः परिशेक्ष्यत[6] इति । तस्मिन् ह न कश्चन पाप्मा न्यङ्गः परिशिष्यते ॥७॥ तदेतद्[7] भ्रातृव्यं[8] साम । न ह वा इन्द्रः कंचन भ्रातृव्यम्पश्यते । स यथेन्द्रो न कंचन भ्रातृव्यम्पश्यत एवमेव [न] कंचन भ्रातृव्यम्पश्यते य एतदेवं वेदाथो यस्यैवं विद्वानुद्गायति ॥८॥३।३७॥

षष्ठेऽनुवाके नवमः खण्डः । षष्ठोऽनुवाकस्समाप्तः ॥

१–रोच्–इस पाद के प्रारम्भ में 'अर्ति' वेला अधिक है। २ वस्ते। ३–तॄणा–। ४–ध्व। ५ आगाद्। ६ परिशे–। ७ मूल। ८ भ्र–॥

प्रजापतिम्ब्रह्माऽसृजत । तमपश्यममुखम[1]सृजत ॥१॥ तमप-
श्यममुखं[2] शयानम्ब्रह्माऽऽविशत् । पुरुष्यं[3] तत् । प्राणो वै ब्रह्म ।
प्राणो वावैनं तदाविशत् ॥२॥ स उदतिष्ठत् प्रजानां जनयिता ।
तं रक्षांस्य[4]न्वसचन्त[5] ॥३॥ तमेतदेव साम गायन्नत्रायत । यद्गायन्[6]-
त्रायत तद्गायत्रस्य गायत्रत्वम् ॥४॥ त्रायत एनं सर्वस्मात्पाप्मनो
मुच्यते य एवं वेद ॥५॥ तमुपाऽस्मै गायता नर इत्यृचाऽऽश्रव-
सीयेनो[7]पागायन्[8] ॥६॥ यदुपाऽस्मै गायता नर इति तेन गायत्रम-
भवत् । तस्माद्दैव प्रतिपत्कार्या ॥७॥ पवमानयेन्दावा अभि
देवमिया-हुम-भात्ताता इति षोडशाक्षराण्यभ्यगायन्त[13] । षोडशकलं[10]
वै ब्रह्म । कलाश एवैनं तद्ब्रह्माऽऽविशत् ॥८॥ तदेतच्चतुर्विंशत्यक्षरं
गायत्रम् । अष्टाक्षरः[11] प्रस्तावः । षोडशाक्षरं गीतं तच्चतुर्विंशतिस्स-
म्पद्यन्ते । चतुर्विंशत्यर्धमासस्[14]संवत्सरः । संवत्सरस्साम ॥९॥ ता[12]
ऋचश्शरीरेण मृत्युरन्वैतत् । तद्यच्छरीरवत्तन्मृत्योरासम् । अथ यद-
शरीरं तदमृतम् । तस्याऽशरीरेण साम्ना शरीराण्यधूनोत ॥१०॥
३।३८॥

सप्तमेऽनुवाके प्रथमः खण्डः ।

---

१ मुख- । २ अप्रव- । ३-षं । ४-आस्य । ५ अनुसच- । ६ गा-यत्रैत । ७ श्रवसीय- । ८ ऽपॅगा- । १०-लाम । ११ प्रास्त- । १२ तम । १३-यत । १४-सास ॥

ओवा३चोवा३चोवा३च् हुम्भा ओवा इति षोडशाक्षरा-यमभ्यगायत। षोडशकलो[1] वै पुरुषः। कलाश एवास्य तच्छरी-राण्यधूनोत् ॥१॥ स एषोऽपहतपाप्मा धूतशरीरः। तदेक्क्रिया-क्षतियुदासंगायसो इत्युदास। आ इति आदद्यात् । वागिति तद्ब्रह्म। तदिदन्तरिक्षं सोऽयं वायुः पवते। हुमिति चन्द्रमाः। भा इत्यादित्यः ॥२॥ एतस्य ह वा इदमक्षरस्य ऋतोर्[2]भातीत्याच-क्षते ॥३॥ एतस्य ह वा इदमक्षरस्य ऋतोर[3]भ्रमित्याचक्षते ॥४॥ एतस्य ह वा इदमक्षरस्य[4] ऋतोः[2] कुभ्रमित्याचक्षते ॥५॥ एतस्य ह वा इदमक्षरस्य ऋतो[2]श्शुभ्रमित्याचक्षते ॥६॥ एतस्य ह वा इदमक्षरस्य ऋतो[3]र्[5]ऋषभ इत्याचक्षते ॥७॥ एतस्य ह वा इदमक्षरस्य ऋतो[2]र्दर्भ[6] इत्याचक्षते ॥८॥ एतस्य ह वा इदमक्षरस्य ऋतोर्यो[2] भा[7]तीत्याचक्षते ॥९॥ एतस्य ह वा इदमक्षरस्य ऋतो[2]स्सम्भवती-त्याचक्षते ॥१०॥ तद्यत्किं च भा३ इति च भा[8]३ इति च तदेत-न्मिथुनं गायत्रम्। प्र मिथुनेन जायते य एवं वेद ॥११॥ ३।३२॥

सप्तमेऽनुवाके द्वितीयः खण्डः।

१-आ। २ ऋतु-। ३ सर्वत्र ऐसा पाठ। ४-स। ५ वृषभ-। ६ दभ, सम्भवती। ७ य भंती। ८ भ्र्॥

तदेतदमृतं गायत्रम् । एतेन वै प्रजापतिरमृतत्वमगच्छदेतेन देवा एतेनर्षयः ॥१॥ तदेतद्ब्रह्म प्रजापतयेऽब्रवीत् प्रजापतिः[1] परमेष्ठिने प्राजापत्याय परमेष्ठी प्राजापत्यो देवाय सवित्रे देवस्सविता-ऽग्नयेऽग्निरिन्द्रायेन्द्रः काश्यपाय काश्यप ऋश्यशृङ्गाय काश्यपाय ऋश्यशृङ्गः काश्यपो देवतरसे श्यावसायनाय[2] काश्यपाय देवतराश्श्या-वसायनः काश्यपश्शुषाय वाह्नेयाय काश्यपाय शुषो[3] वाह्नेयः[4] का-श्यप इन्द्रोताय[5] दैवापाय शौनकायेन्द्रोतो दैवापश्शौनको[6] दृतय ऐन्द्रोतये शौनकाय दृतिरैन्द्रोतिश्शौनकः पुलुषाय प्राचीनयोग्याय पुलुषः प्राचीनयोग्यस्सत्ययज्ञाय पौलुषये प्राचीनयोग्याय सत्य-यज्ञः पौलुषिः प्राचीनयोग्यस्सोमशुष्माय सात्ययज्ञाय प्राचीन-योग्याय सोमशुष्मस्सात्ययज्ञिः प्राचीनयोग्यो हृत्स्वाशयायाऽऽल्ल-केयाय[7] माहावृषाय राज्ञे हृत्स्वाशय आल्लकेयो माहावृषो राजा जनश्रुताय[8] काण्ड्विय्याय जनश्रुतः काण्ड्विय्यस्सायकाय जानश्रुते-याय काण्ड्विय्याय सायको जानश्रुतेयः काण्ड्विय्यो नगरिणे जानश्रुतेयाय काण्ड्विय्याय नगरी जानश्रुतेयः काण्ड्विय्यश्शङ्खाय[10]

---

१ 'काश्यपो' अधिक है । २ श्यावसाय । ३ भूषो, शूषो । ४ वाह्ने । ५ इन्द्रात्- । ६ -पिश । ७ आल्क- । ८ 'स सात्ययज्ञिः प्राचीनयोग्यो हृत्स्वा' अधिक है । ९ जानुश्र-, जानश्र- । १० शिग्र- ।

शाट्यायनय[११] आत्रेयाय शङ्खश्शाट्यायनिरात्रेयो रामाय क्रातुजातेयाय वैयाघ्रपद्याय रामः क्रातुजातेयो वैयाघ्रपद्यः—॥२॥३॥४०॥

सप्तमेऽनुवाके तृतीयः खण्डः।

—शङ्खाय बाभ्रव्याय शङ्खो बाभ्रव्यो दत्ताय कातायनय[१] आत्रेयाय दत्तः कातायनिरात्रेयः कँसाय वारकये कँसो वारकिः प्रोष्ठपादाय वारक्याय[२] प्रोष्ठपादो वारक्यः कँसाय वारक्याय[३] कँसो वारक्यो जयन्ताय वारक्याय जयन्तो वारक्यः कुबेराय वारक्याय कुबेरो वारक्यो जयन्ताय वारक्याय जयन्तो वारक्यो जनश्रुताय वारक्याय जनश्रुतो वारक्यस्सुदत्ताय[४] पाराशर्याय सुदत्तः पाराशर्योऽषाढायोत्तराय[५] पाराशर्यायाऽषाढ[५] उत्तरः पाराशर्यो विपश्चिते शकुनिमित्राय पाराशर्याय विपश्चिच्छकुनिमित्रः पाराशर्यो जयन्ताय पाराशर्याय जयन्तः पाराशर्यः—॥२॥३॥४१॥

सप्तमेऽनुवाके चतुर्थः खण्डः।

—श्यामजयन्ताय लौहित्याय श्यामजयन्तो लौहित्यः पल्लिगुप्ताय लौहित्याय पल्लिगुप्तो लौहित्यस्सत्यश्रवसे लौहित्याय[१] सत्य-

---

११—नाय।

१—नायं, कात्याजय—। २ वर—। ३ प—। ४ सुदत्ता, सुदत्तताय।
५ षाढ् (!), षाढ्—।

१ लोह्—।

श्रवा लौहिखः कृष्णधृतये सात्यकये कृष्णधृतिस्सात्यकिश्श्याम-सुजयन्ताय लौहित्याय श्यामसुजयन्तो लौहित्यः कृष्णदत्ताय लौहित्याय कृष्णदत्तो लौहित्यो मित्रभूतये लौहित्याय मित्रभूति[2] लौहित्यश्श्यामजयन्ताय लौहित्याय श्यामजयन्तो लौहित्यस्त्रि-वेदाय कृष्णरातायः लौहित्याय त्रिवेदः कृष्णरातो लौहित्यो यशस्विने जयन्ताय लौहित्याय[3] यशस्वी जयन्तो लौहित्यो जयकाय लौहित्याय जयको लौहित्यः कृष्णराताय लौहित्याय कृष्णरातो लौहित्यो दक्षजयन्ताय लौहित्याय दक्षजयन्तो लौहित्यो विपश्चिते दृढजयन्ताय लौहित्याय विपश्चिद्दृढजयन्तो लौहित्यो वैपश्चिताय[4] दार्ढजयन्तये दृढजयन्ताय लौहित्याय वैपश्चितो दार्ढ-जयन्तिर्[5]दृढजयन्तो लौहित्यो वैपश्चिताय दार्ढजयन्तये गुप्ताय लौहित्याय ॥१॥ तदेतदमृतं गायत्रमथ यान्यन्यानि गीतानि काम्यान्येव तानि काम्यान्येव तानि ॥२॥३॥४॥

सप्तमेऽनुवाके प्रथमः खण्डः। सप्तमोऽनुवाकस्समाप्तः॥

२–ति। ३ 'श्यामजयन्तो लौहित्याय' अधिक है। ४ वैपिप–। ५–दृ॥

[चतुर्थोऽध्यायः]

श्वेताश्वो दर्शतो हरिनीलोऽसि हरितस्पृक्षस्समानबुद्धो मा
हिंसीः । न मां त्वं वेत्थ प्रद्रव ॥१॥ यदभ्यवचरणोऽ[1]भ्यवैषि
स्वपन्तम्पुरुषमकोविदमश्ममयेन[2] वर्मणा वरुणोऽन्तर्दधातु मा ॥२॥
यदभ्यवचरणोऽ[1]भ्यवैषि स्वपन्तम्पुरुषमको विदमयस्मयेन वर्मणा
वरुणोऽन्तर्दधातु मा ॥३॥ यदभ्यवचरणोऽ[3]भ्यवैषि स्वपन्तम्पु-
रुषमकोविदं लोहमयेन वर्मणा वरुणोऽन्तर्दधातु मा ॥४॥
यदभ्यवचरणोऽ[2]भ्यवैषि स्वपन्तम्पुरुषमकोविदं[4] रजतमयेन वर्मणा
वरुणोऽन्तर्दधातु मा ॥५॥ यदभ्यवचरणोऽ[1]भ्यवैषि स्वपन्तम्पुरु-
षमकोविदं सुवर्णमयेन वर्मणा वरुणोऽन्तर्दधातु मा ॥६॥

आयुर्माता[5] मतिः पिता नमस्त आविशोषय ।
प्रहो नामाऽसि विश्वायुस्तस्मै ते विश्वाहा[6] नमो

नमस्ताम्राय नमो वरुणाय[7] नमो जिघांसते ॥७॥ यक्ष्म राजन्मा[8] मां
हिंसीः । राजन् यक्ष्म मा हिंसीः । तयोस्संविदानयोस्सर्वमायुर-
[1]यान्यहम ॥८॥४।१॥

प्रथमोऽनुवाकस्समाप्तः ।

१–णा । २ इति मन्ममयेन । ३ अयाएय । ४ संक्षेप है ।
५ मातन । ६–चाह्वाय । ७ रुणाय । ८ यं ॥

पुरुषो वै यज्ञः ॥१॥ तस्य यानि चतुर्विंशतिर्वर्षाणि[1] तत्प्रातस्सवनम् । चतुर्विंशत्यक्षरा गायत्री । गायत्रम्प्रातस्सवनम् ॥२॥ तद्वसूनाम् । प्राणा[2] वै वसवः । प्राणा हीदं सर्वं वस्वाददते ॥३॥ स यद्येनमेतस्मिन् काल उपतपदुपद्रवेत्स ब्रूयात्प्राणा[3] वसव इदम्मे प्रातस्सवनं माध्यन्दिनेन सवनेनानुसंतनुतेति । अगदो हैव भवति ॥४॥ अथ यानि चतुश्चत्वारिंशतं वर्षाणि[4] तन्माध्यन्दिनं सवनम् । चतुश्चत्वारिंशदक्षरा त्रिष्टुप् । त्रैष्टुभं माध्यन्दिनं सवनम् ॥५॥ तद्रुद्राणाम् । प्राणा वै रुद्राः । प्राणा हीदं सर्वं रोदयन्ति ॥६॥ स यद्येनमेतस्मिन् काल उपतपदुपद्रवेत स ब्रूयात्प्राणा रुद्रा इदम्मे माध्यन्दिनं सवनं तृतीयसवनेनानुसंतनुतेति । अगदो हैव भवति ॥७॥ अथ यान्यष्टाचत्वारिंशतं वर्षाणि तत् तृतीयसवनम् । अष्टाचत्वारिंशदक्षरा जगती । जागतं तृतीयसवनम् ॥८॥ तदादित्यानाम् । प्राणा वा आदित्याः । प्राणा हीदं सर्वमाददते ॥९॥ स यद्येनमेतस्मिन् काल उपतपदुपद्रवेत्स ब्रूयात्प्राणा आदित्या इदम्मे तृतीयसवनमायुषानुसंतनुतेति । अगदो हैव भवति ॥१०॥ एतद्ध तद्विद्वान् ब्राह्मण

१–ति । २–णा । ३ वे अधिक है । ४ वर्षाणि ।

उवाच महिदास ऐतरेय उपतपति किमिदमुपतपसि योऽहमनेनो-

पतपता न प्रेष्यामीति । स ह षोडशशतं वर्षाणि जिजीव । प्र ह

षोडशशतं वर्षाणि जीवति नैनम्प्राणास्सा[5]म्यायुषो जहाति य एवं

वेद ॥११॥४।२॥

द्वितीयोऽनुवाकस्समाप्तः ।

त्र्यायु[1]षं कश्यपस्य जमदग्नेस्त्र्यायु[1]षम् ।

त्रीण्य[2]मृतस्य पुष्पाणि त्रीण्या[3]यूंषि मेऽकृणोः ॥१॥

स नो मयोभूः पितवा[4]विशस्व शान्तिको[5] य[6]स्तनुवे स्योनः ॥२॥

येऽग्नयः पुरीष्याः प्रविष्टाः पृथिवीमनु ।

तेषां[7] त्वमस्युत्तमः प्र[8] णो जीवातवे सुव ॥३।४।३॥

तृतीयोऽनुवाकस्समाप्तः ।

अरण्यस्य वत्सोऽसि विश्वनामा[1] विश्वाभिरक्षणो[2]ऽपाम्पक्वो-

ऽसि वरुणस्य दूतोऽन्तर्धिनाम[3] ॥१॥ यथा त्वममृतोर्मर्त्ये[5]भ्योऽन्तर्हितो-

ऽस्येवं त्वमस्मानघायुभ्योऽन्तर्धेहि। अन्तर्धिरसि स्तेनेभ्यः॥२॥४।४॥

चतुर्थोऽनुवाकस्समाप्तः ।

---

५ सम्य् ॥

१ त्रियायु– । २ त्रीण् । ३ आयुंषि । ४–तो । ५ चंतोका ।
६ य । ७–श्रों । ८ प्रा ।

१ विश्वोद्–र्भ । २–चमा । ३ ऽदूर्धंनाम । ४ त । ५ मर्त्येभ्यो ॥

व्युषि सविता भवस्युदेष्यन् विष्णुरुद्यन्पुरुष उदितो बृहस्पति-
रभिप्रयन्मघवेन्द्रो वैकुण्ठो माध्यन्दिने भगोऽपराह्ण[2] उग्रो देवो लो-
हितायन्नस्तमिते यमो भवसि ॥१॥ अश्वस्तु सोमो राजा निशाया-
म्पितृराज[3]स्स्वप्ने मनुष्यान्प्रविशसि पयसा पशून् ॥२॥ त्रिरात्रे
भवो भवस्यपररात्रेऽङ्गिरा अग्निहोत्रवेलायाम्भृगुः ॥३॥ तस्य तदे[4]-
तदेव मण्डलमूधः । तस्यैतौ स्तनौ यद्वाक् च प्राणश्च । ताभ्या-
म्मेधुक्ष्वाऽध्यायम्ब्रह्मचर्य[5]म्प्रजाम्पशून् स्वर्गं लोकं सजातवन-
स्याम ॥४॥ एता आशिष[6] आशासे । भूर्भुवस्स्वः । उदिते शुक्रमा-
दिश[7] । तदात्मन्दधे ॥५॥४५॥

पञ्चमोऽनुवाकस्समाप्तः ।

भगेरथो हैक्ष्वाको राजा कामप्रेण यज्ञेन यक्ष्यमाण आस ॥१॥
तदु ह कुरुपञ्चालाना[1]म्ब्राह्मणा ऊचुर्भगेरथो ह वा अयमैक्ष्वाको
राजा कामप्रे[2]ण यज्ञेन यक्ष्यमाणः । एते[3]न कथां वदिष्याम इति ॥२॥
तं हाऽभ्येयुः । तेभ्यो[4] हाऽभ्यागतेभ्योऽपचितीश्चकार ॥३॥ अथ
हैषां स भाग आवव्राजोप्त्वा[5] केशश्मश्रूणि नखानिकृत्याऽऽज्ये-

१–ओ । २ पराह्णे । ३–ज । ४ त । ५–य । ६ आसिष ।
७ आदिष ॥

१–पाञ्च– । २ यक्षम– । ३ एततेन । ४ 'भा' अधिक है ।
५ उपत्वा

नाऽभ्यज्य दण्डोपानहम्बिभ्रत् ॥४॥ तान् होवाच ब्राह्मणा भगवन्तः कतमो वस्तद्वेद यथाऽऽश्रावितमत्याश्राविते देवान् गच्छत इति ॥५॥ अथ होवाच कतमो वस्तद्वेद यद्विदुषस्सूद्गाता सुहोता स्वध्वर्युस्सुमानुषविदाजायत इति ॥६॥ अथ होवाच कतमो वस्तद्वेद यच्छन्दाँसि प्रयुज्यन्ते यत्तानि सर्वाणि संस्तुतान्यभिसम्पद्यन्त इति ॥७॥ अथ होवाच कतमो वस्तद्वेद यथा गायत्र्या उत्तमे अक्षरे पुनर्यज्ञमपिगच्छत इति ॥८॥ अथ होवाच कतमो वस्तद्वेद यथा दक्षिणाः प्रतिगृहीता न हिंसन्तीति ॥९॥४६॥

षष्ठेऽनुवाके प्रथमः खण्डः ।

एतान् हैनान् पञ्च प्रश्नान् पप्रच्छ ॥१॥ तेषां ह कुरुपञ्चालानाम्बको दाल्भ्योऽनूचान आस ॥२॥ स होवाच यथाऽऽश्रावितमत्याश्राविते देवान् गच्छत इति प्राच्यां वै राजन् दिश्याश्रावितमत्याश्राविते देवान् गच्छतः । तस्मात्प्राङ्तिष्ठन्नाश्रावयति प्राङ् तिष्ठन्प्रत्याश्रावयतीति ॥३॥ अथ होवाच यद्विदुषस्सूद्गाता सुहोता स्वध्वर्युस्सुमानुषविदाजायत इति यो वै मनुष्यस्य सम्भूतिं वेदेति होवाच तस्य सूद्गाता सुहोता स्वध्वर्युस्सुमानुषवि-

---

६ ज्या ॥

१–पाञ्च्–। २ प्रत्य–। ३ सम्–। ६ प्रेच्–।

दांजायत इति प्राणा उ ह वाव राजन् मनुष्यस्य सम्भूतिरेवेति[४] ॥४॥ अथ होवाच यच्छन्दाँसि प्रयुज्यन्ते यत्तानि सर्वाणि संस्तुतान्यभिसम्पद्यन्त इति गायत्रीमु ह वाव राजन् सर्वाणि छन्दाँसि संस्तुतान्यभिसम्पद्यन्त इति ॥५॥ अथ होवाच यथा गायत्र्या उत्तमे अक्षरे पुनर्यज्ञमपिगच्छत इति वषट्कारेणो ह वाव राजन गायत्र्या उत्तमे अक्षरे पुनर्यज्ञमपिगच्छत इति ॥६॥ अथ होवाच[५] यथा दक्षिणाः प्रतिगृहीता न हिंसन्तीति—॥७॥४।७॥

षष्ठेऽनुवाके द्वितीयः खण्डः ।

—यो वै गायत्र्यै मुखं वेदेति होवाच तं दक्षिणा प्रतिगृहीता न हिंसन्तीति ॥१॥ अग्निर्ह वाव राजन् गायत्रीमुखम् । तस्माद्यदग्नावभ्याद[१]धाति भूयानेव[२] स तेन भवति वर्धते । एवमेवैवं विद्वान्ब्राह्मणः प्रतिगृह्णन्भूयानेव भवति वर्धत उ एवेति ॥२॥ स होवाचाऽनूचानो वै किलाऽयम्ब्राह्मण आस । त्वामहमनेन यज्ञेनैमीति ॥३॥ तस्य वै ते तथोद्वास्यामीति होवाच यथैकराडेव भूत्वा स्वर्गं लोकमेष्यसीति ॥४॥ तस्मा एतेन गायत्रेणो[३]द्गीथेनोज्जगौ । स हैकराडेव भूत्वा स्वर्गं लोकमियाय ।

---

४ सम्भूतिदूधुर, सम्भूतिर्खर । ५ है ॥

१ भ्यद्नू—। २—यॅन् । ३ गायत्र सौ ।

तेन[४] हैतेनैकराडेव भूत्वा स्वर्गं लोकमेति [य एवं वेद] ॥५॥ ओं वा इति द्वे अक्षरे। ओं वा इति चतुर्थे। ओं वा इति षष्ठे। हुम्भा ओं वागित्यष्टमे ॥६॥ तेन हैतेन प्रतीदर्शोऽस्य भयदस्याऽऽसमात्यस्योज्जगौ ॥७॥ तं होवाच किं त आगास्यामीति। स होवाच हरीमे देवाश्वा वागायेति। तथेति। तौ हास्मा आजगौ। तौ हैनमाजग्मतुः ॥८॥ स वा एष उद्गीथः कामानां स[६]म्पदों वा३चों वा३चों वा३च् हुम भा ओं वागिति। साङ्गो हैव स तनुरमृतस्सम्भवाति य एतदेवं वेदाथो यस्यैवं विद्वानुद्गायाति ॥९॥४॥८॥

षष्ठेऽनुवाके तृतीयः खण्डः। षष्ठोऽनुवाकस्समाप्तः॥

पुरुषो वै यज्ञः पुरुषो होद्गीथः। अथैत एव मृत्यवो यदग्निर्वायुरादित्यश्चन्द्रमाः ॥१॥ ते ह पुरुषं जायमानमेव मृत्युपाशैरभिदधाति। तस्य वाचमे[१]वाग्निरभिदधाति प्राणं वायुश्चक्षुरादित्यश्श्रोत्रं चन्द्रमाः ॥२॥ तदाहुस्स वा उद्गाता यो यजमानस्य[२] प्राणेभ्योऽधि मृत्युपाशानुन्मु[३]ञ्चतीति ॥३॥ तद्यस्यैवं विद्वान् प्रस्तौति य एवास्य वाचि मृत्युपाशस्तमेवास्योन्मुञ्चति ॥४॥ अथ यस्यैवं

---

४ तोन। ५–शो। ६ सम्वद्॥

१ अवा। २ यजा–। ३ उमुन्–।

विद्वानुद्गायति[4] य एवास्य प्राणे मृत्युपाशस्तमेवास्योन्मुञ्चति ॥५॥ अथ यस्यैवं विद्वान् प्रतिहरति[5] य एवास्य चक्षुषि[6] मृत्युपाशस्तमेवास्योन्मुञ्चति ॥६॥ अथ यस्यैवं विद्वान्निधनमुपैति[7] [8] य एवास्य श्रोत्रे मृत्युपाशस्तमेवास्योन्मुञ्चति ॥७॥ एवं वा एवंविदुद्गाता यजमानस्य प्राणेभ्योऽधिमृत्युपाशानुन्मुञ्चति[3] ॥८॥ तदाहुस्स वा उद्गाता यो यजमानस्य प्राणेभ्योऽधिमृत्युपाशानुन्मुच्याथैनं साङ्गं सतनुं सर्वमृत्योस्स्पृणातीति ॥९॥४॥९॥

सप्तमेऽनुवाके प्रथमः खण्डः ।

तद्यस्यैवं विद्वान्हिङ्करोति य एवास्य लोमसु मृत्युपाशस्तस्मादेवैनं स्पृणाति ॥१॥ अथ यस्यैवं विद्वान् प्रस्तौति य एवास्य त्वचि[1] मृत्युपाशस्तस्मादेवैनं स्पृणाति ॥२॥ अथ यस्यैवं विद्वानादिमादत्ते[2] य एवास्य मांसेषु मृत्युपाशस्तस्मादेवैनं स्पृणाति ॥३॥ अथ यस्यैवं विद्वानुद्गायति य एवास्य स्नावसु मृत्युपाशस्तस्मादेवैनं स्पृणाति ॥४॥ अथ यस्यैवं विद्वान्प्रतिहरति य एवास्याङ्गेषु मृत्युपाशस्तस्मादेवैनं स्पृणाति ॥५॥ अथ यस्यैवं विद्वानुपद्रवति य एवास्यास्थिषु मृत्युपाशस्तस्मादेवैनं स्पृणाति ॥६॥ अथ यस्यैवं

४–द्गा । ५ उद्गायति । ६ प्राणे । ७ नास्ति । ८ प्रतिहरति ॥

१ क्व– । २ था ।

विद्वान् निधनमुपैति य एवास्य मज्जसु मृत्युपाशस्स तस्मादेवैवं स्पृणाति ॥७॥ एवं वा एवंविदुद्गाता यजमानस्य प्राणेभ्येऽधि-मृत्युपाशानुन्मुच्याथैनं साङ्गं सतनुं सर्वमृत्योस्सपृणाति ॥८॥ तदा-हुस्स वा उद्गाता यो यजमानस्य प्राणेभ्योऽधिमृत्युपाशानुन्मुच्याथैनं साङ्गं सतनुं सर्वमृत्योस्स्पृत्वा स्वर्गे लोके सप्तधा दधातीति ॥९॥ स वा एष इन्द्र वैमृध उद्यन् भवति सवितोदितो मित्रस्संगवकाले[३] इन्द्रो वैकुण्ठो मध्यन्दिने समावर्तमानश्शर्व उग्रो देवो लोहितायन् प्रजापतिरेव संवेशे[४]ऽस्तमितः ॥१०॥ तद्यस्यैवं विद्वान् हिङ्करोति य एवास्योद्यतस्[५]स्वर्गो लोकस्तस्मिन्नेवैनं दधाति ॥११॥ अथ यस्यैवं विद्वान् प्रस्तौति य एवास्योदिते स्वर्गो लोकस्तस्मिन्नेवैनं दधाति ॥१२॥ अथ यस्यैवं विद्वानादिमादत्ते य एवास्य संगवकाले[३] स्वर्गो लोकस्तस्मिन्नेवैनं दधाति ॥१३॥ अथ यस्यैवं विद्वानुद्गायति य एवास्य मध्यन्दिने[६] स्वर्गो लोकस्तस्मिन्नेवैनं दधाति ॥१४॥ अथ यस्यैवं विद्वान् प्रतिहरति य एवास्यापराह्णे स्वर्गो लोकस्तस्मिन्ने-वैनं दधाति ॥१५॥ अथ यस्यैवं विद्वानुपद्रवति य[७] एवास्यास्तं[८]-[५]यतस्स्वर्गो लोकस्तस्मिन्नेवैनं दधाति ॥१६॥ अथ यस्यैवं विद्वान्नि-

---

३ सम्भवक-। ४—५,-भोजनायां गमा। ५-अ। ६ माध्न-। ७ स्र। ८ पेवा।

धनमुपैति य एवास्यास्तमिते स्वर्गो लोकस्तस्मिन्नेवैनं दधाति ॥१७॥ एवं वा एवंविदुद्गाता यजमानस्य प्राणेभ्योऽधिमृत्युपाशानुन्मुच्याथैनं साङ्गं सतनुं सर्वमृत्योस्स्पृत्वा स्वर्गे लोके सम्पधा[9] दधाति ॥१८॥४।१०॥

सप्तमेऽनुवाके द्वितीयः खण्डः । सप्तमोऽनुवाकस्समाप्तः ॥

षड्[1] ह[2] वै देवतास्स्वयम्भुवोऽग्निर्वायुरसावादित्यः प्राणोऽन्नं वाक् ॥१॥ ताश्श्रैष्ठ्ये[3] व्यवदन्ताऽहं[4] श्रेष्ठाऽस्म्यहं[5] श्रेष्ठाऽस्म्य्[6]? [स्मि] मां श्रियमुपाध्वमिति ॥२॥ ता अन्योन्यस्यै श्रेष्ठतायै[7] नाऽतिष्ठन्त । ता अब्रुवन्न वा अन्योन्यस्यै श्रेष्ठतायै[8] तिष्ठामह[9] एतां सम्प्रब्रवामहै यथा श्रेष्ठास्सम[3] इति ॥३॥ ता अग्निमब्रुवन्कथं त्वं[10] श्रेष्ठोऽसीति ॥४॥ सोऽब्रवीदहं देवानाम्मुखमस्म्यहमन्यासाम्प्रजानाम् । मयाऽऽहुतयो हूयन्ते । अहं देवानामन्नं विकरोम्यहम्मनुष्याणाम्[11] ॥५॥ स यन्न[12] स्याममुखा एव देवास्स्युरमुखा अन्याः प्रजाः । नाऽऽहुतयो हूयेरन्[13] । न देवानामन्नं विक्रियेत[14] न मनुष्याणाम् ॥६॥ तत इदं सर्वम्परा-

---

९ सप्त ॥

१ षड्ढ । २ ड । ३-श्रा । ४-ठे । ५ ष्वबदू-। ६ श्रेष्-। ७ आन्या-। ८-हे । ९ एत । १० त्वा । ११-कार्-। १२ य । १३ हूयन्ते (!) लिख कर हुयरन् (!) किया गया । १४-ए ।

भवेत्ततो न किंचन परिशिष्येतेति[15] ॥७॥ एवमेवेति होचुर्नैवेह[18] किंचन परिशिष्येत यत्[16] त्वं न स्या इति ॥८॥ अथ वायुमब्रुवन्कथमु त्वं श्रेष्ठोऽसीति ॥९॥ सोऽब्रवीदहं देवानाम्प्राणोऽस्म्यह-[17]मन्यासाम्प्रजानाम् । यस्मादहमुत्क्रामामि ततस्स प्रप्लवते ॥१०॥ स यदहं न स्यां तत इदं सर्वम्पराभवेत्ततो न किंचन परिशिष्येतेति ॥११॥ एवमेवेति होचुर्नैवेह किंचन परिशिष्येत[16] यत्त्वं न स्या इति ॥१२॥४।११॥

अष्टमेऽनुवाके प्रथमः खण्डः ।

अथादित्यमब्रुवन् कथमु त्वं श्रेष्ठोऽसीति ॥१॥ सोऽब्रवीदहमेवोद्यन्नहर्भवाम्यहमस्तंयन्रात्रिः । मया चक्षुषा कर्माणि क्रियन्ते । स यदहं न स्यां नैवाहस्स्यान्न[1] रात्रिः । न कर्माणि क्रियेरन् ॥२॥ तत इदं सर्वम्पराभवेत्ततो न किंचन परिशिष्येतेति ॥३॥ एवमेवेति[2] होचुर्नैवेह किंचन परिशिष्येत यत्त्वं न स्या इति ॥४॥ अथ प्राणमब्रुवन् कथमु[3] त्वं श्रेष्ठोऽसीति ॥५॥ सोऽब्रवीत्प्राणो भूत्वाऽग्निर्दीप्यते । प्राणो भूत्वा वायुराकाशमनुभवति[4] । प्राणो भूत्वाऽऽदित्य उदेति । प्राणादन्नम्प्राणाद्वाक् ॥६॥ स यदहं न स्यां तत[5]

१५–ष्ये । १६ य । १७ अहहम् । १८ ऽव ह ॥
१ हंन । २ प । ३ उक् । ४ शंक्–। ५ तत्त् (!) ।

इदं[६] सर्वम्पराभवेत्ततो न किंचन परिशिष्येतेति ॥७॥ एवमेवेति होचुर्नैवेह किंचन परिशिष्येत यत्त्वं न स्या इति ॥८॥ अथाग्निमब्रुवन् कथमु[९] त्वं श्रेष्ठमसीति ॥९॥ तदब्रवीन्मयि प्रतिष्ठायाग्निर्दीप्यते । मयि प्रतिष्ठाय वायुराकाशमनुविभवाति । मयि प्रतिष्ठायादित्य उदेति । मदेव प्राणो मद्राक् ॥१०॥ स यदहं न स्यां तत[६] इदं[७] सर्वम्पराभवेत्ततो न किंचन परिशिष्येतेति ॥११॥ एवमेवेति होचुर्नैवेह किंचन परिशिष्येत यत्त्वं न स्या इति ॥१२॥ अथ वाचमब्रुवन् कथमु[९] त्वं श्रेष्ठासीति ॥१३॥ साब्रवीन्मयैवेदं विज्ञायते मयाऽदः । स यदहं न स्यां नैवेदं विज्ञायेत नाऽदः ॥१४॥ तत[६] इदं सर्वम्पराभवेन् नैवेह किंचन परिशिष्ये[८]तेति ॥१५॥ एवमेवेति होचुर्नैवेह किंचन परिशिष्येत यत्त्वं न स्या इति ॥१६॥४॥१२॥

अष्टमेऽनुवाके द्वितीयः खण्डः ।

ता अब्रुवन्नेता वै किल सर्वा देवताः । एकैकामेवानुस्मः[१] । स यन्नु नस्सर्वासां देवतानामेकाचन न स्यात्तत इदं सर्वम्पराभवेत्ततो न किंचन परिशिष्येत । हन्त सार्धं समेत्य[२] यच्छ्रेष्ठं

---

६ संक्षेप करते हैं । 'स (! न के स्थान में) स्या इति' यहां तक छोड़ दिया है । ७ इ–,त्य् (!) संक्षिप्त दिया है । ८–शिष्य । ९ तुर ॥

१–स्म । २ साम–।

तदसामेति ॥१॥ ता एतस्मिन् प्राण[3] ओकारे वाच्य[4]कारे समायन्।
तद्यत्समायन् तत्साम्नस्सामत्वम् ॥२॥ ता अब्रुवन् यानि नो
मर्त्यान्यनपहतपाप्मान्यक्षराणि तान्युद्धृत्या[5]मृते[6]ष्वपहतपाप्मसु शुद्धे-
ष्वक्षरेषु गायत्रं गायामाऽग्नौ वायावादित्ये प्राणेऽन्ने वाचि।
ते[7]नापह[8]त्य मृत्युमपहत्य पाप्मानं[9] स्वर्गं लोकमियामेति॥३॥ एतदग्नेर-
मृतमपहतपाप्म शुद्धमक्षरम्। ग्निरित्यस्य मर्त्यमनपहतपाप्मा-
ऽक्षरम् ॥४॥ वेति वायोरमृतमपहतपाप्म शुद्धमक्षरम्। युरित्यस्य
मर्त्यमनपहतपाप्माक्षरम् ॥५॥ एत्यादित्यस्याऽमृतमपहतपाप्म
शुद्धमक्षरम्। त्येत्य[10]स्य मर्त्यमनपहतपाप्माक्षरम् ॥६॥ प्रेति
प्राणस्यामृतमपहतपाप्म शुद्धमक्षरम्[11]। णेत्य[12]स्य मर्त्यमनपहत
पाप्माक्षरम्॥७॥ एत्यन्नस्यामृतमपहतपाप्म शुद्धमक्षरम्। नमित्यस्य
मर्त्यमनपहतपाप्माक्षरम् ॥८॥ वेति वाचोऽमृतमपहतपाप्म शुद्ध-
मक्षरम्। गित्यस्यै मर्त्यमनपहतपाप्माक्षरम् ॥९॥ ता एतानि
मर्त्यान्यनपहतपाप्मान्यक्षराण्युद्धृत्याऽमृतेष्वपहतपाप्मसु[13] शुद्धेष्व-
क्षरेषु गायत्रमागायन्नग्नौ वायावादित्ये प्राणेऽन्ने वाचि। तेनाप-

---

३–णो। ४ वाच्च्। ५–त्यॅ। ६ अम–(!)। ७ येन। ८–त। ९–न। १० त्य इत्य्। ११ 'वेदिवाचो मृत' अधिक है पर लाल रङ्ग से काटा गया है। १२ णा इत्य्। १३–मासु॥

हृत्य मृत्युमपहत्य पाप्मानं स्वर्गं लोकमायन् ॥१०॥ अपहत्य मृत्यु-
मपहत्य पाप्मानं स्वर्गं लोकमेति य एवं वेद ॥११॥४।१३॥

अष्टमेऽनुवाके तृतीयः खण्डः ।

ता अब्रुवन्त्वयि प्रतिष्ठायैतमुपगच्छामेति । ता अब्रवी-
दास्येन[1] प्राणेन युष्मानास्येन[2] प्राणेन मामुपाप्नवाथेति ॥१॥
ता एतेन प्राणेनौकारेण वाच्यकारमभिनिमेष्यन्त्यो[10] हिङ्काराद्धका-
रमोकारेण वाचमनुस्वरन्त्य उभाभ्याम्प्राणाभ्यां गायत्रमगायन्नो-
वा३चोवा३चोवा३च् हुम् भा वो वा इति ॥२॥ स यथोभया-
पदी प्रतितिष्ठत्येवमेव[3] स्वर्गे लोके प्रत्यतिष्ठन् । प्रति स्वर्गे लोके
तिष्ठति य एवं वेद ॥३॥ य उ ह वा एवं विदस्माल्लोकात्प्रैति स
प्राण एव भूत्वा वायुमप्येति वायोरध्यभ्राण्यभ्रेभ्योऽधि वृष्टिं[4]
वृष्ट्यै[4]वेमं लोकमनुविभवति ॥४॥ ऋषयो ह सत्त्र[5]मासां चक्रिरे ।
ते पुनः पुनर्बह्वीभिर्बह्वीभिः प्रतिपद्भिस्स्वर्गस्य लोकस्य द्वारं
नानुचन बुबुधिरे ॥५॥ स ह श्रमेण तपसा व्रतचर्येणेन्द्रमवरुरु-
धिरे ॥६॥ तं होचुस्स्वर्गं वै लोकमैप्सिष्म[6] । ते पुनः पुनर्बह्वीभि-
र्बह्वीभिः[7] प्रतिपद्भिस्स्वर्गस्य लोकस्य द्वारं नानुचनाऽभुत्स्महि[8] ।

---

१ आस्येनेन । २—म्रा,—म्राँन् । ३—म्रत् । ४ पू— । ५—ष्र्— । ६ ऐप्सिषु ।
७ 'बह्वीभिर्' अधिक है । ८ ऽभूत्— । १० मेषन्त— ।

तथा नोऽनुशाधि यथा स्वर्गस्य लोकस्य द्वारमनुप्रज्ञायाऽनार्तास्स्वस्ति संवत्सरस्योदृचं गत्वा स्वर्गं लोकमियामेति ॥७॥ तान् होवाच को वस्स्थविरतम इति[१] ॥८॥४।१४॥

अष्टमेऽनुवाके चतुर्थः खण्डः ।

अहमित्यगस्त्यः ॥१॥ स वा एहीति होवाच तस्मै वै[१] तेऽहं तद्वक्ष्यामि[२] यद्विद्वाँसस्स्वर्गस्य लोकस्य[३] द्वारमनुप्रज्ञायाऽनार्तास्स्वस्ति संवत्सरस्योदृचं गत्वा स्वर्गं लोकमेष्यथेति ॥२॥ तस्मा एतं गायत्रस्योद्गीथमुपनिषदममृतमुवाचाऽग्नौ वायौ[४]वादित्ये प्राणेऽन्ने वाचि ॥३॥ ततो वै ते स्वर्गस्य लोकस्य द्वारमनुप्रज्ञायाऽनार्ता-स्स्वस्ति संवत्सरस्योदृचं गत्वा स्वर्गं लोकमायन् ॥४॥ एवमेवैवं विद्वान् स्वर्गस्य लोकस्य द्वारमनुप्रज्ञायाऽनार्तस्स्वस्ति संवत्सर-स्योदृचं गत्वा स्वर्गं लोकमेति ॥५॥४।१५॥

अष्टमेऽनुवाके पञ्चमः खण्डः । अष्टमोऽनुवाकस्समाप्तः ॥

एवं वा एतं गायत्रस्योद्गीथमुपनिषदममृतमिन्द्रोऽगस्त्यायो[२]-वाचाऽगस्त्य इषाय श्यावाश्वय इषश्श्यावाश्विर्गौषूक्तये गौषूक्ति-

---

१ 'अहमित्य्' (!) अधिक है ॥

१ नास्ति । २–क्ष्यामि । ३ 'द्वारमथैवं' अधिक है । ४ वायु ॥

१–गीत्–। २–आवो ।

ज्वालायनाय[3] ज्वालायनश्शाट्यायनये[4] शाट्यायनी रामाय क्रातु-जातेयाय वैयाघ्रपद्याय[5] रामः क्रातुजातेयो वैयाघ्रपद्यः-॥१॥४।१६॥

नवमेऽनुवाके प्रथमः खण्डः ।

—शङ्खाय बाभ्रव्याय शङ्खो बाभ्रव्यो दक्षाय कात्यायनेय[1] आत्रेयाय दक्षः कात्यायनिरात्रेयः कँसाय वारक्याय[2] कँसो वारक्यस्सुयज्ञाय शाण्डिल्याय सुयज्ञश्शाण्डिल्योऽग्निदत्ताय शाण्डिल्यायाऽग्निदत्तश्शाण्डिल्यस्सुयज्ञाय शाण्डिल्याय सुयज्ञश्शाण्डिल्यो जयन्ताय वारक्याय जयन्तो वारक्यो जनश्रुताय वारक्याय जनश्रुतो वारक्यस्सुदत्ताय[3] पाराशर्याय ॥१॥ सैषा[4] शाट्यायनी गायत्रस्योपनिषदेवमुपासितव्या ॥२॥४।१७॥

नवमेऽनुवाके द्वितीयः खण्डः । नवमोऽनुवाकस्समाप्तः ॥

केनेषितम्पतति प्रेषितम्मनः केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति चक्षुश्श्रोत्रं क उ देवो युनक्ति ॥१॥
श्रोत्रस्य श्रोत्रम्मनसो मनो यद् वाचो ह वाचं स उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति ॥२॥

---

३ ज्वा-। ४-आये। ५ वाघ्या-॥

१-आय। २ पू-। ३-श्रो, और 'जनश्रुताय वारक्याय जनश्रुते (!) वारक्यस्' अधिक है। ४-षो।

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः ।

न विद्म[1] न विजानीमो[2] यथै[3]तदनुशिष्यात्[4] ॥३॥

अन्यदेव तद् विदितादथो अविदितादधि ।

इति शुश्रुम[5] पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥४॥

यद् वाचाऽनभ्युदितं येन वागभ्युद्यते ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥५॥

यन्मनसा न मनुते येनाऽऽहुर्मनो[6] मतम् ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥६॥

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥७॥

यच्छ्रोत्रेण[8] न शृणोति येन श्रोत्रमिदं श्रुतम् ।

तदेव[9] ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥८॥

यत् प्राणेन न प्राणिति[10] येन प्राणः प्रणीयते ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥९॥४।१८॥

दशमेऽनुवाके प्रथमः खण्डः ।

यदि मन्यसे सुवेदेति दहमेवाऽपि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेषु । अथ नु मीमांस्यमेव ते मन्येऽविदितम् ॥ १ ॥

---

१ विदु । २–म । ३ ऽवै अधिक है । ४–शिष्–। ५–श्रू–।
६ मन्यो । ७ मतेम् । ८ नशृ । ९ उच्चानुक्त है । १०–णीति ॥

नाऽहम्मन्ये सुवेदेति नो न वेदेति वेद च ।

यो नस्तद् वेद तद्वेद नो न वेदेति वेद च ॥२॥

यस्याऽमतं तस्य मतम्मतं[1] यस्य न वेद सः ।

अविज्ञातं विजानतां विज्ञातमविजानताम् ॥३॥

प्रतिबोधविदितम्[2]मतममृतत्वं हि विन्दते ।

आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥४॥

इह चेदवेदीदथ सत्यमस्ति । न चेदिहाऽवेदीन्महतीविनष्टिः ।

भूतेषु-भूतेषु विविच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति॥५॥४।१९

दशमेऽनुवाके द्वितीयः खण्डः ।

ब्रह्म ह देवेभ्यो विजिग्ये । तस्य ह ब्रह्मणो विजये देवा अमहीयन्त ।

त ऐक्षन्ताऽस्माकमेवाऽयं विजयः । अस्माकमेवाऽयं महिमेति ॥१॥

तद्धैषां विजज्ञौ । तेभ्यो ह प्रादुर्बभूव । तन्न व्यजानन्त[1] किमिदं

यक्षमिति ॥२॥ तेऽग्निमब्रुवञ्जातवेद एतद् विजानीहि किमेतद्

यक्षमिति । तथेति ॥३॥ तद[2]भ्यद्रवत् । तमभ्यवदत् कोऽसीति ।

अग्निर्वा[3] अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥४॥ तस्मिँ-

---

१ अम्-। २-चित्-॥

१-अत । २-म । ३ ऽहम ।

स्त्वयि किं वीर्यमिति। अपीदं सर्वं दहेयम् यदिदम्पृथिव्यामिति ॥५॥ तस्मै तृणं निदधावेतद्दहेति। तदुपप्रेयाय सर्वजवेन। तन्न शशाक दग्धुम्। स तत एव निववृते नैनदशकं विज्ञातुं यदेतद्यक्षमिति ॥६॥ अथ वायुमब्रुवन् वायवेतद् विजानीहि किमेतद् यक्षमिति। तथेति॥७॥ तद[4]भ्यद्रवत्। तमभ्यवदत् कोऽसीति। वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहम[3]स्मीति ॥८॥ तस्मिँस्त्वयि किं वीर्यमिति। अपीदं सर्वमाददीय यदिदम्पृथिव्यामिति ॥९॥ तस्मै तृणं निदधावेतदादत्स्वेति। तदुपप्रेयाय सर्वजवेन। तन्न शशाकाऽऽदातुम्। स तत एव निव[5]वृते नैनदशकं विज्ञातुं यदेतद्यक्षमिति॥१०॥ अथेन्द्रमब्रुवन् मघवन्नेतद् विजानीहि किमेतद् यक्षमिति। तथेति। तद[6]भ्यद्रवत्। तस्मात् तिरोऽदधे ॥११॥ स तस्मिन्नेवाऽऽकाशे स्त्रियमाजगाम बहु शोभमानामुमां हैमवतीम्। तां होवाच किमेतद् यक्षमिति ॥१२॥४।२०॥

दशमेऽनुवाके तृतीयः खण्डः।

ब्रह्मेति होवाच ब्रह्मणो वा एतद् विजये महीयध्व इति। ततो हैव विदांचकार ब्रह्मेति ॥१॥ तस्माद्वा एते देवा अतितरामि-

---

४–म। ५ निववृँत। ६ म (!)।

वान्यान् देवान् यदग्निर्वायुरिन्द्रः । ते ह्येनन्नेदिष्ठं[1] पस्पृशुस्स[2] ह्येनत्[3] प्रथमो विदांचकार ब्रह्मेति ॥२॥ तस्माद् वा इन्द्रोऽतितरामिवाऽन्यान् देवान् । स ह्येनन्नेदिष्ठम्पस्पर्श स ह्येनत् प्रथमो विदांचकार ब्रह्मेति ॥३॥ तस्यैष आदेशो यदेतद् विद्युतो व्यद्युतदा३[4] इति[5] न्यमिषदा३[6] । इत्यधिदेवतम् ॥४॥ अथाऽध्यात्मम् । यदेनद् गच्छतीव च मनोऽनेन चैनदुपस्मरत्यभीक्ष्णं संकल्पः[7] ॥५॥ तद्ध तद्वनं नाम । तद्वनमित्युपासितव्यम् । स य एतदेवं वेदाऽभिहैनं सर्वाणि भूतानि संवाञ्छन्ति[8] ॥६॥ उपनिषदम्भो ब्रूहीति । उक्ता त उपनिषत् । ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥७॥ तस्यै तपो दमः कर्मेति प्रतिष्ठा[9] वेदास्सर्वाङ्गाणि सत्यमायतनम् ॥८॥ यो[10] वा एतामेवं वेदाऽपहत्य पाप्मानमनन्ते स्वर्गे लोकेऽज्येये प्रतितिष्ठति ॥९॥४।२१।

दशमेऽनुवाके चतुर्थःखण्डः । दशमोऽनुवाकस्समाप्तः॥

---

१ नेदिष्मा, नेदिष्ठम् । २ ते । ३ प्रन् । ४ विद्यु । ५ इती३ । ६ मीष् । ७ सुक् । ८ सम्वँञ्छन्ति । ९ ओ । १०–प ॥

आशा वा[1] इदमग्र आसीद्भविष्यदेव[2] । तद्भवत् । ता आपोऽभवन् ॥१॥ तास्तपोऽतप्यन्त । तास्तपस्तेपाना हुस्सिसेव प्राचीः प्राश्वसन् । स वाव प्राणोऽभवत् ॥२॥ ताः प्राण्याऽपानन् । स वा अपानोऽभवत् ॥३॥ ता अपान्य[3] व्यानम्[4] । स वाव व्यानोऽभवत् ॥४॥ ता व्यान्य समानन् । स वाव समानोऽभवत् ॥५॥ तास्समान्योदानन् । स वा उदानोऽभवत् ॥६॥ तदिदमेकमेव सधमाध्[5]मासीदविविक्तम् ॥७॥ स नामरूपमकु[6]रुत । तेनैनद्व्यविनक्[7] । वि ह पाप्मनो विच्यते य एवं वेद ॥८॥ तदसौ वा आदित्यः प्राणोऽग्नि[8]रपान[9] आपो व्यानो दिशस्समानश्चन्द्रमा उदानः ॥९॥ तद्वा एतदेकमभवत्प्राण एव । स य एवमेतदेकम्भवद्वेदैवं हैतदेकधा भवतीत्येकधैव श्रेष्ठ[10]स्स्वानाम्भवति ॥१०॥ तदग्निर्वै प्राणो वागिति पृथिवी वायुर्वै प्राणो वागित्यन्तरिक्षमादित्यो वै प्राणो वागिति द्यौर्दिशो वै प्राणो वागिति श्रोत्रं चन्द्रमा वै प्राणो वागिति मनः पुमान्वै प्राणो वागिति स्त्री॥११॥ तस्येदं सृष्टं शिथिलम्भुवनमासीदपर्याप्तम् ॥१२॥ स मनोरूपमकुरुत ।

---

१ 'आशा वा' का पुनः पाठ है । २ येद् । ३ अपान ।
४ ए-। ५-मावम् । ६-रैपम् । ७-विनोत् । ८-इम् । ९ उपा-।१० स्वॅ-॥

तेन तत्पर्याभोव । दृढं ह वा अस्येदं सृष्टमशिथिलम्भुवनम्पर्या-
म्भवति य एवं वेद ॥१३॥४।२२॥

एकादशेऽनुवाके प्रथमः खण्डः ।

सैषा[1] चतुर्धा विहिता[2] श्रीरुद्गीथस्सामार्क्यं ज्येष्ठब्राह्मणम् ॥१॥
प्राणो वावोद्वाग्गी[3] स उद्गीथः ॥२॥ प्राणो वावामो वाक् सा
तत्साम ॥३॥ प्राणो वाव को वागृक् तदर्क्यम् ॥४॥ प्राणो वाव
ज्येष्ठो वाग्ब्राह्मणं तज्ज्येष्ठब्राह्मणम् ॥५॥ उपनिषदम्भो
ब्रूहीति[4] । उक्ता त उपनिषद्यस्य ते धातव उक्ताः[5] । त्रिधातु विषु
वाव त उपनिषदमब्रूमेति[6] ॥ ६ ॥ एतच्छुक्लं कृष्णं ताम्रं
सामवर्णा इति ह स्माह यदैव[7][8] शुक्लकृष्णे ताम्रो वर्णोऽभ्यवैति
स वै ते दृश्येते[9] दशमं[10] मानुषमिति त्रिधातु । स ऐक्षत क नु म
उत्तानाय[11] शयानायेमा देवता बलिं हरेयुरिति ॥७॥४।२३॥

एकादशेऽनुवाके द्वितीयः खण्डः ॥

स पुरुषमेव प्रपदनायाऽवृणीत ॥१॥ तम्पुरस्तात्प्रसञ्चम्मा-

---

१ ऽसाश । २ विहीता । ३ श्रगीः, गीः । ४ ब्रू ।५-श्र: । ६-षद् ।
७-दा । ८ वे । ९-त । १० दश्श; श् के पूर्व एक अक्षर पढ़ा नहीं
जाता, कदाचित् कटा है । ११ उक्तानाय ॥

विशत् । तस्मा उरुरभवत् । तदुरस उरस्त्वम् ॥२॥ तस्मा अत्रसद् एता देवता बलिं हरन्ति ॥३॥ वाचमनुहरन्तीमग्निरस्मै बलिं हरति ॥४॥ मनोऽनुहरच्चन्द्रमा अस्मै बलिं हरति ॥५॥ चक्षुरनुहरदादित्योऽस्मै बलिं हरति ॥६॥ श्रोत्रमनुहरादिशो[१]ऽस्मै बलिं हरन्ति ॥७॥ प्राणमनुहरन्तं वायुरस्मै बलिं हरति ॥८॥ तस्यैते निष्खाता[२]ः पन्था बलिवाहना[३] इमे प्राणाः । एवं हैतं निष्खाताः पन्था बलिवाहनास्सर्वतो[४]ऽपियन्ति प्राणा य एवं वेद ॥९॥ सा हैषा ब्रह्मासन्दीमारूढा । आ हास्मै ब्रह्मासन्दीं हरन्त्यधि[५] ह ब्रह्मासन्दीं रोहति य एवं वेद ॥१०॥ तदेतद् ब्रह्मयश[६]श् श्रिया परिवृढम् । ब्रह्म ह तु सन् यशसा श्रिया परिवृढो भवति य एवं वेद ॥११॥ तस्यैष आदेशो[७] योऽयं दक्षिणोऽक्षन्नन्तः । तस्य यच्छुक्लं तदृचां रूपं यत्कृष्णं तत्साम्नां यदेव ताम्रमिव बभ्रु[८]रिव तद्यजुषाम्[७] ॥१२॥ य एवायं चक्षुषि पुरुष एष इन्द्र एष प्रजापतिस्समः पृथिव्या सम आकाशेन समो दिवा समस्सर्वेण भूतेन । एष परो दिवो दीप्यते । एष एवेदं सर्वमित्युपासितव्यम् ॥१३॥४॥२४॥

एकादशेऽनुवाके तृतीयः खण्डः ।

---

१ अदिश् । २ आ । ३ बलिं वाह । ४ ऽप्य् । ५ हरति । ६-श । ७ आ । ८-ऊर् ॥

सचाऽसचाऽसच्च सच्च वाक् च मनश्च [मनश्च] वाक् च चक्षुश्च[1] श्रोत्रं च श्रोत्रं च चक्षुश्च श्रद्धा च तपश्च तपश्च श्रद्धा च तानि षोडश ॥१॥ षोडशकलम्ब्रह्म । स य एवमेतत् षोडशकलम्ब्रह्म वेद तमेवैतत् षोडशकलम्ब्रह्माऽप्येति ॥२॥ वेदो ब्रह्म तस्य सत्यमायतनं शमः प्रतिष्ठा दमश्च ॥३॥ तद्यथा श्वः प्रैष्यन् पापात्कर्मणो जुगुप्सेतैवमेवाऽहरहः पापात्कर्मणो जुगुप्सेताऽऽकालात् ॥४॥ अथैषां दशपदी विराट् ॥५॥ दश पुरुषे स्वर्गनरकाणि । तान्येनं स्वर्गं गतानि स्वर्गं गमयन्ति नरकं गतानि नरकं गमयन्ति ॥६।४।२५॥

एकादशेऽनुवाके चतुर्थः खण्डः ।

मनो नरको वाङ् नरकः प्राणो नरकश्च चक्षुर्नरकश्श्रोत्रं नरकस्त्वङ् नरको हस्तौ नरको गुदं नरकश्शिश्नं नरकः पादौ नरकः ॥१॥ मनसा परीच्याणि[1] वेदेति वेद ॥२॥ वाचा रसान्वेदेति वेद ॥३॥ प्राणेन गन्धान्वेदेति वेद ॥४॥ चक्षुषा रूपाणि वेदेति वेद ॥५॥ श्रोत्रेण शब्दान्वेदेति वेद ॥६॥ त्वचा संस्पर्शान्वेदेति वेद ॥७॥ हस्ताभ्यां कर्म्माणि वेदेति वेद ॥८॥ उदरेणा-

---

१--अक्ष् ॥

१--ज्ञा ॥

ऽशनयां वेदेति वेद ॥९॥ शिश्नेन रामान्वेदेति वेद ॥१०॥ पादाभ्यामध्वनो वेदेति वेद ॥११॥ प्लक्षस्य प्रास्रवणस्य प्रादेशमात्रादुदक् तत्पृथिव्यै मध्यम् । अथ यत्रैते सप्तर्षयस्तद्दिवो मध्यम् ॥१२॥ अथ यत्रैत ऊषास्तत्पृथिव्यै हृदयम् । अथ यदे-तत्कृष्णं चन्द्रमासि तद्दिवो हृदयम् ॥१३॥ स य एवमेते द्यावा-पृथिव्योर्मध्ये च हृदये च वेद नाऽकामो[2]ऽस्माल्लोकात्[3]प्रैति ॥१४॥ नमोऽतिसामायै[4]ऽतुरेताय[5] धृतराष्ट्राय पार्थुश्रवसाय[6] ये च प्राणं रक्षन्ति ते मा रक्षन्तु । स्वस्ति । कर्मेति गार्हपत्यश्श्रम[7] इत्याह-वनीयोदम इत्यन्वाहार्यपचनः ॥१५।४।२८॥

एकादशेऽनुवाके पञ्चमः खण्डः । एकादशोऽनुवाकस्समाप्तः ॥

कस्सविता । का सावित्री । अग्निरेव सविता । पृथिवी सावित्री ॥१॥ स यत्राऽग्निस्तत्पृथिवी यत्र वा पृथिवी तदग्निः । ते द्वे योनी । तदेकम्मिथुनम् ॥२॥ कस्सविता । का सावित्री । वरुण एव सविता । आपस्सावित्री ॥३॥ स यत्र वरुणस्तदापो यत्र वा[1]ऽऽपस्तद्वरुणः । ते द्वेयोनी । [तदेकम्मिथुनम्] ॥४॥

२–चद् । ३–कोमो । ४–सामय–सामाय । ५ एतुर् । ६ पार्ज्जुश्र्–से ठीक किया हुआ है । ७–मय् ॥

कस्सविता । का सावित्री । वायुरेव सविता । आकाशस्सावित्री ॥५॥ स यत्र वायुस्तदाकाशो यत्र वाऽऽकाशस्तद्वायुः । ते द्वे योनी । तदेकम्मिथुनम् ॥६। कस्सविता । का सावित्री । यज्ञ एव सविता । छन्दांसि सावित्री ॥७॥ स यत्र यज्ञस्तच्छन्दांसि यत्र वा छन्दांसि तद्यज्ञः । ते द्वे योनी । तदेकम्मिथुनम् ॥८॥ कस्सविता । का सावित्री । स्तनयित्नुरेव सविता । विद्युत् सावित्री ॥९॥ स यत्र स्तनयित्नुस्तद्विद्युद्यत्र वा विद्युत् तत्स्तनयित्नुः । ते द्वे योनी । तदेकम्मिथुनम् ॥१०॥ कस्सविता । का सावित्री । आदित्य एव सविता । द्यौस्सावित्री ॥११॥ स यत्राऽऽदित्यस्तद्द्यौर्यत्र वा द्यौस्तदाऽऽदित्यः । ते द्वे योनी । तदेकम्मिथुनम् ॥१२॥ कस्सविता । का सावित्री । चन्द्र एव सविता । नक्षत्राणि सावित्री ॥१३॥ स यत्र चन्द्रस्तन्नक्षत्राणि यत्र वा नक्षत्राणि तच्चन्द्रः । ते द्वे योनी । तदेकम्मिथुनम् ॥१४॥ कस्सविता । का सावित्री । मन एव सविता । वाक् सावित्री ॥१५॥ स यत्र मनस्तद्वाग्यत्र [वा] वाक् तन्मनः । ते द्वे योनी । तदेकम्मिथुनम् ॥१६॥ कस्सविता । का सावित्री । पुरुष [एव] सविता । स्त्री सावित्री । स यत्र पुरुषस्तत् स्त्री यत्र वा स्त्री तत्पुरुषः । ते द्वे योनी । तदेकम्मिथुनम् ॥१७॥४॥२७॥

द्वादशेऽनुवाके प्रथमः खण्डः ।

---

१ पुन० २ क्षेप किया गया है । ३—उत् । ४—ईः (!)

तस्या एष प्रथमः पादो भूस्तत्सवितुर्वरेण्यमिति । अग्निर्वै वरेण्यम् । आपो वै वरेण्यम् । चन्द्रमा वै वरेण्यम् ॥१॥ तस्या एष द्वितीयः पादो भर्गमयो भुवो भर्गो देवस्य धीमहीति । अग्निर्वै भर्गः । आदित्यो वै भर्गः । चन्द्रमा वै भर्गः ॥२॥ तस्या एष तृतीयः पादस्स्वर्धियो यो नः प्रचोदयादिति । यज्ञो वै प्रचोदयाति । स्त्री च वै पुरुषश्च[1] प्रजनयतः ॥३॥ भूर्भुवस्तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहीति । अग्निर्वै भर्गः । आदित्यो वै भर्गः । चन्द्रमा वै भर्गः ॥४॥ स्वर्धियो यो नः प्रचोदयादिति । यज्ञो वै प्रचोदयाति । स्त्री च वै पुरुषश्च प्रजनयतः ॥५॥ भूर्भुवस्स्वस्तत् सवितुर्वरेण्यम्भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादिति[2] । यो वा एतां सावित्री-मेवं वेदाऽप पुनर्मृत्युं तरति सावित्र्या एव सलोकतां जयति सावित्र्या एव सलोकतां जयति ॥८।४।२८॥

द्वादशोऽनुवाके द्वितीयः खण्डः । द्वादशोऽनुवाकस्समाप्तः ।

इत्युपनिषद्ब्राह्मणं समाप्तम् ॥

१–सँ । २ 'यज्ञो वै प्रचोदयाति । स्त्री च वै पुरुषश्च प्रजनयतः' अधिक करो ॥

१—ऋषि—नामों की सूची।

वं० से वंश का अभिप्राय है।

अगस्त्य, ४।१५।१॥१६।१॥ वं०।

अतिसाम पतुरेत, ४।२८।१५॥

अनुवक्ता सात्यकीर्त, १।५।४॥

अभयद् आसमात्य, ४।८।७॥

अभिप्रतारी, ३।१।२१॥२।२,३,१३॥

अभिप्रतारी काक्षसेनि १।५९।१॥३।१।२१॥

अयास्य, २।८।७,८॥११।८॥

अयास्य आङ्गिरस, २।७।२,६॥८।३॥

अषाढ उत्तर पाराशर्य ३।४१।१॥ वं०

आङ्गिरस, २।२।६॥ देखो अयास्य आं०।

आजकेशी, १।९।३॥

आज द्विश, देखो बभ्र आ०।

आट्णार, देखो पार आ०।

आत्रेय, देखो दक्ष कात्यायनि आ०, शङ्ख शाट्यायनि आ०।

आरुणि, १।४२।१॥

आरुणेय, २।५।१॥

आर्त्ताकायण, देखो गळूनस आ०।

आह्लुकेय, देखो ह्रत्स्वाशय आ०।

आसमात्य, देखो अभयद आ०।

इन्द्रोत दैवाप शौनक, ३।४०।१॥ वं०।

इष श्यावाश्वि, ४।१६।१॥ वं०।

उच्चैःश्रवस कौपयेय, ३।२९।१,२,३॥

उत्तर, देखो आषाढ उ० पाराशर्य ।

उमा हैमवती, ४।२७।११॥

उलुक्य (?) जानश्रुतेय, १।६।३॥

उशनः काव्य, २।७।२,६॥

ऋष्यशृङ्ग काश्यप, ३।४०।१॥ वं० ।

ऋतुरेत (?), देखो अतिसाम प० ।

ऐक्ष्वाक, देखो भगेरथ ऐ० ।

ऐक्ष्वाक वार्ष्णि, १।५।४॥

ऐतरेय, देखो महिदास ।

ऐन्द्रोति, देखो दृति ऐ० शौनक ।

कंस वारकी, ३।४१।१॥ वं० ।

कंस वारक्य, ३।४१।१॥ वं० ।४।१७।१॥ वं० ।

कक्षीवन्त, २।५।११॥

कश्यप, ४।३।१॥

काक्षसेनि, देखो अभिप्रतारी का० ।

कायड्विय, ३।१०।२॥ देखो जनश्रुत का० । नगरी जानश्रुतेय का० ।
सायक जानश्रुतेय का० ।

कात्यायनि, देखो दत्त का० आत्रेय ।

कापेय, ३।२।२,१२॥ देखो शौनक का० ।

काखीरादि, २।४।४॥

काव्य, देखो उशनः का० ।

काश्यप, ३।४०।२॥ वं०। देखो ऋष्यशृङ्ग का०। देवतरः श्यावसायन
का० । शुष वाह्नेय का० ।

कुबेर वारक्य, ३।४१।१॥ वं० ।

कुरु, (एकव०) १।५६।१।(बहुव०)१।३८।१॥ देखो कौरव ।

कुरुपञ्चालाः, ३।७।६॥८।७॥३०।६,९॥४।७।२॥७।२॥

कृष्णदत्त लौहित्य, ३।४२।१॥ वं० । देखो त्रिवेद कृ० लौहित्य ।

कृष्णधृति सात्यकि, ३।४२।१॥ वं०।

कृष्णरात लौहित्य, ३।४२।१॥ वं० । देखो त्रियद कृ० लौहित्य ।

केशी द्र.भ्यं, ३।२६।१,२॥

कौपयेय, देखो उच्चैःश्रवः ।

क्रातुजातेय, देखो राम क्रा० वैयाघ्रपद्य ।

क्षैमि, देखो सुदक्षिणा क्षै० ।

गाङ्गुनस आर्ताकायणि, १।३८।४॥

गन्धर्वाप्सरसः, १।४१।१॥४५।१०,११॥३।५।१॥

गुप्त, देखो वैपश्चित दार्ढजयन्ति गु० लौहित्य ।

गोबल वार्ष्ण, १।६।१॥

गोश्रु (जाबाल), ३।७।७॥

गौतम (आरुणि) १।४२।१॥

गौषूक्ति, ४।१६।१॥ वं० ।

चैकितानेय, १।३७।७॥२।५।२॥ (बहुव०) १।४१।१॥

देखो ब्रह्मदत्त चै० । वासिष्ठ चै० ।

चैत्ररथि, देखो सत्याधिवाक चै० ।

जनश्रुत काण्ड्विय, ३।४०।२॥ वं० ।

जनश्रुत वारक्य, ३।४१।१॥ वं० ।४।१७।१॥ वं० ।

जमदग्नि, ३।३।११॥४।३।१॥

जयक लौहित्य, ३।४२।१॥ वं० ।

जयन्त, देखो यशस्वी ज० लौहित्य ।

जयन्त पाराशर्य, ३।४१।१॥ वं० ।

जयन्त वारक्य, ३।४१।१॥ वं० । (इस नाम के दो व्यक्ति) ४।१७।१॥ वं० ।

जानश्रुत, देखो नगरी जा० काण्ड्विय ।

जानश्रुतेय, देखो उलुक्य जा० । सायक जा० काण्ड्विय ।

जाबाल, ३।८।६॥ (द्विव०) ३।७।२,३,५,७,८॥ देखो गोश्रु शुक्र ।

जैवलि, १।३८।४॥
ज्याबायन, ४।१६।१॥ वं० ।
त्रसदस्यु, २।५।११॥
त्रिवेद कृष्णरात लौहित्य, ३।४२।१॥ वं० ।
दक्ष कात्यायनि आत्रेय, ३।४१।१॥ वं० ।
दृढजयन्त लौहित्य, ३।४२।१॥ वं० ।
दार्ढजयन्ति, देखो वैपश्चित दा० गुप्त लौहित्य, वैपश्चित दा० दृढजयन्त लौहित्य ।
दार्भ्य, देखो केशी दा० ।
दाल्भ्य (ब्रह्मदत्त चैकितानेय), १।३८।१॥५८।२॥
दाल्भ्य, देखो बक दा० ।
दृढजयन्त, देखो विपश्चित दा० लौहित्य, वैपश्चित दार्ढजयन्त दृ० लौहित्य ।
दृति ऐन्द्रोति शौनक, ३।४०।२॥ वं० ।
देवतरस् श्यावसायन काश्यप, ३।४०।२॥ वं० ।
दैवाप, देखो इन्द्रोत दै० शौनक ।
धृतराष्ट्र, ४।२६।१५॥
नगरी जानश्रुतेय काण्ड्विय, ३।४०।१॥ वं०।
नाक, ३।१३।५॥
पतङ्ग प्राजापत्य, ३।३०।३॥
परमेष्ठी प्राजापत्य, ३।४०।२॥ वं०।
पल्लिगुप्त लौहित्य, ३।४२।१॥ वं०।
पाराशर्य, देखो अषाढ उत्तर पा० । जयन्त पा० । वैपश्चित शकुनिमित्र पा० । सुदत्त पा० ।
पार्थश्रवस, ४।२६।१५॥
पार्ष्णी रौशन, २।४।८॥

पुलुष प्राचीनयोग्य, ३।४०।२॥ वं०।

पृथु वैन्य, १।१०।६॥२४।६॥३४।१॥

पौलुषि, देखो सत्ययज्ञ पौ० प्राचीनयोग्य।

पौलुषित, देखो सत्ययज्ञ पौ०।

प्रतीदर्श, ४।८।७॥

प्राचीनयोग्य, १।३६।१॥ देखो पुलुष प्रा०। सत्ययज्ञ पौलुषि प्रा०।
सोमशुष्म सात्ययज्ञि प्रा०।

प्राचीनशाख (बहुव०), ३।१०।१॥

प्राचीनशालि, ३।७।२,३,५,७॥१०।१॥

प्राजापत्य, देखो परमेष्ठी प्रा०।

प्रातृद भाल्ल, ३।३१।४॥

प्रास्रवण, देखो प्लक्ष प्रा०।

प्रोष्ठपाद वारक्य, ३।४१।१॥ वं०।

प्लक्ष प्रास्रवण, ४।२६।१२॥

बक दाल्भ्य, १।६।३॥४।७।२॥

बभ्रु आजकेश, २।७।२,६॥

बाभ्रव्य, देखो शङ्ख बा०।

ब्रह्मदत्त चैकितानेय, १।३८।१॥५६।१॥

भगेरथ ऐक्ष्वाक, ४।६।१,२॥

भाल्ल, देखो प्रातृद भा०।

भाल्लविन (बहुव०), २।४।७॥

मनु, ३।१५।२॥

महिदास ऐतरेय, ४।२।११॥

मातरिश्वन्, ४।२०।८॥

मानव, देखो शर्यात मा०।

मित्रभूति लौहित्य, ३।४२।१॥ वं०

मुख सामश्रवस, ३।१।२॥
यशस्वी जयन्त लौहित्य, ३।४२।१॥ वं० ।
राम क्रातुजातेय वैयाघ्रपद्य, ३।४०।२॥ वं० । ४।१६।१॥ वं०।
रोहिणा, १।२६।७,१०॥
लौहित्य, देखो कृष्णदत्त लौ०, कृष्णरात लौ०, जयक लौ०, त्रिवेद कृष्णरात लौ०, दक्ष जयन्त लौ०, पल्लिगुप्त लौ, मित्रभूति लौ०, यशस्वी जयन्त लौ०, विपश्चित दृढजयन्त लौ०, वैपश्चित दार्ढजयन्ति गुप्त लौ०, वैपश्चित दार्ढजयन्ति दृढजयन्त लौ०, श्यामजयन्त लौ०, श्यामसुजयन्त लौ०, सत्यश्रवस लौ० ।
वसिष्ठ, ३।२।१३॥१५।२॥१८।६,७॥ तुल० वासिष्ठ ।
वारकि, देखो कंस वा० ।
वारक्य, देखो कंस वा०, कुबेर वा०, जनश्रुत वा०, जयन्त वा०, प्रोष्ठपाद वा० ।
वार्ष्ण्य, देखो ऐक्ष्वाक वा०, गोबल वा० ।
वासिष्ठ चैकितानेय, १।४२।१॥
वाहेय, देखो शुष वा० काश्यप ।
विपश्चित दृढजयन्त लौहित्य, ३।४२।१॥ वं० ।
विपश्चित शकुनिमित्र पाराशर्य, ३।४१।१॥ वं० ।
विश्वामित्र, ३।३।७॥१५।१॥ (बहुव०) ३।१५।१॥ तुल० वैश्वामित्र ।
वैकुण्ठ (इन्द्र), ४।५।१॥१०।१०॥
वैन्य, १।४५।२॥ देखो पृथु वै० ।
वैपश्चित दार्ढजयन्ति गुप्त लौहित्य, ३।४२।१॥ वं० ।
वैपश्चित दार्ढजयन्ति दृढजन्त लौहित्य, ३।४२।१॥ वं० ।
वैमृध (इन्द्र), ४।१०।१०॥
वैयाघ्रपद्य, देखो राम क्रातुजातेय वै० ।

शकुनिमित्र, देखो विपश्चित् श० पा०शर्थ।

शङ्ख बाभ्रव्य, ३।४१।१॥ वं० । ४।१७।१॥ वं० ।

शङ्ख शाट्यायनि आत्रेय, ३।४०।१॥ वं० ।

शर्थ, ४।१७।१०॥

शर्यात मानव, २।७।१॥८।३,४॥

शाट्यायनि, १।६।२॥३०।१॥२।२।८॥७।३॥९।१०॥३।१३।६॥२८।४॥
४।१६।१॥ वं० । १७।१॥ वं० । देखो शङ्ख शा० आत्रेय।

शाण्डिल्य, देखो सुयज्ञ शा० ।

शालावत्य, १।३८।४॥

शुक्र (जाबाल), ३।७।७॥

शैलन (बहुव०),१।२।३॥२।४।६॥ देखो पार्ष्ण्य शै० सुचित्त शै० ।

शौनक, १।५९।२॥ देखो इन्द्रोत दैवाप शौ०, दृति ऐन्द्रोति शौ० ।

शौनक कापेय, ३।१।२१॥

श्यामजयन्त लौहित्य (इस नाम के दो व्यक्ति), ३।४२।१॥ वं०।

श्यामसुजयन्त लौहित्य, ३।४२।१॥ वं० ।

श्यावसायन, देखो देवतरस् श्या० काश्यप।

श्यावाश्वि, देखो इष श्या० ।

श्रुष वाह्नेय काश्यप, ३।४०।२॥ वं० ।

श्वाजनि (एक वैश्य), ३।५।२॥

सत्ययज्ञ पौलुषित, १।३९।१॥

सत्ययज्ञ पौलुषि प्राचीनयोग्य, ३।४०।१॥ वं० ।

सत्यश्रवस् लौहित्य, ३।४२।१॥ वं० ।

सत्याधिवाक चैत्ररथि, १।३९।१॥

सात्यकि, देखो कृष्णधृति सा० ।

सात्यकीर्त (बहुव०), ३।३२।१॥ देखो अनुवक्ता सा० ।

सात्ययज्ञि (बहुव०), ३।३।५॥ देखो सोमशुष्म सा० प्राचीनयोग्य।

सामश्रवस, देखो मुख सा० ।
सायक जानश्रुतेय काण्ड्विय, ३।४०।२॥ वं० ।
सुचित्त शैलन, १।१४।४॥
सुदक्षिण, ३।७।८॥८।८॥ (देखो सुदक्षिण क्षैमि)
सुदक्षिण क्षैमि, ३।८।३॥७।१,४.५,६॥ (देखो सुदक्षिण) ।
सुदत्त पाराशर्य, ३।४१।१॥ वं०।४।१७।१॥ वं० ।
सुयज्ञ शाण्डिल्य, ४।१७।१॥
सोमबृहस्पति (द्विवं०), १।५८।९॥
सोमशुष्म सात्ययज्ञि प्राचीनयोग्य, ३।४०।२॥ वं० ।
हृत्स्वाशय आल्लकेय, ३।४०।२॥ वं०।
हैमवती, देखो उमा है० ।

२—निर्वचनादि सूची ।

अक्षर, १।२४।१॥४३।८।१।२४।२॥ ४३।८॥
अन्तरिक्ष, १।२०।४॥
अयास्य, २।८।७॥११।८॥
अर्क्य, ४।२३।४॥
असु, १।४०।७॥
असुर, ३।३५।३॥
आङ्गिरस, २।११।९॥
आदि, १।११।७॥१९।२॥
आदित्य, ४।२।९॥
आवर्त्त, ३।३३।७॥
उरस्, ४।२४।२॥
ऋच्, १।१५।८॥
गायत्र, ३।३८।४॥
देवश्रुत, १।१४।३॥
पतङ्ग, ३।३५।२॥
पश्यत, १।५६।८॥
प्रतिहार, १।११।९॥
प्रसाम, प्रसामि, १।१५।७॥
प्रस्ताव, १।११।६॥
बृहस्पति, २।२।५॥
भीमल, १।५७।१॥
मधुपुत्र, १।५५।१॥
महीया, १।४८।५॥
रुद्र, ४।२।८॥
रोदसी, १।३२।४॥
वसु, ४।२।३॥
वैश्वामित्र, ३।३।८॥

शतसनि, १।५०।४॥
सजात, १।४८।३॥
समुद्र, १।२५।४॥
सामन्, १।३३।७॥ ४०।६॥४८।७॥ ४१।२॥४।१३।२॥ १।१२।५॥ १।५३।५॥
५६।२॥४।२३।१॥
सिन्धु, १।२९।२॥
सुवर्ग, ३।१४।४॥
हरि, १।४४।५॥

३—(क) ऋचादिसूची।

अदितिर्द्यौरदितिः, १।४१।४॥ ऋ० १।८९।१०॥
अपश्यं गोपामनिपद्यमानाम्, ३।३७।१॥ ऋ०१।१६४।३१॥
आत्मा देवानामुत मर्त्यानाम्, ३।२।४॥ तु० छां० उ० ४।३।७॥
आयुर्माता मतिः पिता, ४।१।७॥
इन्द्रमुक्थमृचम्, १।४५।१॥
इमामेषाम्पृथिवीम्, १।२४।७॥ अथ०१०।८।३६॥
उतैषां ज्येष्ठः, ३।१०।१२॥ अथ० १०।८।२८॥
उपाऽस्मै गायत, ३।३८।६,८॥ ऋ० ९।११।१॥
ऋषय एते मन्त्रकृतः, १।४५।२॥
चत्वारि वाक् परिमिता, १।७।३॥४०।१॥ ऋ० १।१६४।४५॥
तत्सवितुर्वरेण्यम्, ४।२८।१॥ ऋ० ३।६२।१०॥
ऽत्र्यायुषं कश्यपस्य, ४।३।१॥ तुल०, अ० ५।२८।७॥
नवो नवो भवसि, ३।२७।११॥ तुल०, ऋ० १०।८४।१९॥
पतङ्गमक्तम्, ३।३५।१॥ ऋ० १०।१७७।१॥
पतङ्गो वाचम्मनसा, ३।३६।२॥ ऋ० १०।१७७।२॥
मयीदं मन्ये भुवनादि, ३।१७।६॥
महात्मनश्चतुरो देवः, ३।२।२॥ तुल० छां० उ० ४।३।६॥

यद्द्यावा इन्द्र ते शतम्, १।३।२।१॥ ऋ० ८।७०।५॥
यस्त्सरश्मिर्वृषभः, १।२६।७॥ ऋ० २।१२।१२॥
येऽग्नयः पुरीष्याः, ४।३।३॥ य० १८।६७॥
येभिर्वात इषितः, १।२४।८॥ अथ० १०।८।३५॥
रूपं-रूपम्प्रतिरूपः, १।४४।१॥ ऋ० ६।४७।१८॥
रूपं-रूपम्मघवा, १।४४।८॥ ऋ० ३।५३।८॥
स नो मयोभूः, ४।३।२॥
स यदा वै म्रियते, १।४।७॥
स्त्री सैवाऽग्रे, १।५८।५॥
स्थूणां दिवस्तम्भनीम्, १।१०।९॥

(ख)

अभिजिदस्यभिजय्यासम्, ३।२०।१०॥
अमोऽहमस्मि, (दीर्घपाठ), १।५४।८॥ (संक्षिप्त), ५।७।४॥
अरण्यस्य वत्सोऽसि, ४।४।१॥
उपावर्त्तध्वम्, ३।१६।१॥३४।२॥
गुहासि देवोऽसि, ३।२०।१॥
दिशस्था ओत्रम्, १।२२।८॥
देवेन सवित्रा, ३।१८।३,८॥
पुरुषः प्रजापतिः, १।४६।३,४॥
प्राणा३ प्राणा३ प्राणा३, ३।३।७॥
महाम्महा समधत्त, ३।४।५॥
यत्पुरस्ताद्वासीन्द्रः, ३।२१।१॥
विभूः पुरस्तात्सम्पत्, ३।२७।१॥
व्युषि सविता भवसि, ४।५।१॥
श्वेताश्वो दर्शतो, ४।१।१॥
सत्यस्य पन्था, ३।२७।१०॥
सोमः पवते, ३।१६।१॥३४।२॥

D.G.A. 80.
CENTRAL ARCHAEOLOGICAL LIBRARY
NEW DELHI
Borrowers record
l No.— Sa2Vu/Jai/Ram - 81
Rama Deva &

~~2020~~

~~Brahmana~~

~~Title~~

Upanisads — Jaiminiya Brāhmanas — Talavakāra
Sanskrit Lit — Upanisads

D.G.A. 80.
CENTRAL ARCHAEOLOGICAL LIBRARY
NEW DELHI
Issue record

Call No.— Sa2Vu/Jai/Ram - 8172

Author— Rama Deva & Oertel, H.

Title— Jaiminīya upaniṣadbrāhmaṇam.

Borrower's Name	Date of Issue	Date of Return

P.T.O.